178* गात्रद्यानस्य लिप्ता चन्दनेन सुगन्धिना ।

[B1 अत्र, D2 अग्रे (for अग्र) Ś1 -सुम लिप्ता, D2 -नपाल्कना, D3–5 7 -नपाश्चाग्लाश्च, M4 -नपाम्भार्द्रा (for -नस लिप्ता) D1 नयाम्यकन्वितस्ना (sic) (for the prior half)]

38 [b]) Ñ2 V1 B D1 M2 4 देवीव(M2 देवते) विचरिष्यसि, D2 देवि त्व विहरिष्यसि —[c]) M3 द्रमा damaged in चन्द्रमा Ś1 Ñ2 V1 B D1 2 6 चन्द्र वि(D1 2 °द्रस्य)स्पर्द्धमानेन, D3 4 7 चन्द्रविस्पर्द्धिनाने(D3 °ते)न, D5 चन्द्रवरस्पर्द्धतानेन, M1 चन्द्रवित्रतिकाशेन —[d]) Ś1 Ñ2 V1 B D6 च(Ś1 D6 त्व) शुभानने, D1 2 M4 च(M4 त्व) शुचि(D1 सुचि)स्मिते, D3 [अ]प्रतिमानने, D4 5 7 G1 [अ]प्रतिमेन ते(G1 च), T2 प्रतिमेन च T3 [अ]प्रतिमा शुचि, G2 M1 [अ]प्रतिमानिना, Cg as in text (for [अ]प्रतिमानना) —[e]) B1 2 4 रमिष्यसि, D5 विशिष्टमि (sic), M4 भविष्यति (for गमिष्यसि) Ś1 Ñ2 V1 B D1–7 [अ]नवद्या(D6 °)गि (for गतिं मुख्यां) —[f]) Ś1 D6 नदयती, Dd1 Dm1 G3 M2 C1*p* नर्हयती, D1 2 मर्दयंती, D3–5 7 कर्ष(D4 [after corr *sec m*] व्यथ)यती, T2 गमयती M4 स्पर्धयती, all Cs as in text (for गर्वयन्ती) Ś1 Ñ2 V1 B D6 सुहृज्जन, Dt1 Dd1 Dm1 T3 G1 2 M1 3 Cm t द्विषज्जने, D3 जनाज्जन, Cg as in text (for द्विषज्जनम्)

39 Dg1 om 39–40 —[ab]) G2 तथा (for तव) Ś1 Ñ2 V1 B D1 2 6 M4 कुब्जे दास्योन्या (for कुब्जा कुब्जायाः) D3–5 7 अद्यप्रभृति या काश्चित्कुब्जा(D5 °ब्जे) मम निवेशने —[c]) D3–5 7 तास्त्वा (for पादौ) V1 उपचरिष्यति (for परि°) —[d]) B1 3 तथैव, D3–5 7 तथा त्व(D5 सा) (for यथैव) Ś1 Ñ2 V1 B D1 2 6 M4 मम भामि(Ñ2 V1 B °वि)नि, D3–5 7 मा(D3 7 मा, D5 त्व) वरानने G2 (before corr) त्व समा मम (for त्व सदा मम)

40 Dg1 om 40 (cf v l 39) —[ab]) Dd1 Dm1 M2 प्रशस्यमाना सा कुब्जा (for [a]) D3–5 7 कुब्जा देवीमथाब्रवीत् (for [b]) Ś1 Ñ2 V1 B D1 2 6 M4 एव प्रशस्ता कैकेय्या कुब्जा भूयोब्रवीदिद —T3 om (hapl) from 40[c] up to 44[c] —[c]) Ñ2 V1 B M4 देवी, D1 2 दिव्ये (for शुभ्रे) —[d]) T1 damaged for मग्निशि Ś1 D3–7 त्वरयतीव(D3 7 °च) ता भृश, Ñ2 B1–3 D1 2 M4 कैकेयीं त्वरयत्युत(Ñ2 °यन्तत, D1 2 M4 °यन्निव), B4 कैकेयीं सा कृतस्मिता

41 T3 om 41 (cf v l 40) —[b]) Ś1 D3–7 transp न and कल्याणि Ñ2 V1 B D1 2 M4 प्रशस्यते (for विधीयते) —M4 om 41[cd] —[c]) Dg1 Dm1 G3 M2 कल्याणि (for °णं) —[d]) Ś1 Ñ2 V1 B D1 2 6 परिमोह(B4 °चार)य (for अनुदर्शय) —After 41, B3 ins, while Ś1 Ñ2 V1 B1 2 4 D1 2 6 ins l 2–3 only

179* तव वाक्यवशो राजा करिष्यति तदन्यथा ।
तथेत्यथ प्रतिज्ञाय मन्थरावचनं तदा ।
भरतस्याभिषेकाय कैकेयी कृतनिश्चया ।

तथा प्रोत्साहिता देवी गत्वा मन्थरया सह ।
क्रोधागारं विशालाक्षी सौभाग्यमदगर्विता ॥ ४२
अनेकशतसाहस्रं मुक्ताहारं वराङ्गना ।
अवमुच्य वरार्हाणि शुभान्याभरणानि च ॥ ४३

ततो हेमोपमा तत्र कुब्जावाक्यवशं गता ।
संविश्य भूमौ कैकेयी मन्थरामिदमब्रवीत् ॥ ४४
इह वा मां मृतां कुब्जे नृपायावेदयिष्यसि ।
वनं तु राघवे प्राप्ते भरतः प्राप्स्यति क्षितिम् ॥ ४५

G 2 8 57
B 2 9 58
L 2 12 22

[(l 2) D2 [ए]व (for [अ]थ) D2 परिजाय D1 -वचनात Ñ2 B3 D1 2 तत , D6 मृदु (for तदा)] while D3-5 7 ins

180* इति प्रोत्साहिता देवी कैकेयी कुब्जया तदा ।
भरतार्थैषिणी मूढा रामार्थं भृशदूषिणी ।

[(l 1) D4 चोत्साहिता, D5 मो°, D7 यो° —(l 2) D3 7 रामार्थ , D5 रामार्थे]

42 T3 om 42 (cf v l 40) Ś1 Ñ2 V1 B D3-7 transp 42 and 43 —[a]) Ś1 Ñ2 V1 B D1 2 6 M4 भृश वि(M4 वै)मेदिता, D3 तथा प्रौढा हिता, M2 तया प्रो° (for तथा प्रोत्साहिता) —[b]) Ś1 Ñ2 V1 B D1 2 6 M4 तया (for गत्वा) Ś1 Ñ2 V1 B D1 2 6 M4 तदा(D1 2 °था) (for सह) —[c]) D6 क्रोधागारे Ś1 Ñ2 V1 B D1-7 M4 प्रविश्यैका (Ś1 D6 °व, D4 7 °पा) (for विशालाक्षी) —[d]) Ś1 Ñ2 V1 B D1 2 6 M4 सौभाग्यबलदर्पि(Ś1 °गर्वि)ता, Dg1 D3 5 7 T2 G1 2 M1 3 °मददर्पिता

43 D1 2 T3 M4 om 43 (for T3, cf v l 40) Ś1 Ñ2 V1 B D3-7 transp 42 and 43 —[a]) Ś1 Ñ2 V1 B D6 महार्हमणिरत्नाढ्य(V1 °नि) —[b]) Dg1 मुक्ताहारान् D3 5 7 वरानना —[c]) Dg1 अतिमुच्य (for अव°) Ś1 Ñ2 V1 B D6 तथान्यानि, D3-5 7 सुवर्णं त(D5 °र्णाभ), G1 2 M1 3 महार्हाणि (for वरार्हाणि) D17 (Not taken for Crit App) वरागानि तथान्यानि —[d]) Ś1 Ñ2 V1 B D6 सर्वाणि (for शुभानि)

44 T3 om 44 (cf v l 40) —[a]) Dt1 Dd1 Dm1 तदा (for ततो) Ś1 Ñ2 V1 B D1-7 M4 तप्त(D3 5 °प्र)हे (D5 ह)मोपम(D2 °)तनु —[b]) Ñ2 V1 B D1 2 M4 -वशानुगा (for -वशं गता) —[c]) D1 प्रवेश्य (for संविश्य)

45 [ab]) Ś1 D6 अत्र (for इह) Ñ2 B3 4 रामा, B2 मा वा (by transp), M2 3 वा मा (for वा मां) D2 इह वा सशता कुब्जे (for [a]) Ś1 Ñ2 V1 B D2 6 M4 भर्तुरावेदयिष्यसि (for [b]) D1 3-5 7 इहैवाद्य विमोक्ष्यामि प्राणानिष्टास्त्वयाग्रत —[c]) D4 7 वने Ñ2 B1 3 D1-3 5 6 T1 2 G3 M4 वा, B3(also) 4 D4 7 च (for तु) ❀ Ct तुर्वार्थे । ❀ Ś1 Ñ2 B D1-7 M4 याते (for प्राप्ते) V1 रामे वापि वन याते —[d]) Dt1 K(ed) प्राप्स्यते Ś1 Ñ2 V1 B D3-7 G1 2 M1 श्रिय (for क्षितिम्) D1 2 M4 भरतो राज्यमाप्स्यति —After 45, Ś1 Ñ2 V1 B D1-7 M4 ins

181* न धनानि न वस्त्राणि नालंकारान्न भोजनम् ।
न सेविष्ये इह तावद्यावद्रामो वन गत ।

[(l 1) D1 2 सुवर्णेन विना(D1 °र्णं नव ना)प्यन्यद्रत्न किंचिन्न शोभ(D1 भोज)न, M4 सुवर्णमणिमुक्ताना वीक्ष्य राज्ञीननुत्तमान् —(l 2) Ś1 B1 D6 आमेवयिष्येह, V1 B2 आमे°, B4 D1 2 आ (B4 न)सेविष्याम्यह, M4 न महिष्याम्यह (for न सेविष्ये इह) V1 B1 2 व्रजेत् D3-5 7 रोचयिष्याम्यह तावद्यावद्रामो न गच्छति] B2(marg) D3-5 7 cont

182* अभिषिक्ते च भरते राघवे च वन गते ।
क्रोधागारात्समुत्थास्ये नान्यथा पश्य मे व्रतम् ।

[(l 1) B2 तु (for च) —(l 2) D3 damaged for नान्य B2 मतिं, D3 5 धृतिं (for व्रतम्)]

Thereafter, D3-5 7 read a passage given in App I (No 8), while B2 ins l 7-8 only of App I (No 8) —After 45, Dg1 Dt1 Dd1 Dm1 T G M1-3 ins

183* न सुवर्णेन मे ह्यर्थो न रत्नैर्न च भोजनैः ।
एष मे जीवितस्यान्तो रामो यद्यभिषिच्यते ।
अथो पुनस्ता महिषी महीक्षितो
वचोभिरत्यर्थमहापराक्रमै ।
उवाच कुब्जा भरतस्य मातर
हित वचो राममुपेत्य चाहितम् ।
प्रपत्स्यते राज्यमिद हि राघवो
यदि ध्रुव त्व ससुता च तप्स्यसे ।
अतो हि कल्याणि यतस्व तत्तथा
यथा सुतस्ते भरतोऽभिषेक्ष्यते ।
तथातिविद्धा महिषी तु कुब्जया
समाहता वागिषुभिर्मुहुर्मुहु ।
निधाय हस्तौ हृदयेऽतिविस्मिता
शशस कुब्जा कुपिता पुन पुन ।
यमस्य वा मा विषय गतामितो
निशम्य कुब्जे प्रतिवेदयिष्यसि ।
वन गते वा सुचिराय राघवे
समृद्धकामो भरतो भविष्यति ।
अह हि नैवास्तरणानि न स्रजो
न चन्दन नाञ्जनपानभोजनम् ।
न किंचिदिच्छामि न चेह जीवितम्
न चेदितो गच्छति राघवो वनम् ।

[(l 1) Dt1 सुवर्णेन न (by transp) —(l 2) T1 जीव तो (damaged) —(l 4) Dg1 M2 मनोहराक्षर, Cm t as above (for महापराक्रमै) —(l 7) Dd1 प्रयस्यते, Dm1 प्रपश्यते, G3 प्रपत्स्यति (for प्रपत्स्यते) —(l 8) G2 तप्यसे —(l 9) Dt1 Dm1 M1 ततो, Dd1 यतो, T1 तो (for अतो) M3 यत स्वय (for यतस्व तत्) —(l 10) G2 M1

G 2 8 59
B 2 9 65
L 2 12 24

अथैतदुक्त्वा वचनं सुदारुणं
निधाय सर्वाभरणानि भामिनी ।
असंवृतामास्तरणेन मेदिनीं
तदाधिशिश्ये पतितेव किंनरी ॥ ४६

उदीर्णसंरम्भतमोवृतानना
तथावमुक्तोत्तममाल्यभूषणा ।
नरेन्द्रपत्नी विमना बभूव सा
तमोवृता द्यौरिव मग्नतारका ॥ ४७

इति श्रीरामायणे अयोध्याकाण्डे नवमः सर्गः ॥ ९ ॥

[ऽ]भिषिच्यते —(l. 11) Dg1 तदा (for तथा) Dd1 M3 हि, G1 तु (for [अ]ति-) Dt1 G2 M1 3 [इ]ति (for तु) —(l 12) G3 समागता (sic) —(l 13) Dg1 Dt1 M2 3 विधाय, Cg as above (for नि°) G2 निधये (sic) (for हृद्ये) —(l 14) T3 रुपिता, G3 कुपिता, Cm g as above —(l 16) T G M1 2 Cl निशाम्य, Ct as above —(l 17) G2 3 गतो (sic) —(l 22) T3 चोदितो (for चेदितो) M3 reads वनम् *inf lin sec m*]

46 [a]) Ś1 Ñ2 V1 B D1 6 M4 इतीदम्, Dt1 Dd1 Dm1 T2 M2 अथैवम्, D2–5 7 इत्येवम्, T3 अथेदम् Dd1 Dm1 D3 7 उक्ता (for उक्त्वा) D1 सुदारण —[b]) D1 (after corr) 2 निहाय (for निधाय) V1 B भाविनी (for भामिनी) —M3 reads 46[c] *inf lin pr m* —[c]) Dt1 असस्कृताम्, D4 असस्तृता (sic), M4 असहिताम् (for असवृताम्) Ñ2 V1 B D4 7 सस्तरणेन (D7 °ण न [sic]), D6 (before corr) अस्तरणेन, G3 आस्तरणानि (for आस्तरणेन) Ś1 V1 B2–4 D1–3 6 T3 G M मेदिनी (sic), Cr m g k as in text (for मेदिनीं) —[d]) Ś1 Ñ2 V1 B D1 2 6 T3 M4 अथ, Dg1 T2 तथा, D3–5 7 ततो (for तदा) Ñ2 [अ]नुशिश्ये, B1 4 Dg1 Dt1 Dd1 Dm1 D1 2 [अ]धिशिश्ये, D3 [अ]वशिश्ये, D7 T2 [अ]विशिश्ये (for [अ]धिशिश्ये) B1 शल्लकी (for किंनरी)

47 M4 om 47 —[a]) Ś1 D6 -मनावृतानना, B1 -समा°, D5 -तपो° (for -तमोवृतानना) —[b]) Ś1 Ñ2 V1 B Dt1 Dd1 D1–7 तदा (for तथा) Ś1 Ñ2 V1 B Dm1 D1 3 6 T3 विमुक्तोत्तम-, Dg1 D2 M2 3 च मुक्तोत्तम- (for [अ]वमुक्तोत्तम) Ś1 Ñ2 V1 B D1–7 -दामभूषणा (D1 °णा [sic], D5 °णे) (for -माल्यभूषणा) —[c]) D2 विमला (for विमना) —[d]) Ś1 Ñ2 V1 B D1–7 नष्टभास्क(D3 °स्व)रा (for मग्नतारका)

Colophon Dg1 reads the colophon in marg —*Sarga name* Ñ2 B3 रामप्रव्राजनोपायचिंतनं (B3 °चिंता), V1 B2 रामप्रवास(B2 °सन)चिंता, B1 4 रामप्रवासनोपायचिंता, D1 2 उपाय(D2 °)दर्शनो, D3 कैकेय्या वाक्य, D4 7 कैकेयीप्रायोपवेशो(D7 ° शन), D5 मथराप्रशसा, D6 मथरावाक्य —*Sarga no* (figures, words or both) B1 4 D3 6 om, Ś1 D4 7 12, Ñ2 B3 7, V1 8, Dg1 Dt1 Dd1 Dm1 S 9 (as in text), D1 64, D2 11, D5 14 —After colophon, D6 concludes with रामाय नम ॐ, T3 श्रीरामचन्द्राय नम, G M1 2 श्रीरामाय नम

१०

आज्ञाप्य तु महाराजो राघवस्याभिषेचनम् । प्रियार्हां प्रियमाख्यातुं विवेशान्तःपुरं वशी ॥ १

G 2 9 1
B 2 10 11
L 2 13 1

10

☞ Ñ1 missing up to रामेण in l 169 of App I (No 9) (cf v l 2 1 1) —Before 1, B1 ins

184* ता तु मूर्छा निपतिता रुदन्तीं मन्थरा पुन ।
कैकेयी सान्त्वयोवाच मन्थरायाश्च तद्वच ।

Then ins lines 7 and 8 of 169* and then cont

185* कदर्थमर्थरूपेण गृह्यती तु तपस्विनी ।

Before 1, B1(after App I No 7 [cf v l 2 9 27]) 2 4 Dg1 Dt1 Dd1 Dm1 D1–5 7 S ins a passage given in App I (No 8) D6 begins with ॐ

1 ^{a}) B1 [अ]थ, B4 च (for तु) —After 1^{ab}, Ś1 (marg) Dg1 Dt1 Dd1 Dm1 T G1 3 M1–3 all Cs ins, D1 2 M4 subst l 2 only for 1^{ab}, while D3–5 7 G2 subst l 1 only for 1^{cd}

186* उपस्थानमनुज्ञाप्य प्रविवेश निवेशनम् ।
अद्य रामाभिषेको वै प्रसिद्ध इति जज्ञिवान् ।

[(l 1) T1 damaged up to नु T2(before corr) G1 अनुस्थाप्य (for °ज्ञाप्य) D3–5 7 उपस्थापनमाज्ञाप्य (for the prior half) Dg1 reads the post half in marg —G2 om from l 2 up to l 2 of 187* Ś1 om l 2 —(l 2) T3 इव (for इति) D1 2 M4 अथ रामाभिषेक त (M4 after corr *sec m*, before corr त्व) श्व कर्तुं कृतनिश्चय]

—^{c}) Ś1 Ñ2 B D6 कैकेय्या, V1 कैकेय्या, D1 2 M4 प्रियायै (for प्रियार्हां) —^{d}) Ś1 D6 तत, Ñ2 V1 B D1 2 नृप, Ct as in text (for वशी) —After 1, B2(up to l 16 only in marg) Dg1 Dt1 Dd1 Dm1 D3–5 7 S ins

187* स कैकेय्या गृह श्रेष्ठ प्रविवेश महायशा ।
पाण्डुराभ्रमिवाकाश राहुयुक्त निशाकर ।
शुकबर्हिणसघुष्ट क्रौञ्चहंसरुतायुतम् ।
वादित्ररवसघुष्ट कुब्जावामनिकायुतम् ।
लतागृहैश्चित्रगृहैश्चम्पकाशोकशोभित ।
दान्तराजतसौवर्णवेदिकाभि समायुतम् ।
सदा पुष्पफलैर्वृक्षैर्वापीभिरुपशोभितम् ।
दान्तराजतसौवर्णै सवृत परमासनै ।
विविधैरन्नपानैश्च भक्ष्यैश्च विविधैरपि ।
उपपन्न महार्हैश्च भूषणैस्त्रिदिवोपमम् ।
तत्प्रविश्य महाराज स्वमन्त पुरमृद्धिमत् ।
न ददर्श प्रिया राजा कैकेयी शयनोत्तमे ।
स कामबलसयुक्तो रत्यर्थी मनुजाधिप ।
अपश्यन्दयिता भार्यां पप्रच्छ विषसाद च ।
न हि तस्य पुरा देवी ता वेलामत्यवर्तत ।
न च राजा गृह शून्य प्रविवेश कदाचन ।
ततो गृहगतो राजा कैकेयीं पर्यपृच्छत ।
यथापुरमविज्ञाय स्वार्थलिप्सुमपण्डिताम् ।
प्रतिहारी त्वथोवाच सत्रस्ता तु कृताञ्जलि ।
देव देवी भृश क्रुद्धा क्रोधागारमभिद्रुता ।
प्रतिहार्या वच श्रुत्वा राजा परमदुर्मना ।
विषसाद पुनर्भूयो लुलितव्याकुलेन्द्रिय ।

[G2 om l 1 and 2 —(l 1) Dm1 transp स and कैकेय्या D7 गृह- (for गृह) G1 श्रेष्ठ, M4 शुभ्र (for श्रेष्ठ) —(l 2) T G1 3 M1–3 Cm Ck पाण्डराभ्रम् (M3 °भ्र), Ct as in text (for पाण्डुराभ्रम्) Dg1 D3–5 7 T1 2 G1 3 M1 3 4 [आ]काशे (for [आ]काश) Dm1 तारा (for राहु-) G1 -मुक्त, M1 4 -मुक्तो (for युक्त) Dt1 G1 निशाकर B2 D3–5 7 यथा चद्र (B2 °न्द्र) तमिस्र(B2 D3 5 सपत्न)हा (for the post half) —(l 3) Dg1 T3 G1 2 M1 3 -बर्हिणसयु(M3 damaged)क्त, Dt1 Dd1 Dm1 -बर्हिसमायुक्त (for -बर्हिणसघुष्ट) B2 -रवैयुत, D5 -रुताकुल (for -रुतायुतम्) —B2 om (hapl) l 4–6 —(l 4) M3 दिवात्र (metathesis) Dd1 T3 M2 (after corr *inf lin pr m* as in text) -वर, D3 एव (for रव-) Dm1 -सघृष्ट Dm1 D4 7 कुब्ज- D3 कुब्जावामनिकायुत, M4 (after corr *pr m*) कुब्जवामनकायुत (for the post half) ❀ Ck आयुत अत्यन्तमपृक्तं ❀ —D3–5 7 om (hapl) l 5 and 6 —(l 5) G3 M2 शोभित —(l 6) Dt1 -सौवर्ण T3 -वेनिकाभि (metathesis), G2 -वेणकाभि (sic), M4 -वेदिकैश्च (for -वेदिकाभि) M3 damaged from भि up to फ in l 7 —(l 7) Dg1 Dt1 Dd1 Dm1 S (M3 om) नित्य- (for सदा) D4 7 युतर् (for -फलैर्) —D3 om (hapl ?) from the post half up to भक्ष्य in l 9 B2 Dg1 D4 5 T1 3 G M वापीभिश्चोप(T1 °श्चापि)शोभित, T2 वापीकूपोप° (for the post half) —(l 8) Dd1 दातै, D5 दान- (sic) (for दान्त) Dg1 सुवृत्त, D4 सभृत (for सवृत) —(l 9) D5 विविधैरलहारैश्च (for the prior half) B2 D3–5 7 बहु (D4 वा बहु [hypm])भिरपि, M4 °स्तथा (for च विविधैरपि) —(l 10) D4 5 T3 उपपन्न, M4 रत्नयुक्तर् (for उपपन्न) B2 महाध्वज् (for महार्हैश्) M3 damaged from र्हा up to ण D3 त्रिदिवोपम —After l 10, T1 2 ins the line of 2 5 23^{cd} —(l 11) Dt1 स (for तत्) D4 7 महातेजा (for महाराज) B2 कैकेयीं परिमार्गय च, D3–5 7 कैकेय्या(D4 °यी) भवनोत्तम (for the post half) —B2 D3–5 7 om l 12 —(l 12) Dt1 प्रिय (for प्रिया) T3 G1 भार्यां (for राजा) —(l 13) D3 4 7 -सतप्ता, D5 -सपन्नो, M2 सवीतो (for -सयुक्तो) B2 कामबाणेन सतप्तो (for the prior half) B2 रत्यर्थी, Dg1 Cm रत्यर्थे, T G3 M2 Cg रत्यर्थं, Ct as in text (for रत्यर्थी) —(l 14) B2 T2 G1 अपश्यद् (sic) M4 विन्यये (for पप्रच्छ)

G 2 9 2 B 2 10 22 L 2 13 2 तां तत्र पतितां भूमौ शयानामतथोचिताम् ।
प्रतप्त इव दुःखेन सोऽपश्यज्जगतीपतिः ॥ २
स वृद्धस्तरुणीं भार्यां प्राणेभ्योऽपि गरीयसीम् ।
अपापः पापसंकल्पां ददर्श धरणीतले ॥ ३
करेणुमिव दिग्धेन विद्धां मृगयुना वने ।
महागज इवारण्ये स्नेहात्परिममर्श ताम् ॥ ४
परिमृज्य च पाणिभ्यामभिसंत्रस्तचेतनः ।
कामी कमलपत्राक्षीमुवाच वनितामिदम् ॥ ५
न तेऽहमभिजानामि क्रोधमात्मनि संश्रितम् ।
देवि केनाभियुक्तासि केन वासि विमानिता ॥ ६

B2 निपसाद च, D5 विपमादत (sic) —(l 15) G2 वेलम् (for वेलाम्) D3 अल्पापवर्तते (hypm), D5 अल्पवर्तते —(l 16) G3 म (for न) B2 G2 M1 हि (for च) —B2 om l 17–22 —(l 17) D4 7 गृहस्थस्ता (for गृहगतो) D3 राः (for राजा) Dt1 परिपृच्छत D3–5 7 पप्रच्छ दयिता शुभा (D3 5 प्रिया) (for the post half) —(l 18) Dm1 (after corr) T1 यथापूर्वम्, D3 °मरम्, D4 5 7 °परम्, all Cs as above (for यथापुरम्) M3 अभिज्ञाय Dm1 अपश्चित (before corr °त) D3–5 7 स्वार्थलिप्सुरपश्चिन (for the post half) —D5 om (hapl ?) l 19 and 20 —(l. 19) G2 M4 प्रतीहारी Dg1 तथोवाच G3 नु (for तु) Dg1 Dm1 T2 3 G1 2 M1 2 4 कृत्(M2 रचि)ताञ्जलि D3 4 7 छत्रधारी ततो वाक्यमब्रवीत्तत्र(D3 °ब्रीत) भीतवत् —(l 20) D3 देवाऽवा (sic), G3 M2 (after corr *sec m* as above) देवि देव (for देव देवी) D3 अतिद्रुता —(l 21) Dt1 T G2 3 M4 प्रतीहार्या, D3 प्रतीधार्या (sic), D4 5 7 छत्रधार्या (for प्रतिहार्या) D3–5 7 तत (for राजा) D4 7 -दुःखित (for -दुर्मना) —D3–5 7 om from l 22 up to 2^{ab} —(l 22) M3 -व्याकुले हृदि (for -व्याकुलेन्द्रिय) M4 लुलितसत्त्वाकुलो हृदि (for the post half)]

2 D3–5 7 om 2^{ab} (cf v l 1) —^{a}) M4 स (for तां) Dg1 Dt1 Dd1 Dm1 S (except M4) तत्र तां (by transp, M3 damaged for तां) D1 2 M4 दयितां, M3 lacuna for पति (for पतितां) B2(m also as in text) तत्र ह्यपचिता भूमौ —^{b}) B3 (also as in text) D2 M4 अयथोचितां (for अतथो°) —Ś1 D3–7 repeat 2^{cd} after l 1 of 189* —^{c}) Ś1 D1–7 M4 (Ś1 D3–7 second time) प्रतप्ता(D6 [before corr]°प्त)म्, D3 (first time) क्षुधार्ते, D4 7 (both first time) प्रवात (for प्रतप्त) M3 om इव (subm) Dg1 शोकेन (for दुःखेन) —^{d}) Ś1 Ñ2 V1 B1–3 D2 6 M4 (Ś1 D6 first time) शुश्राव, Ś1 D3–7(all second time) विज्ञाय, B4 शुशोच, D1 शुश्रुवे, D3–5 7(all first time) बभूव (for सोऽपश्यज्) V1 जगता (for जगती-)

3 ^{a}) Ñ2 समृद्धस्, M4 काकुत्स्थस् (for स वृद्धस्) —^{b}) D2 प्रा भ्यो, M4 प्राणैर् (for प्राणेभ्यो) —After 3^{c}, Ś1 Ñ2 V1 B D1–7 M4 ins

188* उपचक्राम दुःखित ।
सर्वलोकप्रिय मूढामनर्थमपि चात्मन ।
आकाङ्क्षमाणा सम्प्राप्तो.

[(l 1) B4 D1 उपचक्राम V1 चालितु, B1 4 D2 M4 दुःखिता, D3 5 लालयन् (for दुःखित) D4 7 उवाच परिमालयन् —(l 2) Ś1 सर्वलोका प्रिय, V1 B1 सर्वलोकाप्रिया, D1–5 7 सर्वलोकप्रिय (D4 5 7 °या) V1 अनाथाम्, M4 ह्यनर्थे (for अनर्थम्) Ñ2 B D1 2 M4 लोकगर्हित (for अपि चात्मन) —(l 3) V1 सम्प्राप्ता, B1 2 सम्प्राप्त Ś1 D3–7 कर्तुं प्र(D5 प्रि)यतमाना ता]

—^{d}) D4 ददृशे (for ददर्श) Ś1 Ñ2 V1 B D1–7 M4 पतितां भुवि (D3 ...) (for धरणीतले) —After 3, Ś1 Dg1 Dt1 Dd1 Dm1 D3–7 T G M1–3 ins

189* लतामिव विनिष्कृत्ता पतिता देवतामिव ।
किंनरीमिव निर्धूता च्युतामप्सरसं यथा ।
मायामिव परिभ्रष्टा हरिणीमिव संयताम् ।

[(l 1) Dg1 Dm1 विनिष्कृता, D3 विनिष्टुना (sic), D4 7 विनि(D7 °नि)कृत्ता, D5 विनिष्क्राता, T3 निष्कृत्ता (for विनिष्कृत्ता) —After l 1, Ś1 D3–7 repeat 2^{cd} —Ś1 D3–7 om l 2 and 3 —(l 2) T1 damaged for प्सर, M3 अप्सरसा (for °सं) —(l 3) Dg1(before corr as above) T3 G2 M1–3 Cg मालाम्, T1 2 G3 Cgp वामीम्, Cm as above (for मायाम्) Dg1 संजिता, T3 संयुता, Cr m g k t as above]

4 D1 reads 4 and 5 after 8^{ab} —^{a}) D2 रेणुम् Ś1 D6 निप- (for इव) V1 B1 दग्धेन, D1 दग्धं ते, M4 पुखेन (for दिग्धेन) —^{b}) Ś1 Ñ2 V1 B D1–7 M4 व्याधेन दुःखिता, M3 damaged for वने (for मृगयुना वने) —^{c}) D1 2 महानाग, D6 (before corr) महागण, T2 महागजम् (for महागज) Ś1 Ñ2 V1 B D1–7 M4 इवामाद्य, M3 इवारण्य (for °रण्ये) —^{d}) T1 damaged from ह्रा up to मम T2 स्निहो (for स्नेहात्) Ś1 D4 6 7 पस्पर्श तां नृप, Ñ2 V1 B2 4 परिममार्ज(V1 °मर्जि)तां, B3 Dg1 D3 परममर्दिता, Dt1 D1 2 M4 परमदुःखित (Dt1 °तां), Dd1 Dm1 D5 परममर्श(D5 °दर्शि)ना(Dd1 °तां) (for परिममर्श ताम्)

5 ^{a}) Ś1 Ñ2 V1 B D3 5–7 म तां(B4 सुता) त्रि(V1 प्र)मृज्य(D3 7 °श्य), Dt1 परिमृज्य च, D4 परिविमृद्य, M4 परिकृज्य च —^{b}) Ś1 Ñ2 B1 3 4 D3 4 6 7 अति- (for अभि-) Ñ2 B3 -सत्रस्त(B3 °भ्रम)लोचन, V1 -सतस°, B4 -सक्षिप्त° (for -सत्रस्तचेतन) D1 2 M4 ता समुद्विग्नमानस —^{cd}) D1 2 M4 कमलगर्भाभाम् (for कमलपत्राक्षीम्) D1 2 पति(D2 °रि) ता पति (for वनितामिदम्) Ś1 Ñ2 V1 B D3–7 उवाच राजा(V1 सुता) कैकेयीं श्वसतीमुरगी(Ś1 D6 °गीं कुररी)मिव

6 ^{a}) V1 न चेहम् (sic) Dm1 अभिजानासि (sic). —^{b}) Ś1 Ñ2 V1 B3 D4–7 सयत, B1 सगत, D3 सयम (for

यदिदं मम दुःखाय शेषे कल्याणि पांसुषु ।
भूमौ शेषे किमर्थं त्वं मयि कल्याणचेतसि ।
भूतोपहतचित्तेव मम चित्तप्रमाथिनी ॥ ७

सन्ति मे कुशला वैद्या अभितुष्टाश्च सर्वशः ।
सुखितां त्वां करिष्यन्ति व्याधिमाचक्ष्व भामिनि ॥ ८

कस्य वा ते प्रियं कार्यं केन वा विप्रियं कृतम् ।
कः प्रियं लभतामद्य को वा सुमहदप्रियम् ॥ ९

अवध्यो वध्यतां को वा वध्यः को वा विमुच्यताम् ।
दरिद्रः को भवत्वाढ्यो द्रव्यवान्वाप्यकिंचनः ॥ १०

अहं चैव मदीयाश्च सर्वे तव वशानुगाः ।
न ते कंचिदभिप्रायं व्याहन्तुमहमुत्सहे ॥ ११

G 2 9 15
B 2 10 34
L 2 13 17

मर्पितम्) B4 क्रोध मार्गेनि मायतं (sic), D1 2 M4 कोपकारणमगने —After 6^b, D2 ins

191* तन्मा कथय दु खिता ।

—^{c}) Ś1 D6 [अ]भिशस्ता, Ñ2 B1 2 4 T2 3 Cg [अ]भिशप्ता, V1 [अ]भितप्ता, B3 विशप्ता, D3 5 [अ]भिय(D5 °पि)क्ता, G1 वियुक्ता, G3 [अ] -युक्ता (damaged), Cm k t as in text (for [अ]भियुक्ता) —^{d}) B3 (also as in text) Dm1 चासि, D3–5 चापि, D7 T2 वापि (for वासि) Dd1 D4 (*inf lin sec m* also) 5 7 [अ]व(D4 [अ]प)मानिता (for विमानिता) —For 6^{cd}, D1 2 M4 subst 191* and read after 9

7 D2 om 7^{abcd} —^{a}) D1 तत्केन, G1 यदित्थ, G3 यदर्थं, M4 यदेव (for यदिदं) —^{b}) D1 M4 मानिनि (for कल्याणि) Ś1 Ñ2 V1 B D3–7 दु खिता, Dg1 D1 पांशुषु, G2 पांसु च (sic) (for पांसुषु) —^{c}) Ś1 D4 6 7 सति देवि महाराज्ञि, Ñ2 V1 B D3 5 भूमौ पांशुष्वनाथेव(B3 [also] °न), D1 भूमावसस्तृताया त्वा (sic), M4 भूमावसंवृताया त्व —^{d}) B1 3(after corr) 4 D6 (before corr) कल्याणि चेतसि, Dg1 D3 5 T G3 कल्याणि जीव(D3 °वि)ति, Cm k t as in text (for कल्याणचेतसि) D1 M4 कस्मात्त्वमपि दु.खिता —Dg1 om 7^c–8 D3 om (hapl) from चि up to मम in 7^f —^{e}) V1 भूतोपचित- —^{f}) Ś1 Ñ2 V1 Dt1 D2 4 7 T2 3 G3 M4 -प्रमाथिनि

8 V1 Dg1 om 8 (for Dg1 cf v l 7) —^{a}) D4 7 अस्ति (for सन्ति) —^{b}) Dt1 Dd1 Dm1 D7 T1 2 G M1–3 त्वमितुष्टाश्च, D3 5 स्वभितुष्टाश्च, D4 त्वभितुष्टाश्च, T3 स्वभियुक्ताश्च (all to avoid supposed hiatus) (for अभितुष्टाश्च) Ś1 D6 सुविभक्ताश्च वृद्धि(D6 °त्ति)भि , Ñ2 B D1 2 M4 सवि(D2 °नि)भक्ताश्च(B3 [also]°क्ता स्व) वृत्तिभि —After 8^{ab}, D1 reads 4 and 5 —^{c}) Ś1 Ñ2 B2–4 D1 2 6 M4 अगदा(B3 D1 M4 °द), B1 आरोग्य, D5 सुखिनीं (for सुखिता) Ñ2 B1 3 4 D1 2 ते, B2 marg (for त्वा) —^{d}) Ñ2 B D1 2 M4 व्यक्तम् (for व्याधिम्) D1 2 M4 आच्याहि (for आचक्ष्व) Ñ2 B भ.वि(B1 °ा)नि(B4 °नी), Dd1 D6 (before corr) T2 G1 3 भामिनी, M3 damaged (for भामिनि)

9 ^{a}) M3 damaged up to प्रिय Ś1 D6 यस्य (for कस्य) Dg1 चापि, Dt1 वापि, T2 ते वा (by transp), G1 वा वि-, Cr g as in text (for वा ते) D7 श्रै, G1 2 M1 3 कुर्यां, Cv r m as in text (for कार्यं) —^{b}) Ś1 D6 येन, B1 के - (for केन) Ñ2 B1 3 तेप्रिय, V1 तप्रिय (for विप्रिय) —^{c}) D6 लब्धतामद्य (sic) —^{d}) Dg1 reads वा सुमहदप्रियम् in marg B3 (also as in text) [अ]द्य (for सु-) —After 9, Ś1 Ñ2 V1 B D6 ins , while D1 2 M4 subst for 6^{cd}, reading here

191* केन देव्यभिशप्तासि केन वाद्य विमानिता ।,

[B4 D1 6 शस्तासि Ś1 वाद्रि (sic), D1 6 M4 वासि, D2 चासि (for वाद्य)]

while B4 (after 9^{ab}) Dg1 Dt1 Dd1 Dm1 D3–5 7 T G M1–3 Cg t ins after 9

192* मा रोदीर्मा च कार्पीस्त्व देवि सपरिशोषणम् ।

[Dg1 Dt1 Dd1 Dm1 T3 G1 2 M1 Ct रोत्सीर्, M3 रोदीन् (sic), Cg as in text (for रोदीर्) D4 7 कृथाश्च, T2 च कार्पी (sic) (for च कार्पीस्) G1 2 M1 स (for म-) D3 सप्रत्यशोषन]

10 ^{a}) V1 अवद्यो (sic), D2 अवध्या (sic) Ś1 V1 B1 2 4 D1–7 [ऽ]द्य (for वा) —^{b}) Ś1 D6 वद्ध्यो वाद्य, Ñ2 V1 B2 3 वध्यो(V1 वद्धो) वा को (by transp), D3 वध्य कश्चिद्, D4 7 वद्ध कोच, T1 2 G3 को वा वध्यो (by transp), M3 विध्य को वा (for वध्य को वा) V1 विमृज्यता D1 2 M4 वध्यो(D2 वद्धा) वापि प्रमुच्यता —^{c}) Ś1 भवत्वाड्यो, B2 3 Dt1 Dd1 Dm1 T2 3 M2 4 भवेदा(B2 °ड्रा) ढ्यो, D2 3 5 भवत्व(D2 ° ., D5 °त्वा)द्य (for भवत्वाढ्यो) —^{d}) Ś1 Ñ2 V1 B D1 2 6 7 M4 धनवान्, D3 5 कोर्थवान् (for द्रव्यवान्) Ś1 Ñ2 B D1 2 6 M4 कोस्त्वकिं(B1 °क) चन , Dd1 Dm1 T3 M2 कोप्यकिंचन (for वाप्यकिंचन) D4 धनमवाप्य किंचन (sic) —After 10, Ś1 D6 ins , while Ñ2 V1 B D1 2 M4 subst for 11^{ab}

193* यदस्ति मे धन किंचित्तस्य देवि त्वमीश्वरी ।

[D1 2 M4 यन्मास्ति च मे किंचित (for the prior half) B4 देवी M4 ईश्वर]

11 Ś1 D6 read 11^a–12^b after l 4 of 194* —^{a}) Ś1 D4–7 वय, D3 कथ (for अहं) Dt1 D3 5 7 G1 2 M1–3 हि ,D3 [अ]पि (for [ए]व) D3 वा (for the second च) —^{b}) Dg1 वश गता —For 11^{ab}, Ñ2 V1 B D1 2 M4

G 2 9 15 B 2 10 3 L 2 13 18

आत्मनो जीवितेनापि ब्रूहि यन्मनसेच्छसि ।
यावदावर्तते चक्रं तावती मे वसुंधरा ॥ १२
तथोक्ता सा समाश्वस्ता वक्तुकामा तदप्रियम् ।
परिपीडयितुं भूयो भर्तारमुपचक्रमे ॥ १३
नास्मि विप्रकृता देव केनचिन्न विमानिता ।
अभिप्रायस्तु मे कश्चित्तमिच्छामि त्वया कृतम् ॥ १४

subst 193* —B1 M1 om 11^c–12^b B2 om 11^cd Ñ2 V1 B3 4 D1 2 read 11^c–12^b after 195* —^c) Ñ2 V1 B3 4 Dg1 Dd1 Dm1 D1 2 4 5 7 T1 2 G M1–3 किंचिद् (for कच्चिद्) Ñ2 V1 B3 4 D1 2 अभिप्रेत (for अभिप्राय) —^d) Ñ2 V1 B3 4 D1 2 न कर्तुम्, D7 T3 M3 Cr व्याहर्तुम्, Cm g t as in text (for व्याहन्तुम्)

12 B1 M1 om 12^ab (cf v l 11) B2 reads 12^ab after 195* —^a) D5 आत्मना (for °नो) Ñ2 जीवितान (sic), D3 5 निदितेन (for जीवितेन) D3 [ए]व (for [अ]पि) —^b) D5 ब्रूयाद् (for ब्रूहि) Dt1 मनसि स्थित, Dd1 Dm1 मनसीच्छसि, D4 मनसेवसि (sic) (for मनसेच्छसि) Ñ2 V1 B2–4 D1 2 करिष्ये ते प्रिय प्रिये (Ñ2 °य) —After 12^ab, D3–5 7 read 19, while Ś1 Dg1 Dt1 Dd1 Dm1 D6 T G M1–3 read 19 here for the first time, repeating it in its proper place —^c) Ñ2 V1 B प्रवर्तते, D1 2 M1 विचरते (for आवर्तते) —^d) Ñ2 V1 B T2 या (Ñ2 V1 B1 4 ता) वदेषा (T2 °ती वा) (for तावती मे) —After 12, Ś1 Dg1 Dt1 Dd1 Dm1 D3–7 T G M1–3 ins

194* प्राचीना सिन्धुसौवीरा सौराष्ट्रा दक्षिणापथा ।
वङ्गाङ्गमगधा मत्स्या समृद्धा काशिकोसला ।
तत्र जातं बहु द्रव्यं धनधान्यमजाविकम् ।
ततो वृणीष्व कैकेयि यद्यत्त्वं मनसेच्छसि ।
किमायासेन ते भीरु उत्तिष्ठोत्तिष्ठ शोभने । [5]
तत्त्वं मे ब्रूहि कैकेयि यतस्ते भयमागतम् ।
तत्ते व्यपनयिष्यामि नीहारमिव रश्मिवान् ।

[(l 1) Ś1 D4 6 7 प्राच्याश्च, Dt1 Ct द्राविडा, D3 5 प्राच्या स (for प्राचीना) T2 °सौवीर (for °सौवीरा) D3 om सौराष्ट्रा Dg1 M2 दक्षिणाप्र T2 G2 M1 दक्षिणा Dg1 M2 तथा, T2 नृपा (for °पथा) Ś1 D4 6 7 सुरम्या (D4 7 °राष्ट्रा) वतय (D6 वर्तय) स्तथा (for the post half) —(l 2) T3 G1 2 M2 वङ्गाङ्ग (sic) Dd1 °मागधा M3 °वसुधा (for °मगधा) Ś1 D4 6 7 स्फीता, D3 नृपा T1 G3 M2 3 वत्सा G1 2 M1 °[आ]वासा (for मत्स्या) Dg1 D7 °कोसला D4 T3 G1 M3 °काम्पन (D4 °शल, T3 °सुत) —(l 3) D7 द्रव्य Dm1 धन (for तत्र) Dd1 °धान्य° (for °धान्यं) Ś1 D3–7 °जनक, Dd1 °प्रजाविक T2 अजाविक —(l 4) Dd1 Dm1 तत्तद् (for ततो) —D5 G2 M1 om (hapl) from the post half of l 4 up to the prior half of l 6 Ś1 D3 4 6 7 यावत्, T2 यत्र (for यद्यत्) Ś1 D4 6 7 मम हृदये —After l 4, Ś1 D6 read 11^a–12^b —(l 5) Ś1 D3 4 6 7 °ष्ठोत्तिष्ठ D4 भामिनि (for शोभने) —(l 6) Dm1 (before corr) त (for तत्) D5 पुनस्त् (for तत्त्वं) —(l 7) T1 2 G3 तत्तत् (for तत्ते) Ś1 D3–7 [ऽ]हमपनेष्यामि (for व्यपनयिष्यामि) M2 तत्तत्र व्यपनेष्यामि (for the prior half) D6 T3 G1 2 M1 3 रश्मिमान्, T1 2 G3 M2 भास्कर, Cm g t as in text (for रश्मिवान्)]

Ś1 D6 cont, while Ñ2 V1 B D1 2 M4 ins after 12

195* पृथिव्या राजराजोऽस्मि सम्राट् सर्वमहीक्षिताम् ।
पृथिव्या वररत्नाना प्रभुरस्मि शुचिस्मिते ।
इदानि यत्तेऽभिमत कोप मा च कृथा प्रिये ।

[(l 1) Ś1 सर्वराजा, D6 सर्वतेजो (for राजराजो) Ś1 D6 सम्राडस्मि, D1 सम्राड् त्व च, D2 सम्राट् शास्ता (for सम्राट् सर्व-) —(l 2) D6 om (hapl) र in °रत्नाना B1 प्र र् (for प्रभुर्) —(l 3) Ś1 B2 4 D1 2 6 ददामि Ś1 D6 रुचिर (D6 °त), V1 B1 [ऽ]भिलषित (hypm) (for ऽभिमत) Ś1 D6 [ए]व Ñ2 त्व (for च) D1 2 M4 कुरु (for कृथा)]

Thereafter Ñ2 V1 B3 4 D1 2 read 11^c–12^b, B2 reads 12^ab

13 Ś1 reads 13 in marg —^ab) Ś1 यथोक्ता M3 तम् (for सम्-) Ñ2 V1 B D1 2 M4 एवमुक्ता (Ñ2 V1 B1 D2 °क्त्वा) समुत्थाय विव (V1 D1 2 °वि) क्षुर्भूशमप्रिय —^c) D2 पर- (for परि-) ☞ T1 damaged from प in ^d up to घूर्ण in l 50 of App I (No 9) —^d) Ñ2 V1 B D1 2 साभ्यभाषत, M4 इदमब्रवीत (for उपचक्रमे) —Ś1 (marg) ins after 13, Dg1 Dt1 Dd1 Dm1 T (T1 missing) G M1–3 Cg ins after an additional colophon [as अयोध्याकाण्डे दशम सर्ग (G M1 2 conclude with श्री (M2 om) रामाय नम)], while D3–7 subst for 13

196* त मन्मथशराविद्धं कामवेगवशानुगम् ।
उवाच पृथिवीपाल कैकेयी दारुण वच ।

[Cv r m k do not comment Dm1 begins with ॐ —(l 1) D4 7 मत्वा त (for मन्मथ-) D3 °शरभिन्न, T2 °शराविद्ध (for °शराविद्ध)]

14 T1 missing (cf v l 13) —^a) D4 7 ना (D4 न) स्म, G2 नास्ति (for नास्मि) B1 (after corr *sec m*) देव (for देव) —D3 om (hapl) from 14^b up to the prior half of l 3 of 204* —^b) Ś1 B1 Dg1 Dt1 Dd1 Dm1 T2 3 G3 नावमानिता, Ñ2 नावि°, D4 M4 वा वि°, D5 वाव° (for न विमानिता) D7 केन विद्धा विमानिता —^cd) Ś1 D6 [अ]स्ति, D4 7 च (for तु) D4 5 7 कृत त्वया (by transp) Ś1 D6 त मे त्व कर्तुमर्हसि (for ^d) Ñ2 V1 B D1 2 M4 अभीप्सित तु (Ñ2 B3 च) मे किंचिदप्रिय कर्तुमिहा (D1 2 M4 तत्कर्तुम) र्हसि —After 14, D4 5 7 ins l 1–7 of 204*

प्रतिज्ञां प्रतिजानीष्व यदि त्वं कर्तुमिच्छसि ।
अथ तद्व्याहरिष्यामि यदभिप्रार्थितं मया ॥ १५
एवमुक्तस्तया राजा प्रियया स्त्रीवशं गतः ।
तामुवाच महातेजाः कैकेयीमीषदुत्स्मितः ॥ १६
अवलिप्ते न जानासि त्वत्तः प्रियतरो मम ।
मनुजो मनुजव्याघ्राद्रामादन्यो न विद्यते ॥ १७
भद्रे हृदयमप्येतदनुमृश्योद्धरस्व मे ।
एतत्समीक्ष्य कैकेयि ब्रूहि यत्साधु मन्यसे ॥ १८

G 2 9 22
B 2 11 9
L 2 13 31

15 T1 missing (cf v l 13) M4 om 15^{ab} —^{a}) Ś1 Ñ2 V1 B D1 2 6 प्रतिजानी(D1 °ज्ञात)हि ता(B4 भा) वस्व —^{b}) Ś1 D1 2 6 मे कर्तुम्, Ñ2 B3(m also as in V1) तद्दातुम्, V1 B1 2 4 तत्कर्तुम्, T3 त्व कर्मम् (for त्व कर्तुम्) Dg1 G1 अर्हसि, Cm t as in text (for इच्छसि) —^{cd}) Dt1 ते (for तद्) Dt1 Ct यथा (for यद्) Ś1 Ñ2 V1 B D1 2 6 M4 प्रतिज्ञाते ततोह त्वा(Ñ2 त्वा) वरयिष्यामि (M4 याचिष्ये मम) काङ्क्षित —For 15, D3-5 7 subst l 8-9 of 204*

16 T1 missing (cf v l 13) For 16^{ab}, Dg1 Dt1 Dd1 Dm1 T (T1 missing) G M1-3 subst l 12 of 204* read after 25 For 16^{ab}, D3-5 7 subst lines 10-12 of 204* —^{a}) Ñ2 तथा (for तया) —After 16^{ab}, Ś1 Ñ2 V1 B(B4 after 198*) D1 2 6 M4 ins, while Dg1 Dt1 Dd1 Dm1 D3-5 7 T(T1 missing) G M1-3 read l 1 only after 204*

197* प्रविवेश विनाशाय मृग पाशमिवाबुध ।
प्रिया प्रियहिते युक्ता भार्या नित्यमनुव्रताम् ।

[(l 1) Dg1 Dt1 Dd1 Dm1 T3 G M1-3 प्रचक्रम, D3-5 7 प्रचक्रमे(D3 °क्राम) Dg1 Dt1 Dd1 Dm1 D3-5 7 T2 G M1-3 पाश मृग (by transp), D1 °ग पापम्, D2 रागपा° (for मृग पाशम्) Dg1 Dt1 Dd1 Dm1 D3-5 7 T2 3 G M1-3 [आ]त्मन (D4 °ना, D5 °नि) (for [अ]बुध) —(l 2) B1 युक्तो (for युक्ता)]

—^{c}) Dg1 Dt1 Dd1 Dm1 T3 G1 2 M1-3 महाराज, D3-5 7 ततो राजा (for महातेजा) Ś1 Ñ2 V1 B D6 स ता विज्ञाय सतह्रा(Ś1 °द्दृष्टा, Ñ2 °प्राप्ता, V1 B2 4 °तुष्टा, D6 °हृष्टा), D1 2 M4 तामविज्ञाय सहृष्टा(D2 कैकेयीं) —^{d}) Dt1 ईषद्दुत्स्मय, D3-5 7 सस्मित तदा (for ईषदुत्स्मित) Ś1 Ñ2 V1 B D1 2 6 M4 कैकेयीं(D2 सहृष्टा) पार्थिवोब्रवीत —After 16, B4 (after 16^{ab}) D3-5 7 ins

198* करेणोरास्य वदन गृहीत्वा मूर्धजेषु च ।

Thereafter B4 cont 197*

—After 16, Dg1 Dt1 Dd1 Dm1 T (T1 missing) G M1-3 ins

199* कामी हस्तेन सगृह्य मूर्धजेषु शुचिस्मिताम् ।
[Dg1 मविस्मिता, Dt1 Dd1 शुचि स्मिता]

17 T1 missing (cf v l 13) —^{a}) D1 6 अविलु(D6 °लि)प्ते B2 Dg1 (after corr) जानामि, B4 D3-5 7 जानीषे (for जानासि) —^{b}) Dg1 D4 6 7 प्रियतरा, T1 G2 M1 2 Cm g प्रियतमो, T2 प्रियतम, G3 प्रियतमा (for प्रियतरो) ✿ Cr मम त्वत्त प्रियतमा न । स्त्रीणा मध्ये त्वत्त प्रियतमा नास्ति । रामादन्यो मनुज प्रियतमो न विद्यते इति जानासीति सबन्ध ।, Ct स्त्रीणा मध्ये त्वत्त पुसा मध्ये रामादन्य इति योज्यम् । यद्वा रामादन्यस्त्वत्तोऽधिक प्रियतरो न इत्यर्थ । ✿ —^{cd}) Ś1 Ñ2 V1 B D1 2 6 M4 राममेक वर्जयित्वा (for ^{c}) Ś1 Ñ2 V1 B D1 2 6 M4 लोकेष्व (V1 °ष्ट, B1 °त्व)न्यो (for रामादन्यो) B2 (m also) D3-5 7 न कश्चिद्विद्यते राज्ञि रामाच्चैव तथा(D3 °था)त्मजात —After 17, Ś1 B2 (m l 1-4 only) Dg1 Dt1 Dd1 Dm1 D3-7 (D4 l 1 and 2 only) T (T1 missing) G M1-3 ins

200* तेनाजय्येन मुख्येन राघवेण महात्मना ।
शपे ते जीवनार्हेण ब्रूहि यन्मनसेच्छसि ।
य मुहूर्तमपश्यस्तु न जीवेयमहं ध्रुवम् ।
तेन रामेण कैकेयि शपे ब्रूहि किमिच्छसि ।
आत्मना वात्मजैश्चान्यैर्वृणे य मनुजर्षभम् । [5]
तेन रामेण कैकेयि शपे ते वचनक्रियाम् ।

[(l 1) Ś1 D3-7 तेन(D3 न तु) ज्येष्ठेन, B2 तेन पुत्रेण (for तेनाजय्येन) Ś1 D6 रामेण, B2 ज्येष्ठेन (for मुख्येन) —M3 damaged from घ up to त्म Ś1 D6 मुख्येन च (for राघवेण) —(l 2) Ś1 B2 D3-7 शपेय(D3 5 °ते) जीवितार्हेण (for the prior half) G2 न् (for यन्) T2 मनसि (for °सा) B2 Dt1 [इ]च्छिन —After l 2, T2 reads for the second time (cf v l 12) 19^{cd} repeating it in its proper place —(l 3) T3 च (for तु) Ś1 D5 6 शुभे, B2 D7 वरे (for ध्रुवम्) D3 न जीवेय तवानरे (for the post half) —(l 4) B2 Dg1 ते(Dg1 व) देवि (for कैकेयि) B2 मुच विचारणा, Dg1 Dt1 Dd1 Dm1 T2 3 G M1-3 ते वचनक्रिया (for ब्रूहि किमिच्छसि) —Ś1 D6 7 T3 om (hapl) l 5 and 6 —(l 5) Dt1 Dd1 Dm1 (before corr as above) D5 T2 G3 M2 त्र (for वा) D3 5 प्राणैर् (for चान्यैर्) D3 यच्च मे, D5 य व्रजे, G3 वृणोमि, M3 वृ (damaged) (for वृणे य) D3 पुरुषर्षभ —T2 om l 6 —(l 6) Dg1 D3 5 व(D3 ने) देवि (for कैकेयि) Dt1 ब्रूहि यत्साधु मन्यसे (= 18^{d}), D3 5 शपे मुच विचारण (for the post half) The post half = 18^{d} in Dt1]

18 T1 missing (cf v l 13) B2 reads 18^{ab} in marg —^{a}) M3 भूयो (for भद्रे) T2 [ए]तम् (for [ए]तद्) —^{b}) D3 5 अवमृश्य, G3 अनुगृह्य, M3 अनुस्मृत्य (for अनुमृश्य) D3 वदस्व, D5 त्वरस्व (for [उ]द्धरस्व) B2 Dg1 G2 3 M1 2 मा (for मे) —For 18^{ab}, Ś1 Ñ2 V1 B1 3 4 D1 2 6 M4 subst, B2 ins after 18^{ab}

G 2 9 23 B 2 11 10 L 2 13 31 बलमात्मनि पश्यन्ती न मां शङ्कितुमर्हसि ।
करिष्यामि तव प्रीतिं सुकृतेनापि ते शपे ॥ १९
तेन वाक्येन संहृष्टा तमभिप्रायमात्मनः ।
व्याजहार महाघोरमभ्यागतमिवान्तकम् ॥ २०
यथा क्रमेण शपसि वरं मम ददासि च ।
तच्छृण्वन्तु त्रयस्त्रिंशद्देवाः सेन्द्रपुरोगमाः ॥ २१
चन्द्रादित्यौ नभश्चैव ग्रहा रात्र्यहनी दिशः ।
जगच्च पृथिवी चैव सगन्धर्वा सराक्षसा ॥ २२
निशाचराणि भूतानि गृहेषु गृहदेवताः ।
यानि चान्यानि भूतानि जानीयुर्भाषितं तव ॥ २३
सत्यसंधो महातेजा धर्मज्ञः सुसमाहितः ।
वरं मम ददात्येष तन्मे शृण्वन्तु देवताः ॥ २४

201* दृष्ट्वा ते परिकृत्येद प्रिये हृदयमप्यहम् ।

[Ñ2 ददान Ñ2 परिकृत्यैव, V1 परिहृत्यैव, B1 2 परिहृत्ये॰, B1 (m also as in V1) निनिकृत्येद (for परिकृत्येद). Ś1 D6 दद्यामह प्रिये सर्वं (for the prior half) Ś1 D6 स्त्रीय, V1 प्रिय (for प्रिये) M4 आत्मनो हृदय प्रिय (for the post half)]

—c) Ś1 Ñ2 V1 B3 (m also as in B1) D1 2 6 M4 अत, B1 2 4 तत (for एतत्) V1 ममा त्व, D3–5 7 परीक्ष्य (for समीक्ष्य) —After c, G1 erroneously repeats the post half of l 6 of 200* and then repeats 18abc —d) B3 तत् (for यत्) Dt1 शपे ते वचनक्रिया

19 T1 missing (cf v l 13) Ś1 Dg1 Dt1 Dd1 Dm1 D6 T (T1 missing) G M1–3 read 19 for the first time after 12ab repeating it here, while D3–5 7 read after 12ab —a) V1 वरम् Ś1 Dg1 Dt1 Dd1 Dm1 T (T1 missing) G M1–3 (all first time) जानती, D3–7 (D6 first time) जानामि, T2 (second time) जानाति (for पश्यन्ती) —b) M3 (second time) damaged for न Ś1 D6 (both first time, second time as in B1) मा कि मतुम्, Ñ2 B4 Dg1 Dt1 Dd1 Dm1 (Dg1 Dt1 Dd1 Dm1 second time) विशङ्कितुम्, V1 विकल्पितुम्, B1–3 D1 2 M4 वि(M4 [after corr inf lin] च)काङ्क्षितुम् (for मा शङ्कितुम्) —c) M2 (first time) करिष्यति —d) D3 सुकृ तेन (sic) (for सुकृतेन) Ś1 Ñ2 V1 B D1 2 6 (Ś1 D6 second time) M4 [आ]त्मन (for [अ]पि ते) D2 शप (for शपे) —After 19, Dg1 Dt1 Dd1 Dm1 T (T1 missing) G M1–3 ins, while D3–5 7 subst for 20

202* सा तदर्थमना देवी तमभिप्रायमागतम् ।
निर्माध्यस्थ्याच्च हर्षाच्च बभाषे दुर्वचं वच ।

[(l 1) D3 त मे- (for तदर्थ-) Dd1 Dm1 T2 G1 (before corr as above) M3 तद् (for तम्) D3–5 7 आत्मन (for आगतम्) —(l 2) T2 3 M2 निर्मध्यस्था(M2 °स्थ्या)च् Dd1 Dm1 G3 प्रहर्षाच् (for च हर्षाच्) D3–5 7 निर्(D3 वि)रोरव तदा राजो(D3 °जे) (for the prior half) T3 न भाषे (sic) (for बभाषे) Dg1 दु मह (for दुर्वचं)]

20 T1 missing (cf v l 13) —a) Ś1 Ñ2 V1 B1 2 4 D1 2 6 M4 तुष्टा तेनाथ(Ś1 D6 °नैव, D2 °नापि) वाक्येन, B3 सतुष्टा तेन वाक्येन —b) Ś1 Ñ2 V1 B D6 हृष्टाति(Ś1 D6 °पि, V1 °प्रे)प्रियम्, D1 2 M4 दृष्टाभिप्रायम् (for तमभिप्रायम्) Ś1 आत्मना —d) Ś1 Ñ2 V1 B D1 2 6 M4 कैकेयी भृशमप्रिय —For 20, D3–5 7 subst 202* —After 20, D1 2 M4 ins

203* वरये त्वा महीपाल प्रणिपत्य प्रसाद्य च ।
क्षतिसृष्ट त्वयव प्रागवरद्वयमभीप्सितम् ।

[(l 1) M4 त्वा (for त्वा) D2 पत्य (for प्रणिपत्य) —(l 2) M4 त्वयैव प्रागवरद्वयमीप्सित]

21 T1 missing (cf v l 13) D1 2 M4 om 21–25 B2 reads 21–23b in marg —a) V1 तथा (for यथा) Ś1 धर्मं च, Ñ2 B1 3(B3 [m also] तु धर्मं) 4 धर्मेण, V1 च मत्य, B2 रामेण, D3 4 च(D3 तु) राम, D5 7 तु(D7 च) रामे, D6 च धर्मं (for क्रमेण) Ś1 Ñ2 V1 B Dg1 (before corr as in text) Dt1 D3–7 शपसे (for शपसि) —b) Ś1 Ñ2 V1 B D3–7 सत्य (for मम) M2 चेत् (for च) —c) D7 श्रुण्वत्वत्र Ś1 Ñ2 V1 B D3–7 समागम्य (for त्रयस्त्रिंशद्) —d) Ś1 Ñ2 V1 B D3–7 शक्र- (D6 °क्रो [sic]), Dg1 चेन्द्र, T2 मरुदि- (for सेन्द्र-)

22 T1 missing (cf v l 13) D1 2 M4 om 22 B2 reads 22 in marg (for both cf v l 21) —a) V1 चन्द्रादित्य- Ś1 Ñ2 V1 B D3–7 ग्रहाश्च, D3 गृहो (for नभश्च) —b) Ś1 Ñ2 V1 B D3 4 6 7 नभो, D5 ततो (for ग्रहा) V1 पुन, B2 दिव (for दिश) —c) D4 7 यक्षा (D7 °क्षा)श्च (for जगच्च) Dg1 Dt1 Dd1 Dm1 T2 3 G1 2 M1 3 [इ]त्य (for [ए]व) —d) Dt1 T2 G3 M3 सगधर्वा Dt1 Dd1 Dm1 T2 G3 M3 (Dd1 Dm1 inf lin) सराक्षमा Ś1 Ñ2 V1 B D3–7 सह गधर्वराक्षसैः (D3 °सा), Dg1 गधर्वाप्सरराक्षमा

23 T1 missing (cf v l 13) D1 2 M4 om 23, B2 reads 23ab in marg (for both cf v l 21). —a) B2 (before corr) सर्वाणि (for भूतानि) —b) T2 3 G ग्र(T2 गृ)हेषु ग्रहदेवता —c) Dg1 या (for यानि) Ś1 Ñ2 B D6 सत्त्वानि, V1 सर्वाणि (for भूतानि) —d) M1 भावित (for भाषित) Ñ2 V1 B D4 5 7 वच, D3 मम (for तव)

24 T1 missing (cf v l 13) D1 2 M4 om 24 (cf v l 21) —a) Ś1 D6 महाभागो, Ñ2 V1 B D3–5 7

इति देवी महेष्वासं परिगृह्याभिशस्य च ।
ततः परमुवाचेदं वरदं काममोहितम् ॥ २५
वरौ यौ मे त्वया देव तदा दत्तौ महीपते ।
तौ तावदहमद्यैव वक्ष्यामि शृणु मे वचः ॥ २६
अभिषेकसमारम्भो राघवस्योपकल्पितः ।
अनेनैवाभिषेकेण भरतो मेऽभिषिच्यताम् ॥ २७

G 2 9 31
B 2 11 25
L 2 13 40

महाराजो(Ñ2 B1 4 D4 7 °जा, D5 °ज्ञो) (for महातेजा) —[b]) Dt1 मत्यवाञ्शुचि (for सुसमाहित) —[c]) D6 वरौ Ñ2 V1 B D6 मह्य (for मम) D. ददाति (for ददाति) Ś1 D6 [ए]त, D7 [ए]त्र (for [ए]प) —[d]) Dt1 Dd1 Dm1 सर्वे, D4 ° यन्मे, D5 त मे, G3 त च (for तन्मे) Ś1 शृण्वत, Ñ2 B D4–7 शृणुत (for शृण्वन्तु)

25 T1 missing (cf v l 13) D1 2 M4 om 25 (cf v l 21) —[b]) D3 G2 प्रति- (for परि-) Ś1 D4 6 7 [अ]भिगम्य, Ñ2 B1–3 D5 [अ]भि(B1 °ति)शा(Ñ2 श)प्य, V1 [अ]भिधाय, B4 [अ]भिवाद्य, D3 [अ]भिशाम्य (for [अ]भिशस्य) D4 7 वै (for च) —[c]) Ś1 D6 वाचम्, Ñ2 B वच, V1 D3–5 7 वरम् (V1 °र) (for परम्) V1 ययाच (for उवाच) D6 [इ]म (for [इ]द) —[d]) B2 reads द काममोहित in marg B4 रूपिण (for -मोहितम्) —After 25, Dg1 Dt1 Dd1 Dm1 T (T1 missing) G M1–3 (all subst line 12 for 16[ab]) ins, D3(after 14[a])-5 7 ins l 1–7 after 14 and subst lines 8–12 for 15[a]–16[b]

204* स्मर राजन्पुरा वृत्त तस्मिन्देवासुरे रणे ।
तत्र त्वा च्यावयच्छत्रुस्तव जीवितमन्तरा ।
तत्र चापि मया देव यस्त्व समभिरक्षित ।
यस्त्वा रुधिरदिग्धाङ्ग तस्मिन्देवासुरे रणे ।
तत्र चोवाच तच्छक्र राक्षसा समभिद्रुता ।
विद्यया च मया ध्वस्ता महावीर्यपराक्रमा ।
जाग्रत्या यतमानायास्ततो मे प्रददौ वरौ ।
तौ तु दत्तौ वरौ देव निक्षेपौ मृगयाम्यहम् ।
तवैव पृथिवीपाल सकाशे सत्यसगर ।
तत्प्रतिश्रुत्य धर्मेण न चेद्दास्यसि मे वरम् ।
अद्यैव हि प्रहास्यामि जीवित त्वद्विमानिता ।
वाङ्मात्रेण तदा राजा कैकेय्या स्ववशे कृत ।

[D3 om up to the prior half of l 3 (cf v l 14) —(l 2) Dg1 T2 3 G M1–3 चाच्या(G1 °प्या)वयच्छत्रुम्, D4 7 चोवाच तच्छक्र(D4 °क्त)स्त्र, D5 प्रोवाच यच्छक्रम —(l 3) D4 5 7 मास (for चापि) M2 तत्रापि च (by transp) D3–5 7 सम्यक्त्व परिरक्षित (D3 °ता) (for the post half) —Dg1 Dt1 Dd1 Dm1 T (T1 missing) G M1–3 om l 4–6 —(l 4) D3 5 7 राक्षसा समभिद्रुता (for the post half) —D3 om l 5–6 —(l 7) T3 जाग्रती D3–5 7 यत्न(D3 °त्त)मास्थाय (for यतमानायास्) Dd1 Dm1 T2 G1 M3 प्र(Dd1 M3 प्रा)ददा(M3 °दा) वरौ D3 त्व वरप्रद, D4 5 7 त्व वरावदा, M2 प्रददौ वर (for प्रददौ वरौ) —(l 8) Dt1 Dd1 Dm1 दत्ता च (for तु दत्तौ) Dg1 T2 3 G M1 2 निक्षेप, M3 निक्षिप्तौ (for निक्षेपौ) D3–5 7 निक्षेप गमितो मया (for the post half) —(l 9) Dg1 तवैव, G2 M1 तावेव M3 पा in पृथिवीपाल damaged G3 स काले (for सकाशे) Dt1 रघुनदन, D7 G3 °सगर (for सत्यसगर) —(l 10) Dt1 त्वद्, D3–5 7 तौ D3–5 7 भद्र ते (for धर्मेण) Dd1 Dm1 वरौ (for वरम्) D3–5 7 दातुमर्हसि मे वरा (for the post half) —(l 11) D3 न, T2 च, T3 G1 तु (for हि) Dd1 Dm1 M2 (Dm1 M2 after corr inf lin pr m as above) प्रदास्यामि, D3 महिष्यामि, D4 5 7 न शक्ष्यामि (for प्रहास्यामि) D3 जीवितु त्वधिमानिना, D4 5 7 जीवित तद्विनाकृता(D5 °मानिता) (for the post half) —(l 12) D3–5 7 ततो (for तदा) Dg1 D3–5 7 T2 स(Dg1 T2 स्व) वशी-, Dt1 स्ववश (for स्ववशे)]

—After 204*, Dg1 Dt1 Dd1 Dm1 D3–5 7 T (T1 missing) G M1–3 ins line 1 of 197* and thereafter Dg1 Dt1 Dd1 Dm1 T (T1 missing) G M1–3 repeat 25[cd]

26 T1 missing (cf v l 13) —[a]) Dt1 देयौ, Dd1 Dm1 D5 7 T3 G M1 3 मे यौ (by transp), T2 मे य (sic) (for यौ मे) —[b]) D4 7 पुरा (for तदा) —For 26, Ś1 Ñ2 V1 B D1 2 4 6 M4 subst

205* पुरा देवासुरे युद्धे वरौ दत्तौ त्वया नृप ।
परितुष्टेन चेदानीं तो वरौ त्व प्रयच्छ मे ।

[(l 1) D1 2 वरो या दो(D2 मे), M4 वरे ये ते (for वरा दत्तो) —(l 2) Ś1 D6 मे देव, V1 D1 2 M4 मे(D1 2 वे) दत्ता (M4 °त्ते), B1 यो°°, B2 मय्येता, B4 मे यौ तो (for चेदानीं) Ñ2 V1 B1 वरौ ता(Ñ2 m) त्व (by transp), B4 वरौ या तो, M4 ते वरेच (for तो वरा त्व) D1 2 ता वरावच(D2 च राघव) यच्छ मे (for the post half)]

27 T1 missing (cf v l 13) —[a]) Dg1 T2 G° योभिषेक —[d]) D3–5 7 हि (for मे) Dm1 [ऽ]भिषेच्यता —For 27, Ś1 Ñ2 V1 B D1 2 6 M4 subst, while D3–5 7 subst l 1 only for 27[ab]

206* यस्त्वयाद्य समारम्भो राम प्रति समाहित ।
अनेनाप्नोतु भरतो यौवराज्याभिषेचनम् ।

[(l 1) D1 यत्, D2 तत् (for यस्) D3–5 7 रामे समुपकल्पित (for the post half) —(l 2) B3 अनेनाप्नोति, D1 2 एतदाप्नोति(D1 °तु), M4 एनमाप्नोतु (for अनेनाप्नोतु) B1 यो राज्ये]

—After 27, Dg1 Dt1 Dd1 Dm1 D3–5 7 T (T1 missing) G M1–3 ins

G 2 9 32 B 2 11 26 L 2 13 41

नव पञ्च च वर्षाणि दण्डकारण्यमाश्रितः ।
चीराजिनजटाधारी रामो भवतु तापसः ॥ २८

भरतो भजतामद्य यौवराज्यमकण्टकम् ।
अद्य चैव हि पश्येयं प्रयान्तं राघवं वने ॥ २९

ततः श्रुत्वा महाराजः कैकेय्या दारुणं वचः ।
व्यथितो विक्लवश्चैव व्याघ्रीं दृष्ट्वा यथा मृगः ॥ ३०

असंवृतायामासीनो जगत्यां दीर्घमुच्छ्वसन् ।
अहो धिगिति सामर्षो वाचमुक्त्वा नराधिपः ।
मोहमापेदिवान्भूयः शोकोपहतचेतनः ॥ ३१

207* यो द्वितीयो वरो देव दत्त प्रीतेन मे त्वया ।
तदा देवासुरे युद्धे तस्य कालोऽयमागत ।

[(l 1) D3 य (sic) (for यो) T2 द्वितीयो मे D4 प्रति न (sic) (for प्रीतेन) Dm1 तया (for त्वया) —(l. 2) D3 (before corr) तया, D4 7 पुरा (for तदा) D5 वृत्ते (for युद्धे)]

28 T1 missing (cf v l 13) —ᶜ) G1 चिराजन (sic), M2 वराजिन- Dt1 Dd1 Dm1 -धरो धीरो (for -जटाधारी) D3-5 7 वसतु (for भवतु) —For 28, Ś1 Ñ2 V1 B D1 2 6 M4 subst

208* वन गच्छतु रामश्च चीराजिनजटाधर ।
नव पञ्च च वर्षाणि वरावेतौ वृणोम्यहम् ।

[(l 1) D1 2 M4 रामोद्य —(l 2) M4 वरे एने (for वरावेतौ) B4 ~ मह, D2 वराम्यह (for वृणोम्यहम्)]

29 T1 missing (cf v l 13) —ᵃ) D3 5 लभतामद्य, D4 7 लभता राज्य (for भजतामद्य) —After 29^{ab}, Dg1 Dt1 Dd1 Dm1 T(T1 missing) G M1-3 ins , while D3-5 7 subst for 29^{cd}

209* एष मे परम रामो दत्तमेव वर वृणे ।

[G1 (after corr as above) भरत (for परम) Dm1 T2 M3 एव (for एष) D3-5 7 दत्तावेव (D3 5 °व) वरो वृणे (for the post half)]

—ᶜ) Dg1 पश्यामि (for पश्येय) —ᵈ) Dg1 Dm1 T2 3 G M1-3 (M2 before corr as in text) वन (for वने) —D3-5 7 cont after 209*, Dg1 Dt1 Dd1 Dm1 T (T1 missing) G M1-3 ins after 29

210* स राजराजो भव सत्यसगर
कुल च शील च हि जन्म रक्ष च ।
परत्र वासे हि वदन्त्यनुत्तम
तपोधना सत्यवचो हित नृणाम् ।

[(l 1) D3 म तो दद त्व, D4 5 7 जनो हि राजन् (for स राजराजो) Dm1 सत्त्व (for सत्य-) —(l 2) Dg1 reads च शील in marg D4 7 transp च and हि D3 5 रक्ष जन्म च (by transp), D4 7 रक्ष चात्मन —(l 3) D3-5 7 वास (for वासे) —(l 4) D3-5 7 नृपो (D3 नरो)त्तम (for हित नृणाम)]
—Thereafter Dg1 Dt1 Dd1 Dm1 D3-5 7 T (T1 missing) G M1-3 read an additional colophon [*Kānda name* Dd1 Dm1 D3 om T3 युद्ध° —*Sarga name* D3 कैकेयीवरप्रार्थनो, D4 7 वरप्रयाचनो, D5 कैकेयीवरप्रदानो —*Sarga no* (figures, words or both) D3 om Dg1 Dt1 Dd1 Dm1 T (T1 missing) G M1-3 11, D4 7 13, D5 15 —After colophon, T3 concludes with श्रीरामचन्द्राय नम , G M1 2 श्रीरामाय नम] —For 29, Ś1 Ñ2 V1 B D1 2 6 M4 (*inf lin scr m*) subst

211* यदि सत्यप्रतिज्ञोऽसि वन राम विसर्जय ।
भरत चापि मे पुत्र यौवराज्येऽभिषेचय ।

[(l 1) B4 D1 2 M4 वने (for वन) D1 2 निवासय, M4 निवेशय —(l 2) D1 2 transp मे and पुत्र]

30 T1 missing (cf v l 13) Dm1 begins with ॐ —ᵃ) D3 T2 G3 महातेजा (for महाराज) —After 30^{ab}, Dg1 Dt1 Dd1 Dm1 D3-5 7 T (T1 missing) G M1-3 ins

212* चिन्तामभिसमापेदे मुहूर्तं प्रतताप च ।
किं नु मेऽयं दिवास्वप्नश्चित्तमोहोऽपि वा मम ।
अथ भूतोपसर्गोऽथ मनसो वाप्युपद्रव ।
इति सचिन्त्य तद्राजा नाध्यगच्छत्तदा सुखम् ।
पपात सहसा भूमौ निश्चेष्टश्चाभवत्तदा । [5]
प्रतिलभ्य तत सज्ञा कैकेयीवाक्यताडित ।

[(l 1) Dd1 D3 T2 M2 अपि (for अभि-) D3-5 7 म (D3 म)तप्रश्नाभवत्क्षणात् (D4 7 °ण) (for the post half) —(l 2) D4 5 तु (for नु) Dg1 Dm1 D4 T2 3 G M1-3 यदि वा (for ऽय दिवा) G2 स्वप्नेश (sic) (for -स्वप्नश) D3-5 7 पित्त (D3 °त्त)जो वाप्युपद्रव (for the post half) —D3 om l 3 —(l 3) D5 -सर्गा वा, D7 सगाद्वा Dg1 Dt1 Dd1 Dm1 T (T1 missing) G M1-3 अनुभूतोपसर्गो वा (for the prior half) D5 G3 मानसो (for मनसो) D4 7 [उ]पप्लव —(l 4) D3-5 7 सचिंतयन् (for सचिन्त्य तद्) Dg1 D3 5 [अ]भ्यगच्छत् (for [अ]ध्य°) —Dg1 Dt1 Dd1 Dm1 T2 3 G M1-3 om l 5 —(l 5) D3 सहजा (sic) —(l 6) T2 G3 चिरात् (for तत) Dg1 T3 कैकेय्या (for कैकेयी-) Dg1 -पीडित , Dt1 G1 तापित (for -ताडित)]

—ᶜ) Dg1 D3 5 विह्वलश् (for विक्लवश्) G1 [आ]सीद् (for [ए]व) —ᵈ) D4 M3 व्याघ्र (for व्याघ्रीं) Dt1 मृगा (for मृग) —For 30, Ś1 Ñ2 V1 B D1 2 6 M4 subst

213* एभिर्वचोभि कैकेय्या हृदि विद्धो नराधिप ।
भयेन हृष्टरोमाभूद्व्याघ्रीं दृष्ट्वा यथा मृग ।

[(l 1) D1 पतिर् (for एभिर्) —(l 2) Ñ2 [अ]थ (for [अ]भूद्) M4 व्याघ्र (for व्याघ्रीं) Ś1 D6 वीक्ष्य (for दृष्ट्वा)]

31 T1 missing (cf v l 13) —ᵃ) D3 असभूतायाम्,

चिरेण तु नृपः संज्ञां प्रतिलभ्य सुदुःखितः ।
कैकेयीमब्रवीत्क्रुद्धः प्रदहन्निव चक्षुषा ॥ ३२
नृशंसे दुष्टचारित्रे कुलस्यास्य विनाशिनि ।
किं कृतं तव रामेण पापे पापं मयापि वा ॥ ३३
सदा ते जननीतुल्यां वृत्तिं वहति राघवः ।
तस्यैव त्वमनर्थाय किंनिमित्तमिहोद्यता ॥ ३४
त्वं मयात्मविनाशाय भवनं स्वं प्रवेशिता ।
अविज्ञानान्नृपसुता व्याली तीक्ष्णविषा यथा ॥ ३५
जीवलोको यदा सर्वो रामस्याह गुणस्तवम् ।
अपराधं कमुद्दिश्य त्यक्ष्यामीष्टमहं सुतम् ॥ ३६
कौसल्यां वा सुमित्रां वा त्यजेयमपि वा श्रियम् ।
जीवितं वात्मनो रामं न त्वेव पितृवत्सलम् ॥ ३७
परा भवति मे प्रीतिर्दृष्ट्वा तनयमग्रजम् ।
अपश्यतस्तु मे रामं नष्टा भवति चेतना ॥ ३८ G 2 9 43 B 2 12 13 L 2 13 52

T3 असवृतानाम् (sic) (for असवृतायाम्) —b) M3 दीर्घमुष्णं विनिश्वसन् —For 31ab, Ś1 Ñ2 V1 B D1 2 6 M4 subst

214* सीदन्दु खेन महता स तेनाभिहतो नृप ।
असवृताया विमना भूतावुपविवेश ह ।

[(l 1) D1 M4 सीदमानश्च, D2 सीदन्मनश्च, D6 आसीद्दु° (for सीदन्दु खेन) V1 B4 महतेन, D1 2 दु खेन, M4 शोकेन (for स तेन) B4 D1 2 हृदि (for नृप) —(l 2) D2 ह (for स)]

—After 31ab, Dg1 Dt1 Dd1 Dm1 D3-5 7 T (T1 missing) G M1-3 ins

215* मण्डले पन्नगो रुद्धो मन्त्रैरिव महाविष ।
उच्छ्वास्य वक्त्र नृपति कैकेयीमिदमब्रवीत् ।

[(l 1) T3 G1 पन्नगे —Dg1 Dt1 Dd1 Dm1 T2 3 G M1-3 om l 2 —(l 2) D4 7 नृपतिर्वक्त्र (by transp)]

—c) G1 M3 अति- (for इति) Ś1 Ñ2 B M4 चाप्युक्त्वा, V1 चेत्युक्त्वा, D1 6 चाप्युक्तो, D2 वाप्युक्ता, D3 मामर्षो, D5 सामर्ष (for सामर्षो) —d) Ś1 Ñ2 V1 B D1 2 6 M4 शोकार्त पतित क्षितौ —e) Ś1 Ñ2 V1 B D1 2 6 M4 अभ्यागमन् (B4 D6 °गत) Ś1 Ñ2 V1 B D1 3-7 M4 मत्तो (D3-5 7 °त्त), D2 भत्तो (for भृत्य) —f) D5 चेतस (for चेतन) Ś1 Ñ2 V1 B D1 2 6 M4 वाक्छल्या (V1 वा°, D2 वाप्फल्या) भिहतो हृदि

32 T1 missing (cf v l 13) —a) Ś1 Ñ2 V1 B D1 2 6 M4 च पुन D5 च नृप, T3 तु तत (for तु नृप) —b) Ś1 Ñ2 V1 B D1 2 6 M4 [आ]त्मानम (for सुदु खित) —c) Ñ2 अब्रुवत् (sic), G2 मन्त्रवित् (for अब्रवीत्) D1 2 M4 वाक्य, D3 5 क्रुद्धा (for क्रुद्ध) —d) G1 2 M1 3 चेतसा (for चक्षुषा) Ś1 Ñ2 V1 B D3 5 6 दु खशोक (B4 °मोह) समन्वित, Dt1 निर्दहन्निव तेजसा, D1 शोकाग्निप्रतिदीपित, D2 शोकेन प्रतिदीपिता, D4 7 शोकदु ख समाहत, M4 शोकाग्निपरिपीडित

33 T1 missing (cf v l 13) —a) Ś1 V1 B1 2 4 D1 2 6 M4 भ्रष्ट- (for दुष्ट) Ś1 -चरित्रे (for -चारित्रे) —b) V1 प्रमाथिनि, B4 Dg1 Dd1 D2 T2 G1 3 M1 विनाशिनी (for विनाशिनि) —d) Ś1 Ñ2 V1 B D4 6 7 म (B3 ˘) या वा पापदर्शने (D4 7 °र्शिनि), D1 2 M4 मया वा (D1 चा) घोरमप्रिय, D3 5 या च पापप्रदर्शिनी

34 T1 missing (cf v l 13) —ab) Dt1 G2 M2 3 यदा (for सदा) Ś1 Ñ2 V1 B D1 2 6 M4 यद् (B4 °दा) तीत्या (D1 जननी चा) पि कौसल्या रामस्त्वामनुवर्तते (D1 2 M4 °स्त्वा बहु मन्यते), D3-5 7 मातृतुल्या सदा वृत्ति वर्तते तव राघव —c) Dg1 Dd1 D4 7 M1 3 [ए]व, D1 2 M4 [अ]द्य (for [ए]व) —d) D1 5 अहोद्यता (for इहोद्यता) Ś1 Ñ2 V1 B D6 किमर्थं वै समुद्य (V1 °त्र) ता, T2 काळरात्रिरिवागता

35 T1 missing (cf v l 13) —a) V1 D2 मम, G2 मना (sic) (for मया) Dd1 Dm1 T2 3 G3 M2 3 -विनाशार्थं, D1 -विनाशाया (sic), G2 -विनाशया (sic) (for विनाशाय) —b) Ś1 B1 Dg1 D6 G3 म (B4 स्व) प्रवेशिता, V1 Dt1 Dd1 Dm1 M3 स्व निवेशिता —c) T3 M2 अविज्ञाता (for अविज्ञानान्) Ś1 Ñ2 V1 B D1-7 M4 राजपुत्रीति (D1-3 M4 °त्य, D4 °त्व, D7 °त्त्व) विज्ञाय (D1-5 7 M4 °ता) —d) T3 G M व्याळी B2 तीक्ष्णा, B4 भिक्ष्णा (sic), M4 भीम- (for तीक्ष्ण) Ñ2 V1 B D1 2 M1 महाविषा (B4 °भिया)

36 T1 missing (cf v l 13) —a) D3-5 M3 जीवलोके Ś1 Dm1 D4 7 T2 यथा, V1 D5 G3 सदा (for यदा) D3 5 M3 सर्वे, D4 7 लोको (D7 °के) (for सर्वो) —b) D° 6 (after corr marg as in text) M3 [आ]हुर् (for [आ]ह) Ś1 Ñ2 V1 B D1 2 6 M4 रक्तो रामगुणैरय —c) G3 M2 किम् (for कम्) —d) D2 सुत, G1 महत (for अह) D4 ˘ इष्टतम D2 कथ, G2 शुभ (for सुतम्)

37 T1 missing (cf v l 13) M4 om (hapl) 37 and 38 —a) Ś1 om (subm), Dt1 D2 च (for first वा) Dt1 D2 च (for second वा) —b) D7 च (for वा) D3 स्त्रिय, D5 स्वय (for श्रियम्) —c) Ś1 Ñ2 B1 2 Dt1 Dd1 Dm1 D1-7 च (for वा) Dt1 Dd1 [आ]त्मना (for [आ]त्मनो) —d) Ś1 D6 नैवासु, Ñ2 B1 2 Dm1 M3 न त्वेव, V1 B3 न त्वेन, D4 7 अतीव (for न त्वेव) D1 7 मम वल्लभ, T2 °र (for पितृवत्सलम्)

38 T1 missing (cf v l 13) M4 om 38 (cf v l 37) —a) D7 (before corr) भवति, T3 भवतु (for भवति) D4 7 (before corr) मा (for मे) —b) D3-5 7 आत्मन (for अग्रजम्) —d) Dg1 Dt1 Dd1 Dm1 T2 3 G

G 2 9 44 B 2 12 13 L 2 13 52 तिष्ठेल्लोको विना सूर्यं सस्यं वा सलिलं विना ।
न तु रामं विना देहे तिष्ठेत्तु मम जीवितम् ॥ ३९
तदलं त्यज्यतामेष निश्चयः पापनिश्चये ।
अपि ते चरणौ मूर्ध्ना स्पृशाम्येष प्रसीद मे ॥ ४०

स भूमिपालो विलपन्ननाथव-
त्स्त्रिया गृहीतो हृदयेऽतिमात्रया ।
पपात देव्याश्चरणौ प्रसारिता-
वुभावसंस्पृश्य यथातुरस्तथा ॥ ४१

इति श्रीरामायणे अयोध्याकाण्डे दशमः सर्गः ॥ १० ॥

M1 3 नष्ट भवति चेतन —For 38, Ś1 Ñ2 V1 B D1 2 6 subst, while D3–5 7 subst l 2 only for 38[cd]

216* नन्दामि हि प्रिय पुत्र दृष्ट्वा राममहं सदा ।
अपश्यत क्षण त मे न भवेदिह चेतना ।

[(l 1) B4 D1 ह, D2 [ह]ह (for हि) —(l 2) V1 क्षणस् (for क्षण) Ñ2 B1 3 तन्मे°, D3 मन्ये, D4 5 7 य(D5 यन्) मे (for त मे) Ś1 इति (for इह) D1 2 अपश्यमान (D2 °ना [sic]) केकेयी न जीवेय प्रिय सुत]

39 T1 missing (cf v l 13) —[a]) D1 6(before corr) लोके Ś1 Ñ2 V1 B D2 6 M4 भूमि (for सूर्यं) —[b]) D1 2 अब्ज (for सस्य) Ś1 च (for वा) —[c]) Ś1 D6 च, V1 हि (for तु) Ś1 D3–7 लोके, B4 देह, Dg1(before corr as in text) T2 देवि (for देहे) —[d]) D3–5 7 हि (for तु) Dm1 जीवन (for जीवितम्) Ś1 D6 तिष्ठेत्प्राणो मम क्षण, Ñ2 V1 B D1 2 M4 तिष्ठेयुरसवो मम —After 39, B2 (marg) ins l 1–5 of the passage given in App I (No 9), while D1 ins

217* रामस्य वनवासाय यस्ते मत्प्रियमस्थित ।

40 T1 missing (cf v l 13) —[a]) M3 तम् Ś1 D6 अथ, B4 अद्य (for अल) D2 5 6 T2 त्यजताम् B4 D5 एव (for एष) V1 तत्र परित्यजतामेष (hypm) —[b]) D2 निश्चय (for निश्चय) —[d]) B4 शयामि (for स्पृशामि) D2 [ए]व, G1 [ए]व (for [ए]ष) —After 40, Ś1 Ñ2 V1 B D1 2 6 M4 ins

218* स तेन वाक्येन महाप्रियेण
घोरेण राजा हृदये गृहीत ।
अहृष्टरूपो विमना बभूव
व्याघ्राभिपन्नो बलवानिवोक्षा ।

[(l 1) Ś1 D6 सत्येन D1 2 M4 भृशाप्रियेण —(l 2) V1 सत्येन (for घोरेण) B1 [अ]निविद्ध (for गृहीत) —(l 3) Ñ2 B3 आकृष्टरूपो°, D1 2 महृष्टरोमा, D6 असृष्ट° (for अहृष्टरूपो) D1 2 M4 बलवद् (for विमना) —(l 4) D1 व्याघ्रावपन्नो V1 damaged for बलवानिवोक्षा]

—After 40, Ñ1 (lines 112, 113, 147–151, 179 as in Ñ2 and other lines are omitted up to रामेण in line 169) Dg1 Dt1 Dd1 Dm1 D3–5 7 T G M1–3 ins the passage given in App I (No 9)

41 [a]) Ś1 Ñ2 V1 B D1 2 6 लोकस्य नाथोपि(V1 °थ) विपन्ननाथो, M4 लोकस्य नाथो वचनेन तेन. —[b]) Ś1 Ñ2 V1 B D1 2 6 M4 भृश, Ñ1 D3–5 7 तया(Ñ1 °द्वा) (for स्त्रिया) B4 om , T1 M4 हीतो (for गृहीतो) Ś1 Ñ2 V1 B D1 2 6 M4 तथैव(Ś1 °थैव, Ñ2 B3 °थैव), Ñ1 भृश तया, D3–5 7 नृशमया (for ऽतिमात्रया) —[c]) Ś1 Ñ V1 B D1–7 M4 भूमौ (for देव्याश्) D4 7 चरणैर्, G2 चरणा (sic) (for चरणौ). Ś1 Ñ2 V1 D6 परिस्पृशन्, Ñ1 अध कृतान्, D1 2 M4 उपस्पृशन्, D3 5 अधो ह(D5 °हृ)तो, D4 7 विना यथा (for प्रसारिताव्) —[d]) Dt1 D3–5 7 M2 उ(D4 7 प्र)भावसप्राप्य (for उभावसस्पृश्य) M1(before corr, after corr sec m as in text) तदा (for तथा) Ś1 Ñ2 V1 B D1 2 6 M4 प्रसीद देवीति वचोभ्यु(B1 4 °ह्यु)दीरयन्(B4 °यत्) —After 41, Ñ1 D3–5 7 ins, while Dg1 Dt1 Dd1 Dm1 T G M1–3 ins after 2 11 15

219* इतीव राज्ञो व्यथितस्य सा निशा
जगाम घोरा श्वसतो यशस्विन ।
विबोध्यमान प्रतिबोधनात्तदा
निवारयामास च राजसत्तम ।

[(l 1) Ñ1 अतीव, D5 इत्येव Ñ1 तस्य सा (for सा निशा). —(l 2) Ñ1 निशा जगाम, Dg1 Dt1 Dd1 Dm1 T G M1–3 जगाम घोर (for जगाम घोरा) Dg1 श्वमतो Dg1 Dt1 Dd1 Dm1 T G M1–3 मनस्विन —(l 3) Dg1 विबुध्यमान Ñ1 प्रतिबोधवत्, D3 5 प्रतिबोधनास(D5 °नास्), G2 M1 पटहादिकस् (for प्रतिबोधनात्) —(l 4) Ñ1 म, D7 स्व- (for च) D5 -ममत (for -सत्तम)]

Colophon Dg1 ins पीतांबरे after Kāṇḍa name. —*Sarga name* Ś1 Ñ2 B2–4 वराभियाचन, Ñ1 D3–5 7 दशरथप्र(Ñ1 D3 °रि)लापो, V1 रामाभिषेचन, B1 वरायाचनं, D1 कैकेय्या वराभियाचनो, D2 वराभिवचनो, D6 वचभिवाचन —*Sarga no* (figures, words or both) Ñ1 B1 2 4 D3 6 om Ś1 13, Ñ2 B3 8, V1 9, Dg1 Dt1 Dd1 Dm1 D2 T G M1 2 12, D1 65, D4 7 14, D5 17, M4 10 (as in text) M3 इति श्रीमद् .. (moth eaten). —After colophon, D6 G M1 2 conclude with श्री (D6 om)रामाय नम

११

अतदर्हं महाराजं शयानमतथोचितम् ।
ययातिमिव पुण्यान्ते देवलोकात्परिच्युतम् ॥ १
अनर्थरूपा सिद्धार्था *अभीता भयदर्शिनी ।
पुनराकारयामास तमेव वरमङ्गना ॥ २
त्वं कत्थसे महाराज सत्यवादी दृढव्रतः ।
मम चेमं वरं कस्माद्विधारयितुमिच्छसि ॥ ३

एवमुक्तस्तु कैकेय्या राजा दशरथस्तदा ।
प्रत्युवाच ततः क्रुद्धो मुहूर्तं विह्वलन्निव ॥ ४
मृते मयि गते रामे वनं मनुजपुंगवे ।
हन्तानार्ये ममामित्रे सकामा सुखिनी भव ॥ ५
कैकेय्याः प्रियकामेन रामः प्रव्राजितो वनम् ।
यदि सत्यं ब्रवीम्येतत्तदसत्यं भविष्यति ।
अकीर्तिरतुला लोके ध्रुवः परिभवश्च मे ॥ ६

G 2 10 15
B 2 13 14
L 2 14 14

11

1 Before 1, Dm1 ins ॐ —a) B1 अतदह (sic), Dm1 (before corr) अतदर्हं-, M4 अनारत (for अतदर्हं) D3 4 7 महाप्राज्ञ, D5 °प्रज्ञ (for महाराज) —b) Ś1 Ñ V1 B D1 2 6 M4 पतितं पादयोरपि, D3 5 शयानं सुसुखोचितं, D4 7 शयानमसुखोदय, M3 शयानमथतो(metathesis)चित —c) B4 ययातिर् (for °तिम्) —d) G2 देविलोकात् (sic) Dm1 (before corr) परित्युत, D3 महीगत, D4 7 इहागत, D6 मही गत (for परिच्युतम्)

16 ^a) Ś1 B2 D1 6 अह, V1 M4 स्वय, D2 अथ (for अय) M4 भवता (for वचनात्) —^b) V2 सुखम्; B1 स्वयम् (*inf lin* as in text) (for सुखम्) Ś1 Ñ V1 B1–3 D1 2 4–7 M4 नृप (for अहम्) —^c) Dg1 Dm1 T2 G3 सप्रतिबुध्यस्व (G3 °स्य), Cm °बुद्धस्य as in text ❀ Ck

G 2 12 18
B 2 15 18
L 2 16 19

इत्युक्त्वान्तःपुरद्वारमाजगाम पुराणवित् ।
आशीर्भिर्गुणयुक्ताभिरभितुष्टाव राघवम् ॥ १७

गता भगवती रात्रिरहः शिवमुपस्थितम् ।
बुध्यस्व नृपशार्दूल कुरु कार्यमनन्तरम् ॥ १८

सम्प्रति उदयसमये सर्वथा बुद्धस्य प्रबुद्धस्य । ❀ —^{d}) Dt1 चानागमन- —For 16^{cd}, Ś1 Ñ V1 B1-3 D1 2 4-7 M4 subst

276* राजसदर्शनार्थित्वमयमावेदयामि व ।

[V1 स्वयम्, D1 सम्यग, M4 अहम् (for अयम्) D1 ह (for व)]

17 After 17^{ab}, Dg1 Dt1 Dd1 Dm1 T G M1 2 ins

277* सदासक्त च तद्वेश्म सुमन्त्र प्रविवेश ह ।
तुष्टावास्य तदा वश प्रविश्य स विशापते ।
शयनीय नरेन्द्रस्य तदासाद्य व्यतिष्ठत ।
सोऽत्यासाद्य तु तद्वेश्म तिरस्करणिमन्तरा ।

[(l 1) M2 तदा (for सदा) T1 damaged from च up to विशांप in l 2 G2 हा (for ह) —(l 2) T3 तथा (for तदा) Dd1 Dm1 सुमन्त्र (for प्रविश्य) —(l 3) G3 यशनीय (metathesis) T1 ननेंद्रस्य (sic) Dt1 व्यतिष्ठद् (subm), M1 प्रतिष्ठ(before corr °ष्ठि)त —(l 4) T3 नरेंद्रस्य (for तु तद्वेश्म) Dg1 तिरस्कारिणिम्, Dm1 तिरस्कारणिम् (before corr as in Dg1), Cm तिरस्करिणीम्, Cg as above]

—^{c}) Dt1 आर्शीभिर्, G2 आशीर्पिर् (both corrupt) (for आशीर्भिर्) Ś1 D4-7 वाग्भि परमपु(Ś1 D6 °जु)ष्टाभिर् —^{d}) Ś1 D4-7 पार्थिव —For 17, Ñ V1 B D1 2 M4 subst, Ś1 D4-7 subst l 1 and 2 only for 17^{ab}

278* इत्युक्त्वान्त पुरद्वारमागाद्य त्वरयान्वित ।
सुमन्त्रो नृपतिं सुप्त मत्वा भूयो व्यबोधयत् ।
ब्रह्मेन्द्राग्निपुरोगास्त्वा विबुधा विबुधोपमम् ।
शिवाय बोधयन्त्यद्य कल्याणाय च मानद ।

[(l 1) V1 तत्पुर- (for [अ]न्त पुर-) Ś1 D4 6 7 स नरेश्वर, B1 स त्वरान्वित, D1 2 5 M4 स पुनस्त्वरन् —(l 2) Ñ1 V1 D7 [अ]भ्यनोधयत्, D1 ह्यबोधयत्, D5 व्यवोधयन् (sic), M4 [अ]प्यबोधयत् (for व्यबोधयत्) —(l 3) V1 महागाग्नि, M4 महेंद्राग्नि (for ब्रह्मेन्द्राग्नि-) D2 पुरोगस् (sic) Ñ2 B1 3 D2 विबुधोपम, D1 विबुधोपमा —(l 4) Ñ1 reads the prior half in marg M4 आशिषा (for शिवाय) B1 बोधयत्य॰, B2 बोधयत्यद्य B2 मानस (sic) (for मानद)]

—After 17, Ś1 Dg1 Dt1 Dd1 Dm1 D4-7 T G M1 2 ins

279* सोमसूर्यौ च काकुत्स्थ शिववैश्रवणावपि ।
वरुणश्चाग्निरिन्द्रश्च विजय प्रदिशन्तु ते ।

[See lines 56 and 57 of App I (No 10) —(l 1) Ś1 D5 6 सोम सूर्यश्च (for सोमसूर्यौ च) M2 शशि- (for शिव-) Ś1 D6 शिवो वैश्रवणोपि च (for the post' half). —(l 2) Ś1 D4-7 अनिलश्च (for वरुणश्च) T1 damaged from second श्च up to नृ in 18^{c} Dd1 प्रदेशतु (sic).]
—Dd1 Dm1 T3 cont

280* यथा साङ्गाश्च वेदा वै ब्रह्माण बोधयन्ति ते ।
तथा त्वा धीर बोध्यामि उत्तिष्ठ पुरुषर्षभ ।

[(l 2) T3 वीर (for धीर) and ह्युत्तिष्ठ [to avoid hiatus] (for उत्तिष्ठ)]

18 See lines 58 and 59 of App. I (No 10). —^{cd}) Dt1 Dd1 Dm1 T3 G1 M2 नरशार्दूल, T2 राज° (for नृप°) ❀ Cv नृपशार्दूल इति सम्यक्पाठ । ❀ Ś1 D4-7 प्रतिबुध्यस्व नृपते सर्वकल्याणसिद्धये —For 18, Ñ V1 B1-3 D1 2 M4 subst, while Ś1 D4 5 7 ins after 282*, D6 ins after 283*

281* गता निशेय कच्चित्ते सुखेन नृपसत्तम ।
प्रतिबुध्यस्व राजर्षे धर्मकृत्यानि कारय ।

[D6 reads l 1 in marg —(l 1) Ś1 स्वापने (for सुखेन) —(l 2) D6 राजेंद्र (for राजर्षे) Ś1 D4-7 राजकार्याणि, D1 2 राजकृत्यानि (for धर्मकृत्यानि)]

—After 18, Ś1 D4-7 ins

282* इन्द्रमस्या हि वेलायामभितुष्टाव मातलि ।
सोऽजयद्दानवान्सर्वांस्तथा त्वा बोधयाम्यहम् ।
वेदा साङ्गा सर्विगणा यथा कमलसभवम् ।
ब्रह्माण बोधयन्त्यद्य तथा त्वा बोधयाम्यहम् ।
आदित्य सह चन्द्रेण यथा भूतधरामिमाम् ।
बोधयत्यद्य पृथिवीं तथा त्वा बोधयाम्यहम् ।
उत्तिष्ठ त्व महाभाग कृतकौतुकमङ्गल ।
विरोचमानो वपुषा मेरोरिव दिवाकर ।
इद तिष्ठति रामस्य सर्वमेवाभिषेचने ।
पौरजानपदश्रेणी नैगमश्चागतो जन ।
अग्नौ वसिष्ठो भगवान्ब्राह्मणै सह तिष्ठति ।
क्षिप्रमाज्ञाप्यता राजन्राघवस्याभिषेचनम् ।
यथा ह्यगोपा पशवो यथा सैन्यमनायकम् ।
एव प्रजा प्रजापाल भवन्ति ह्यनधिष्ठिता ।
चन्द्रहीना यथा रात्रि सूर्यहीनमहो यथा ।
तथा भवति तद्राष्ट्र यत्र राजा न दृश्यते ।

[Cf lines 48-55 and 60-66 of App I (No 10). —(l 1) Ś1 अतितुष्टाव —(l 2) D7 यानवान् —(l 3) Ś1 देवा D4 7 ऋषिगणा —(l 4) D5 (before corr पृथिवीं) पृथिव्यां (for तथा त्वा) —(l 6) Ś1 बोधयत्यद्य —(l 7) D5 महाबाहो —(l 9) D4 5 7 [अ]भिषेचन —(l 12) Ś1 शीघ्र (for राजन्) —(l 14) Ś1 भवता (for भवन्ति). —(l. 16) D4 5 7 यदा (for यत्र)]

ब्राह्मणा बलमुख्याश्च नैगमाश्चागता नृप ।
दर्शनं प्रतिकाङ्क्षन्ते प्रतिबुध्यस्व राघव ॥ १९
स्तुवन्तं तं तदा सूतं सुमन्त्रं मन्त्रकोविदम् ।
प्रतिबुध्य ततो राजा इदं वचनमब्रवीत् ॥ २०
न चैव संप्रसुप्तोऽहमानयेहाशु राघवम् ।
इति राजा दशरथः सूतं तत्रान्वशात्पुनः ॥ २१

G 2 12 23
B 2 15 27
L 2 16 42

—D6 cont (followed by 281*)

283* यथा नायकहीनैव मुक्तानामावली यथा ।

19 [b]) Dg1 Dd1 Dm1 G1 [आ]गता नृपा, Dt1 [आ]गतास्त्विह —For 19[ab], Ñ V1 B1–3 D1 2 M4 subst, while Ś1 D4–7 ins, after 281*

284* पुरोधसो मन्त्रिणश्च पौरजानपदा जना ।

[M4 पुरोधसा D6 पौरा (for पौर-) Ś1 D1 4–7 M4 तथा, D2 तदा (for जना)]

—[c]) Ś1 Ñ V1 B1–3 Dg1 D1 2 4–7 ते(D2 ना) भिकाङ्क्षति, Dt1 Dd1 Dm1 T3 G1 2 M1 4 तेभिकाङ्क्षते, G3 प्रतिकाङ्क्षंति (for प्रतिकाङ्क्षन्ते) —[d]) Ś1 D4–7 M4 प्रतिबोद्धु (D6 °ध) त्वमर्हसि, Ñ V1 B1–3 D1 2 प्रतिबोद्धु (D2 °ध्योद्धु) नृपार्हसि

20 [a]) T1 स्तुवत तु, G1 M1 सस्तुवत, G2 M2 त (G2 *mf lin* also स) स्तुवत (by transp) (for स्तुवन्त त) —[c]) Dg1 T2 3 G2 M1 2 तदा (for ततो) T1 damaged from राजा up to यदस्यभि in l 1 of 288* —For 20, Ś1 D4–7 subst

285* त तथा पुनरभ्येत्य बोधयन्तं नराधिपम् ।
अभ्यपूर्यत शोकेन भूय एव नराधिप ।
स तु शोकाभिसंतप्तः सुमन्त्रमिदमब्रवीत् ।,

[(l 1) D4 7 वृथा (for तथा) Ś1 D6 पुनरेत्यात्र D6 बोधयान —(l 2) See line 68 of App I (No 10) Ś1 D6 अन्व (D6 °भ्य) भूयत D6 महीपति (for नराधिप)]

—Thereafter all cont

286* शोकरक्तेक्षणो धीमान्वीक्ष्य वाचावधारितम् ।
सूत किं हतरूप मामस्तुत्य स्तोतुमिच्छसि ।
वाक्यैस्तावत्तु मर्माणि मम भूयो निकृन्तसि ।
सुमन्त्र कुत्सना श्रुत्वा दृष्ट्वा दीन च पार्थिवम् ।
प्रगृहीताञ्जलिस्तत्र तत किंचिदपाक्रमत् ।
तत पापसमाचारा कैकेयी पार्थिव वच ।
उवाच परम तीक्ष्ण वाक्यज्ञा वाक्यमूर्जितम् ।
किमेतद्वद मे वाक्य राजस्त्व प्राकृतो यथा ।
राममाहूय विस्रब्ध वनमद्य विसर्जय ।
यदि सत्यप्रतिज्ञोऽसि कुरुष्व वचन मम ।
नाय कालो हि शोकस्य न मोहस्योपपद्यते ।
प्रव्राज्य राम भरत यौवराज्येऽभिषिच्य च ।
नि सपत्ना च मा कृत्वा भवाद्य विगतज्वर ।
स तुन्नो वाक्यखड्गेन प्रतोदेनेव सद्वव ।
तत स राजा सूत त पुनरेवाभ्यभाषत ।

[(l 1) Ś1 -[ई]क्षण D5 उदीक्ष्यवाच धार्मिक (for the post half) —(l 2) D5 मन किं मा हतप्रायमस्तुत स्तोतुमिच्छसि —(l 3) Cf 252* D4 5 7 तु ध्ववु (for तावत्तु) D5 कर्माणि (for ममाणि) —For lines 4-5 Cf 2 12 19 —(l 4) D5 कुत्सित (for कुत्सना) Ś1 D6 कृत्वा (for श्रुत्वा) —(l 5) D4 7 सूत, D5 भूत (for तत) —For lines 6-8 Cf 2 12 12 and 13[ab] —(l 9) Cf line 2 of 244* D5 7 विश्रब्ध —For lines 10 and 11 Cf 245*]

—For 20, Ñ V1 B1–3 D1 2 M4 subst

287* त तथा पुनरभ्येत्य बोधयन्त नराधिपम् ।
सुमन्त्र तु स्वसतप्तस्त्वरमाण इवाब्रवीत् ।

[B2 reads l 1 in margin —(l 1) Ñ V1 B1 2 D1 नराधिप —(l 2) V1 त्वमवमान [hypm] इव, B1 2 त्वरयन्निदम्, D1 2 त्वरमाणमिव]

—After 20, Dg1 Dt1 Dd1 Dm1 T G M1 2 ins

288* राममानय सूतेति यदस्यभिहितो मया ।
किमिद कारण येन ममाज्ञा प्रतिहन्यते ।

[T1 damaged up to भि in l 1 (cf v l 20) —(l 1) Dg1 Dm1 G1 यदम्याभिहितो, M2 °भिहतो Cm k t*p* [s]नया (for मया) G2 M1 यन्म्यभिहतस्त्वया (for the post half) ꣾ Ct यन्म्यभिहितोऽनया इति पाठेऽनयेत्युपलक्षण मया चेत्यर्थ । ꣾ —(l 2) T1 2 M2 मदाज्ञा, Cm ममाज्ञा (as above) Dt1 T3 प्रतिवाह्यते]

21 [a]) Dt1 [ए]व (for [ए]व) M3 resumes from प्तोऽह (cf v l 1) —[b]) Dg1 आनयत्वाशु —[c]) T1 रा· —For 21, Ś1 D4–7 subst

289* सुमन्त्र नैव सुप्तोऽस्मि राम त्व क्षिप्रमानय ।
सत्यपाशनिबद्धोऽस्मि सूत स्भ्रान्तमानस ।
राम द्रष्टुमिहेच्छामि त च शीघ्रमिहानय ।

[(l 1) D5 नाव- (for नव) D4 7 त्व राम (by transp) D4 शीघ्रम् (for क्षिप्रम्) For lines 2 and 3 Cf 247* D6 reads lines 2–3 in marg —(l 2) D5 -विनद्धो D4 5 7 विभ्रान्त- —(l 3) D5 उपानय (for इहानय)]

—D4 5 7 cont

290* श्रुत्वा तु राज्ञो वचन कैकेयी तमथाब्रवीत् ।
सुमन्त्र राजवचनाद्गच्छ त्व राममानय ।
यथा च शीघ्रमेवैति तथा सत्वरयस्व तम् ।

whereas Ñ V1 B1–3 D1 2 M4 subst for 21

291* सुमन्त्र नावसुप्तोऽस्मि राम त्व क्षिप्रमानय ।
इति राजा दशरथ सुमन्त्र पुनरन्वशात् ।

G 2 12 24
B 2 15 27
L 2 16 43

स राजवचनं श्रुत्वा शिरसा प्रतिपूज्य तम् ।
निर्जगाम नृपावासान्मन्यमानः प्रियं महत् ॥ २२
प्रपन्नो राजमार्गं च पताकाध्वजशोभितम् ।
स सूतस्तत्र शुश्राव रामाधिकरणाः कथाः ॥ २३

ततो ददर्श रुचिरं कैलाससदृशप्रभम् ।
रामवेश्म सुमन्त्रस्तु शक्रवेश्मसमप्रभम् ॥ २४
महाकपाटपिहितं वितर्दिशतशोभितम् ।
काञ्चनप्रतिमैकाग्रं मणिविद्रुमतोरणम् ॥ २५

[(l 1) Ñ2 B3 नव (for नाग-) —(l 2) Ñ2 B1 3 पुनरन्वगात्]

22 ᵃ) G3 damaged from जवचन —T1 damaged from प्रतिपूज्य in ᵇ up to 22ᵈ —For 22, Ś1 Ñ V1 B1-3 D1 2 4-7 M4 subst

292* सुमन्त्रस्तद्वचः श्रुत्वा सभार्यस्य नृपस्य ह ।
निर्जगाम सुसंभ्रान्तस्तस्माद्राजनिवेशनात् ।

[(l 1) D4-7 तु (for तद्) Ñ V1 B1-3 D1 2 M4 इति राज्ञो वचः श्रुत्वा सुमन्त्र (Ñ2 °न्त्र) स्त्वरितस्तदा (D1 2 स त्वरन्निव, M4 प्रहसन्निव) —(l 2) Ñ B1-3 D6 [अ]थ, V1 [अ]नु- (for सु-) D1 दारान् (sic) (for राज)]

23 ᵃ) Dg1 Dm1 प्रसन्नो —After 23ᵃᵇ, Dg1 Dt1 Dd1 Dm1 T G M1 2 ins

293* हृष्टः प्रमुदितः सूतो जगामाशु विलोकयन् ।

[G1 2 हृष्ट Dg1 प्रहृष्टमुदित]

—ᶜ) T1 ह्रस्व (for शुश्राव) —For 23, Ś1 Ñ V1 B1-3 D1 2 4-7 M4 subst

294* निष्क्रम्य चैव त्वरितः राममानयितुं तदा ।
रथेन जविताश्वेन राममानयितुं गृहात् ।
जनौघं राजमार्गस्थं प्रतिव्यूहमुपागतम् ।
शृण्वन्नाचः कथयतां रामाभ्युदयसंयुताः ।

[(l 1) D5 (before corr) निष्क्राम्य Ñ V1 B1-3 D1 2 त्वरितो, M4 परितो (for त्वरितः) —(l 2) Ñ V1 B3 जव (V1 °वि)नाश्वेन D4 7 गृह (for गृहात्) Ñ V1 B1-3 D1 2 5 M4 ययौ रामगृहं प्रति (V1 पुनः) (for the post half) —(l 3) D7 राजमार्गस्य (for °स्थं) Ñ V1 B2 3 D2 4 5 7 M4 प्रतिव्यूहन् Ñ1 V1 B1 2 उपागत, D4 7 उपागमत् (for °तम्) —(l 4) Ñ B3 D5 रामाभिस्तव-, V1 B1 D1 2 4 7 रामाभिषेव- (for °भ्युदय-) Ñ V1 B1-3 D1 2 -महिता (for -संयुता)]

—Thereafter all cont

295* अद्य रामो यौवराज्यं लप्स्यते पितुराज्ञया ।
अहो महोत्सवोऽस्माकमद्याय भविता पुरे ।
मृदुर्दान्तः परहितः सर्वभूतहिते रतः ।
युवराजः किलास्माकमद्य रामो भविष्यति ।
अहोऽस्यानुगृहीता स्मो यः साधुजनवत्सलः । [5]
पालयिष्यति नो रामः पिता पुत्रानिवौरसान् ।
इति तत्र जनौघस्य शृण्वन्वाचः समन्ततः ।
ययौ सुमन्त्रस्त्वरितो राममानयितुं गृहात् ।

[(l 1) Ś1 D4 6 7 रामोऽद्य युवराजत्वं (for the prior half). Ś1 प्राप्स्यति, D1 2 4-7 M4 प्राप्स्यते (for लप्स्यते) Ś1 D4-7 नृप (D4 भूप, D5 राज) शासनात्, D1 पुनराज्ञया —(l 2) B2 अद्याह; D1 अत्राय, D2 यथाय, D4 7 अन्याय (for अद्याय) M4 [ऽ]द्याय-मस्माकं (by transp) D5 महान् (for पुरे) —M4 om lines 3-4 Ś1 D4 6 7 om l 3 and read l 5 after l 2. —(l 3) Ñ1 परहित D1 2 5 -मनोहर (for -हिते रत) Ñ2 repeats the post half of l 3 —(l 4) D1 2 युवराजा (sic) Ś1 D4-7 [अ]द्यायम् (for [अ]स्माकम्) Ś1 D1 2 4-7 अस्माकं (D1 2 अद्याय, D6 यद्रामो) भविता पुरे (for the post half) —(l 5) Ś1 D4 6 7 अद्याहो (by transp), B2 अहो हि (for अहोऽद्य) Ś1 V1 D4 6 7 स्म (for स्मो) —(l 6) D4 राजा (for राम) —(l 7) Ś1 D4-7 तस्य (for तत्र). M4 वचः शृण्वन् (for शृण्वन्वाचः) —(l 8) D1 गृहान्, D4 7 गृह (for गृहात्)]

—After 23, Dg1 Dt1 Dd1 Dm1 T G M1-3 ins

296* अभिषेचनसंयुक्ता सर्वलोकस्य हृष्टवत् ।

[T1 damaged after सर्व up to रामवेश्म in 24ᶜ G2 damaged for लोकस्य T3 सन्निधौ (for हृष्टवत्)]

24 T1 damaged up to राजवेश्म in 24ᶜ (cf v.l 23) Ñ V1 B1-3 D1 2 M4 om 24 D6 reads 24 in marg —ᵇ) D6 कैलाश- D5 T2 G M1-3 -शिखरप्रभ (for -सदृशप्रभम्) —T3 om 24ᶜᵈ —ᵈ) Ś1 D4-7 त्रिविष्टप- (for शक्रवेश्म-) —After 24, G2 reads l 1 of 300* repeating it in its proper place

25 D1 2 M4 om 25 G2 om (hapl ? Cf l 1 of 300*) 25ᵃᵇ Ñ V1 B1-3 transp 25 and 26 —ᵃ) Ś1 B3 D6 T G1 3 M1 2 Cr m g -कवाट-, Ct as in text (for कपाट-) B2 -[अ]पिहित, D4 T2 G3 Cm g विहित; T1 विवृत, Cr t as in text (for -पिहित) —ᵇ) Ñ1 वितर्दिगत-, Ñ2 वितर्दीशत-, V1 विनिर्दिशित-, B2 वडभीशत- (for वितर्दिशत-) D4 दीप्तमेरुसमप्रभ —D4 om 25ᶜᵈ. —ᶜ) Dg1 काचन Ñ -प्रतिमैकाग्र्य, V1 -द्युतिमेकाश्व, B1 -प्रतिमैकाग्र्य, D5 °मौकाग्र, T2 °कैकाग्र (for °मैकाग्र). —ᵈ) B1 2 -प्रतिम- (for -विद्रुम-) —After 25, Ñ V1 B1-3 ins, while D1 2 M4 ins after 26

297* रामोपवाह्यं च गजं मुक्ताहारविभूषितम् ।
कृताङ्गदं चन्दनेन ददर्शैरावतोपमम् ।

[(l 1) B1 3 रामोपराज्य —(l 2) Ñ B2 3 M4 कृतागद-, V1 कृतागचदनेनैव (for the prior half)]

शारदाभ्रघनप्रख्यं दीप्तं मेरुगुहोपमम् ।
दामभिर्वरमाल्यानां सुमहद्भिरलंकृतम् ॥ २६
स वाजियुक्तेन रथेन सारथि-
र्नराकुलं राजकुलं विलोकयन् ।
ततः समासाद्य महाधनं मह-
त्प्रहृष्टरोमा स बभूव सारथिः ॥ २७

G 2 12 35
B 2 15 41
L 2 16 55

26 Ñ V1 B1-3 transp 25 and 26 D4 om 26^{ab} —^{a}) D7 (before corr शारदाभ्र-) शरदभ्र- —^{b}) Dg1 Dm1 D7 दीप्त- (for दीप्तं) Dt1 Dd1 Dm1 मेरुगुहासम, D5 °गृहोपम, D7 °समप्रभ Ś1 D6 दीप्तपावकस(D6 °सु)प्रभ —For 26^{ab}, Ñ V1 B1-3 D1 2 M4 subst

298* अथाससाद रामस्य स वेश्माभ्रचयोपमम् ।

[Ñ2 -[अ]रुचयोपम, D2 [अ]त्र चयोपम]

—^{c}) Dg1 Dt1 Dd1 Dm1 S(except M4)मणिभिर् (for दामभिर्) T1 damaged from वर up to राकी in l 1 of 300* Ś1 D4 6 7 T3 वरमाल्यै(T3 °लै)श्च Ñ B1-3 D1 2 M4 प्र(B1 2 प्रा)लबै (B3 °ब) समलकृत, V1 प्रलबै समतत· (subm) —After 26, M2 ins

299* ततो ददर्श माल्यैश्च सुमहद्भिरलकृतम् ।

—M2 cont, Ś1 Dg1 Dt1 Dd1 Dm1 D4-7 T G M1 3 ins after 26

300* मुक्तामणिभिराकीर्णं चन्दनागरुधूपितम् ।
गन्धान्मनोज्ञान्विसृजद्दार्दुर शिखर यथा ।
सारसैश्च मयूरैश्च विनदद्भिर्विराजितम् ।
सुकृतेहामृगाकीर्णमुत्कीर्णं भक्तिभिस्तथा ।
मनश्चक्षुश्च भूतानामाददत्तिग्मतेजसा । [5]
चन्द्रभास्करसकाश कुबेरभवनोपमम् ।
महेन्द्रधामप्रतिम नानापक्षिसमाकुलम् ।
मेरुशृङ्गसम सूतो रामवेश्म ददर्श ह ।
उपस्थितै समाकीर्णं जनैरञ्जलिकारिभि ।
उपादाय समाक्रान्तैस्तदा जानपदैर्जनै । [10]
रामाभिषेकसुमुखैरुन्मुखै समलकृतम् ।
महामेघसमप्रख्यमुदग्र सुविराजितम् ।
नानारत्नसमाकीर्णं कुब्जकैरपि चावृतम् ।

[G2 reads l 1 after 24 repeating it here —(l 1) T1 damaged up to राकी Dg1 Dt1 Dd1 Dm1 -[अ]ग(Dt1 °गु)रुभूषित Ś1 D4-7 जनैरजलिसहितै (D4 7 °हते) (for the post half) —(l 2) T3 गुडान् (for गन्धान्) Dd1 Dm1 विदधद् (for विसृजद्) Dm1 (before corr) T2 3 G1 3 M2 3 Cv r दार्दर, T1 G2 दा(G2 द)र्दार, Cg t as above, Ck दर्दर (for दादुर) Ś1 D4-7 यथा मलयपवत (D5 °त) (for the post half) —(l 3) G2 सारसैश्च Dd1 विनदद्भिर्, D7 (before corr) विनवद्भिर् (for विनदद्भिर्) —Ś1 D6 om l 4 —(l 4) Dg1 सुकृतेह Dg1 T3 G1 3 M2 3 Cr g सुकीर्ण, Dm1 T1 Cv m सत्कीर्ण, T2 G2 M1 सकीर्ण, Ct as above (for उत्कीर्ण) G3 M2 Cr भित्तिभिस्, M1 पक्षिभिस्, Cv m g k t (for भक्तिभिस्) G3 तदा (for तथा) —(l 5) T1 damaged from नश्च up to कुबेर in l 6 D6 ममतश्चक्षु (sic), T2 मनश्चक्षु T3 -प्रभूतानाम् (for च भूतानाम्) Dg1 आन्दन् Ś1 D4-7 T3 आददानमिव श्रिया, M2 आददन्निव तेजसा (for the post half) —(l 6) Ś1 D4-7 -सदनोपम, M3 -भवनोत्तम —(l 7) Ś1 D4-7 महेद्रमद्म —(l 8) Ś1 -वेश्मोपम, D4-7 शृगोपम (for शृङ्गसम) G2 रामो (sic) Dm1 वेश्न (sic) —Ś1 D4 6 7 om l 9-13 —(l 9) D5 अजलिकैस्तथा —(l 10) D5 उपायनसमाकीर्णं (for the prior half) Dd1 Dm1 T2 G1 2 M1-3 तथा D5 यथा (for तदा) T1 damaged from त in तदा up to first म in l 12 —D5 om l 12-14 —(l 12) Dg1 महामेरु, G2 महावेग (for महामेघ-) M3 -गिरिप्रख्यम् Dm1 M3 उदय (for उदग्र) Dg1 T G M1-3 सुविभूषितम् —(l 13) Dg1 T G1 2 M1-3 कुब्जकैरातकावृत, G3 कुब्जवामनिकावृत (for the post half)]

27 Ś1 D4 6 7 om 27^{ab} —^{b}) Dg1 निराकुल, Dt1 समाकुल Dg1 D5 T G3 राजपथ, Cr k t as in text (for राजकुल) Dt1 Dd1 Dm1 D5 G1 2 M1-3 विराजय(G2 °य) न् (for विलोकयन्) Ñ V1 B1-3 D1 2 M4 तदागत (Ñ2 B3 D2 °त) पौरजन प्र(Ñ1 °जनानि, B3 °जनप्र, D1 °जन स) हर्षयन् (B3 °ण) —After 27^{ab}, Ñ V1 B1-3 D1 2 ins

301* विवेश रामस्य गृह महर्द्धिम-
न्महेन्द्रवेश्मप्रतिम नृपाज्ञया ।,

[(l 1) Ñ2 B3 समृद्धिमन्, B2 तदृद्धिमत्, D1 तदर्चित, D2 तदद्धिमन् —(l 2) B2 तदाज्ञया]

while Dg1 Dt1 Dd1 Dm1 D5 T G M1-3 ins

302* वरूथिना रामगृहाभिपातिना
पुरस्य सर्वस्य मनासि हर्षयन् ।

[(l 1) Dt1 D5 राजगृह- —(l 2) D5 परस्पर सर्व- (for पुरस्य सर्वस्य) D5 (before corr) मनसि Dd1 रजयन् T1 damaged from हर्षयन् up to रोमा स in 27^{d}]

—^{c}) Ñ V1 B1-3 D1 2 M4 स तत् (for तत) Ñ V1 B1-3 D1 2 M4 महर्द्धिमत्तदा (V1 °था) (for महाधन महत्) —^{d}) M2 चेता (for -रोमा) Ñ V1 B1-3 D1 2 M4 जहर्ष सूतो मुमुदेभिवीक्ष्य च(D1 om च, D2 स) —After 27, Ś1 Ñ V1 B1-3 Dg1 Dt1 Dd1 Dm1 D1 2 4-7 S ins

303* मृगैर्मयूरैश्च समाकुलोल्बण
गृह वरार्हस्य शचीपतेरिव ।
स तत्र कैलासनिभा स्वलकृता
प्रविश्य कक्ष्यास्त्रिदशालयोपमा ।,

G 2 12 38
B 2 15 48
L 2 16 59

तदद्रिकूटाचलमेघसंनिभं
महाविमानोत्तमवेश्मसंघवत् ।
अवार्यमाणः प्रविवेश सारथिः
प्रभूतरत्नं मकरो यथार्णवम् ॥ २८

इति श्रीरामायणे अयोध्याकाण्डे त्रयोदशः सर्गः ॥ १३ ॥

[(l 1) Ś1 D4 6 7 समाकुल मत्त, D5 °कुलागम, T3 G2 3 M2 3 °कुलोद्भव Ñ V1 B1–3 D1 2 M4 अनेकरत्नाचित(V1 °चित्र, D1 2 M4 °वर)नम्य(Ñ2 B1 °ल)स्कृत —(l 2) Ś1 D6 च रामस्य, M4 महात्मस्य (for वरार्हस्य) Ñ V1 B1–3 D1 2 M4 om lines 3–4 —(l 3) D5 7 कैलाश- —(l 4) Dg1 प्रतीर्य (for प्रविश्य) Dg1 Dm1 D4 7 कक्षास् (for कक्ष्यास्) D5 त्रिस्त्रियाप्योपमा]

—Thereafter Ś1 Ñ V1 B1–3 D1 2 4–7 M4 cont

301* उपस्थितैर्मागधसूतवन्दिभि-
स्तथैव वैतालिकसौखशायिकैः ।
अभिष्टुवद्भिर्गुणतो नृपात्मज
समावृत राजपथ ददर्श स ।
स सप्तकक्ष पुरुषैरलंकृतै-
र्विनीतवेषैर्बहुभि सुरक्षितम् ।
विवेश रामस्य महात्मनो गृह
महीयमानो नृपमन्त्रिसत्तम ।

[(l 1) D5 M4 उपस्थिता D2 मागधवन्दिभिस्तत —(l 2) B1 2 वैतालिक, V1 D5 6 -सौम्य(D5 °रय, D6 °ध्य)शायिक, D1 -सौख्यशायिक, D2 -सौख्यशायिकै —(l 3) D2 6 अभिस्तुवद्भिर् D4 गुणो D- गतो —(l 4) Ñ M4 समावृत, D2 समाश्रित (for समावृत) Ñ M4 -द्वारपथ (for राजपथ) —(l 5) Ś1 D5 M4 -कक्ष्य, B3 D1 कक्षे D6 समस्तकक्ष्य, D7 समस्तकक्षा Ś1 B1 D1 2 4 6 M4 अलंकृत —(l 6) Ś1 सुरक्षित —M4 om lines 7–8 —(l 7) Ñ1 D5 गृह महात्मनो (by transp), D1 2 गृह महात्मन —(l 8) Ś1 D4 6 7 -सत्तम]

—After 303*, Dg1 Dt1 Dd1 Dm1 T G M1–3 cont

305* प्रियान्नरान्नाममते स्थितान्बहू-
न्व्यपोह्य शुद्धान्तमुपस्थितो रथी ।
स तत्र शुश्राव च हर्षयुक्ता
रामाभिषेकार्थकृता जनानाम् ।
नरेन्द्रसूनोरभिमङ्गलार्था
सर्वस्य लोकस्य गिर प्रहृष्टा ।
महेन्द्रसद्मप्रतिम तु वेश्म
रामस्य रम्य मृगपक्षिजुष्टम् ।
ददर्श मेरोरिव शृङ्गमुच्च
विभ्राजमान प्रभया सुमन्त्र ।
उपस्थितैरञ्जलिकारिभिश्च
सोपायनैर्जानपदैर्जनैश्च ।
कोट्यापरार्धैश्च विमुक्तयानै
समाकुल द्वारपथ ददर्श ।
ततो महामेघमहीधराभ
प्रभिन्नमत्यङ्कुशमत्यसह्यम् ।
रामोपवाह्य रुचिर ददर्श
शत्रुंजय नागमुदग्रकायम् ।
स्वलंकृतान्साश्वरथान्सकुञ्जरा-
नमात्यमुख्याञ्शतशश्च वल्लभान् ।
व्यपोह्य सूत सहितान्समन्तत
समृद्धमन्त पुरमाविवेश ह ।

[(l 1) Dt1 T1 वरान् (for नरान्) M2 -नरे (for -मते) —(l 2) Dg1 T3 G1 2 M3 Cg अपोह्य, T1 2 उपेत्य, M2 उपोह्य, Cm t as above (for व्यपोह्य) T1 damaged from शुद्धान्त up to माभिषे in l 4 T3 सिद्धांतम् —(l 3) Dd1 Dm1 हर्षयुक्तो —(l 4) Dg1 Dt1 Dm1 M2 3 Cr m g -कृता, G2 -युता, M1 -युता, Ck -कृत (for -कृता) ❀ Ct रामस्याभिषेकार्थमभिषेकप्रयोजनक कर्म कुर्वता जनाना गिर । ❀ —(l 5) Dt1 अधि-, G3 अपि all Cs as above (for अभि-) —(l 6) T1 G3 M2 3 Cv m प्रहृष्ट —(l 7) Dg1 Cg -वेश्म (for -सद्म) Dm1 च (for तु) —(l 8) Dg1 हर्म्य (for रम्य) —(l 9) Dg1 M2 उच्छ्रित, Dd1 Dm1 G3 उच्चैर् (for उच्च) —(l 10) G3 विभ्राजमान- T1 damaged from न up to जानप in l 12 —(l 11) Dg1 T2 3 G M1–3 अञ्जलिकार(G3 °र, M2 °रि)कैश् Dg1 च ते —(l 12) T1 2 G3 M2 च मर्त्य, T3 वृत च, G1 2 M1 अनेकै (for जनैश्च) —(l 14) Dt1 द्वारपद Dg1 ददर्श ह —(l 15) Dg1 इतो, Cg as above (for ततो) —(l 16) Dt1 Dm1 जत्यसह्य —(l 17) T2 -[उ]प वाक्य (sic) —(l 18) T1 damaged from मुदग्र up to मुख्याञ्श in l 20 T2 नागमहेंद्रकाय —(l 19) M2 अलकृतान् Dm1 च कुञ्जरान्, G3 damaged for न्सकुञ्जरा —(l 20) G1 2 M2 वृद्धान् (for -मुख्यान्) Dt1 Dd1 Dm1 च ददर्श (for शतशश्च) T2 दुर्लभान् —(l 21) Dg1 सहित, M3 महिता (for सहितान्) —(l 22) Dg1 Dt1 Dd1 T G1 2 M1 om, G3 हा (for ह)]

28 D4 5 om. 28 —[a]) Dt1 ततो (for तद्) Ck t p तदेन्द्रकूट- —[b]) Dt1 -विमानोपम- Dm1 -सभव, G2 -सघात् (subm) (for -सघवत्) —For 28[ab], Ś1 Ñ V1 B1–3 D1 2 6 7 M4 subst

१४

स तदन्तःपुरद्वारं समतीत्य जनाकुलम् ।
प्रविविक्तां ततः कक्ष्यामाससाद पुराणवित् ॥ १ ॥
प्रासकार्मुकबिभ्रद्भिर्युवभिर्मृष्टकुण्डलैः ।
अप्रमादिभिरेकाग्रैः स्वनुरक्तैरधिष्ठिताम् ॥ २

तत्र काषायिणो वृद्धान्वेत्रपाणीन्स्वलंकृतान् ।
ददर्श विष्ठितान्द्वारि स्त्र्यध्यक्षान्सुसमाहितान् ॥ ३
ते समीक्ष्य समायान्तं रामप्रियचिकीर्षवः ।
सहभार्याय रामाय क्षिप्रमेवाचचक्षिरे ॥ ४ G 2 13 4 B 2 16 6 L 2 17 4

306* सित च शैलोत्तमशृङ्गसंनिभ
महाविमानप्रतिम जनौघवत् ।

[(l 1) D1 2 M4 मिनोच्च- Ñ V1 B1-3 D7 -वर्चस (for -संनिभ) —(l 2) V1 महावितान- M4 महौघवत्]

—^{c}) Ś1 D6 स भोज्यमान, Dg1 अवर्ज्यमाण, D2 आवार्यमाण, D7 सभाज्यमान (sic), M3 अवर्यमाण (for अवा°) Ś1 Ñ V1 B1-3 D1 6 7 M4 तदृह, D2 सदृह (for सारथि) —^{d}) Ś1 D6 7 सपूज्यमानो नृपमन्त्रिसत्तमै, Ñ V1 B1-3 D1 2 M4 स राजपुत्रस्य नरेन्द्रसारथि T1 damaged from थार्णवम् up to स तदन्त in 2 14 1^{a}

Colophon missing in B4 D3, T1 damaged (cf v l 28) —*Sarga name* Ś1 सुमन्त्रप्रवेशन, Ñ V1 B1 2 D5 आ(Ñ2 अ)भिषेचनिकद्रव्योपक्षेप, B3 रामानयनोपक्रम, D1 2 द्रव्याभिक्षेपो, D4 सुमन्त्रप्रेषणो, D6 उद्वेगे सुमन्त्रप्रेषण, D7 महर्षिसुमन्त्रप्रेषणो —*Sarga no* (figures, words or both) Ñ1 B1 D6 om Ś1 16, Ñ2 B2 3 11, V1 12, Dg1 Dt1 Dd1 Dm1 S (except T1 M4) 15, D1 63, D4 7 18, D5 21, M4 13 (as in text) —After colophon, D6 concludes with रामाय नम, T2 3 श्रीरामचन्द्राय नम, G M2 श्रीरामाय नम

14

☞ D3 missing for Sarga 14 (cf. v l 2 12 12) Dm1 begins with ॐ

1 B4 missing 1-2^{b} (cf v l 2 13 14) —^{a}) T1 damaged for स तदन्त (cf v l 2 13 28) —^{c}) Dg1 प्रविभक्ता तत कक्षाम् —For 1, Ś1 Ñ V1 B1-3 D1 2 4-7 M4 subst

307* जनौघवत्य सोऽनीत्य पद्कक्ष्यास्तस्य वेश्मन ।
प्रविभक्ता तत कक्ष्या सप्तमीमाससाद स ।

[(l 1) Ñ1 B1-3 जनौघ(B1 °क [sic])कीर्णा (Ñ1 °र्णे), V1 °पूर्णा (for जनौघवत्य) V1 सु- (for पद्) Ñ2 V1 B1-3 D4 5 कक्षास् —(l 2) Ñ2 B3 अविभक्ता, B1 प्रत्यासन्ना, D1 M4 प्रविविक्ता, D2 प्रविवेश (for प्रविभक्ता) D5 प्रविभक्तांतरा Ś1 Ñ V1 B1-3 D1,2,4 कक्षा Ś1 D2 4-7 ह, M4 (before corr) य (for स).]

2 B4 missing 2^{ab} (cf v l 1) —^{d}) Dg1 स्वनुरक्तैर, Dt1 Dd1 स्वानुरक्तैर Dd1 Dm1 T3 M2 अविष्ठित (for अधिष्ठिताम्) —For 2, Ś1 Ñ V1 B1-3 D1 2 4-7 M4 subst, while B4 subst 1 2 for 2^{cd}

308* युवभि पुरुषैर्गुप्ता प्रासकार्मुकधारिभि ।
अप्रमादिभिरेकाग्रैर्भक्तिमद्भिरलकृते ।

[(l 1) D5 युक्ता (for गुप्ता) V1 बाण- (for प्रास-) Ñ2 V1 B1-3 D1 2 M4 -पाणिभि (for -धारिभि) —(l 2) M4 अलकृत (for °कृते)]

3 ^{a}) T1 damaged from णो वृद्धान् up to स्त्र्यध्यक्षान्सु in ^{d} Dd1 अत्र (for तत्र) —^{c}) Dm1 विष्ठितद् (sic), G1 2 M1 निष्ठितान्, M2 [अ]वस्थितान् Dg1 द्वारे —For 3, Ś1 Ñ V1 B D1 2 4-7 M4 subst

309* तथा कञ्चुकिभिर्वृद्धै काषायाम्बरधारिभि ।
रक्षितामनलकारं स्त्र्यध्यक्षैर्वेत्रपाणिभि ।

[(l 1) M4 अथ (for तथा) Ś1 D6 शुद्धै, V1 वृद्धैश्च (hypm), M4 गुप्ता (for वृद्धै) Ś1 Ñ1 V1 D2 5 6 कषायानर-, D1 कायावरण- (for काषायाम्बर-) Ñ V1 B2-(B2 3 marg also as above)4 M4 -वासिभि (for -धारिभि) —(l 2) V1 रक्षित सम° (sic), D1 2 रक्षितामनहकार (for the prior half) D1 स्त्रीवेरैर्, M4 अध्यक्षेर् (for स्त्र्यध्यक्षैर्)]

4 ^{a}) D5 त T2 तमीक्ष्य (for समीक्ष्य) Ś1 Ñ V1 B D1 4-7 M4 ते दृष्ट्वा(D4 7 °ष्ट्वा चा)गत सूत(Ñ1 V1 B2 D1 4 5 7 दूत), D2 ते दृष्ट्वा ह्यागतं दूर (sic) —After 4^{ab}, Dg1 Dt1 Dd1 Dm1 T G M1-3 ins

310* सहसोत्पतिता सर्वे ह्यासनेभ्य ससभ्रमा ।
तानुवाच विनीतात्मा सूतपुत्र प्रदक्षिण ।
क्षिप्रमाख्यात रामाय सुमन्त्रो द्वारि तिष्ठति ।
ते राममुपसगम्य भर्तु प्रियचिकीर्षव ।

[(l 1) T3 lacuna up to त्पति G3 महनोत्पातिता T2 स्वासनेभ्य, M3 [अ]प्यासनेभ्य Dt1 सुसभ्रमा T3 च सभ्रमा, G1 2 M1 ससभ्रम —(l 2) T1 damaged for नीता —(l 3) G2 आख्याय G1 भद्र वो (for रामाय) —T1 damaged from मन्त्रो up to र्षव in l. 4 G2 सुनन्तो, M3 सुदतो (for सुमन्त्रो) —(l 4) T2 G3 M3 उपसक्रम्य]

—^{c}) Ś1 Dd1 Dm1 D6 T3 सभार्याय च, D2 भार्यया सह (for सहभार्याय) —^{d}) Ś1 D1 2 4-7 M4 समुपेत्य (for क्षिप्रमेव) Ñ V1 B प्रणिपत्य न्यवेदयन्.

5 7 5 प्रतिवेदितमाज्ञाय सूतमभ्यन्तरं पितुः ।
तत्रैवानाययामास राघवः प्रियकाम्यया ॥ ५
तं वैश्रवणसंकाशमुपविष्टं स्वलंकृतम् ।
ददर्श सूतः पर्यङ्के सौवर्णे सोत्तरच्छदे ॥ ६
वराहरुधिराभेण शुचिना च सुगन्धिना ।
अनुलिप्तं परार्ध्येन चन्दनेन परंतपम् ॥ ७
स्थितया पार्श्वतश्चापि वालव्यजनहस्तया ।
उपेतं सीतया भूयश्चित्रया शशिनं यथा ॥ ८
तं तपन्तमिवादित्यमुपपन्नं स्वतेजसा ।
ववन्दे वरदं बन्दी विनयज्ञो विनीतवत् ॥ ९
प्राञ्जलिस्तु सुखं पृष्ट्वा विहारशयनासने ।
राजपुत्रमुवाचेदं सुमन्त्रो राजसत्कृतः ॥ १०
कौसल्यासुप्रजा देव पिता त्वां द्रष्टुमिच्छति ।
महिष्या सह कैकेय्या गम्यतां तत्र माचिरम् ॥ ११
एवमुक्तस्तु संहृष्टो नरसिंहो महाद्युतिः ।
ततः संमानयामास सीतामिदमुवाच ह ॥ १२

---

5 ^{a}) G2 M1 प्रतिचोदितम्, Cm g k t प्रतिवेदित (as in text) —^{b}) T1 2 अभ्यागत, Cm g k t as in text (for अभ्यन्तर) —^{c}) T1 damaged for नाय Dg1 [आ]नानयामास (sic) —^{d}) Dt1 M3 Cg राघवप्रिय° ❀ Ct प्रियकाम्यया पितुरिति शेष । ❀—For 5, Ś1 Ñ V1 B D1 2 4–7 M4 subst

311* श्रुत्वैवाभ्यागत त च सूतमभ्यर्हित पितु· ।
राम प्रवेशयामास सत्कृत्यालयमात्मन· ।

[(1 1) Ñ2 श्रुत्वेवास्यागत (sic), D2 श्रुत्वा चाभ्यागत Ś1 V1 D4–7 M4 त तु, B2 तत्र (for त च) Ś1 Ñ1 D1 2 4–7 दृतम् D2 अभ्यागत, D5 M4 अभ्यर्चित (for अभ्यर्हित). —(1 2) Ñ2 सद्यात (sic), D2 सत्कृत्वा (for सत्कृत्य) Ś1 D4–7 गृहम्, V1 स्वयम् (for [आ]लयम्)]

6 T3 lacuna for 6^{abc} —^{a}) Ś1 Ñ V1 B D1 2 4 6 7 M4 स त धन(Ñ2 B3 जल)द°, D5 स तु त धर्म° —T1 damaged from सकाश up to वर्णे सो in ^{d} —^{cd}) Ñ V1 B D1 2 4 5 7 M4 transp पर्यङ्के and सौवर्णे Ś1 Ñ1 B D1 2 4 6 7 M4 राङ्कवास्तृते(Ś1 D1 6 °श्रिते, B3 °चिते, D2 °सिते), Ñ2 राङ्कवाचिते (sic), V1 om , D5 (before corr शाकवासुते) सू° (for सोत्तरच्छदे) T3 सुवर्णेनोत्तरच्छदे

7 ^{a}) D1 5 वराहै- (for वराह-) Ś1 V1 B1 2 4 Dg1 T3 -रुधिराभेन, D1 M3 -रुचिराभेण(D1 °न), Cg as in text (for °भेण) —^{b}) Ś1 Ñ V1 B D1 2 4–7 M4 सु(B4 स्व)श्ल (D1 °श्लि [sic])क्ष्णेन(Ś1 D5 सुश्लक्ष्णेण, V1 om , B2 सुसूक्ष्मेन) महाभुज —^{cd}) Dg1 Dd1 G2 परार्द्धेन, Cr m g t °र्ध्येन (as in text) Ś1 Ñ V1 B D1 2 4–7 M4 महा(D1 2 5 घरा)र्हेण and सुगंधिना (for परार्ध्येन and परतपम् respy)

8 T1 damaged for वि वा in 8^{ab} —^{b}) Dm1 वाल- —^{d}) T1 damaged from शशिन up to 9^{b} —For 8, Ś1 Ñ V1 B D1 2 4–7 M4 subst

312* वालव्यजनधारिण्या सीतया पार्श्वसस्थया ।
सपत्नया सेव्यमान श्रियेव मधुसूदनम् ।

[(1 1) Ñ D1 4–7 वा(D5 [before corr] व्या)ल, M4 साल (for वाल-) D1 5 -पाणिभ्या, D2 4 7 -पाणिन्या (sic) (for -धारिण्या) D6 (before corr) सीताया B1 पार्श्वे, B3 (marg also as above) पार्व- (sic) —(1 2) M4 सपत्नया V1 व्यजमान, D2 सेवमान (for सेव्यमान) D1 सुप्रिया सेव्यमान त (for the prior half) D6 मदसूदन]

9 T1 damaged for 9^{ab} (cf v l 8).—^{b}) M3 उपविष्ट (for °पन्न) Dg1 सुतेजसा —^{d}) T3 विनुतज्ञो (for विनयज्ञो) —For 9, Ś1 Ñ V1 B D4–7 M4 subst., while D1 2 subst 1 2 for 9^{cd}

313* तरुणादित्यसदृशं प्रज्वलन्तमिव श्रिया ।
ववन्दे राममभ्येत्य सुमन्त्रो विनयान्वित· ।

[(1 1) V1 B4 M4 -सकाश (for सदृश) Ś1 D4 6 7 M4 उज्वलतम् D4 अधिश्रिया —(1 2) D1 5 M4 विनयानत, D7 विस्मयान्वित]

10 ^{a}) Dg1 Dt1 Dd1 Dm1 सुमुखं दृष्ट्वा, T2 M2 तु सुख स्पृष्ट्वा, T3 °दृष्ट्वा (for तु सुख पृष्ट्वा) Ś1 Ñ2 B1–3 D1 2 4 6 7 पृष्ट्वा(Ś1 B3 D2 6 7 दृष्ट्वा) चैनं(D2 °व) सुख(D4 °खै) प्रह्वो(B3 प्राह्वो [sic]), Ñ1 दृष्ट्वा चैनं सुख पृष्ट्वा, V1 पृष्ट्वा चैन सुखं प्रश्नं, B4 M4 पृ(B4 स्पृ)ष्ट्वा चैन सुख प्राज्ञो, D5 दृष्ट्वा चैन सुखासीन —^{b}) Ñ B1 3 4 Dd1 Dm1 D1 4 7 °नाशने, Cm °नासने (as in text) —^{cd}) Ś1 Ñ V1 B D1 2 4–7 M4 उवाचानतरमिद सुमन्त्रो राजशासनात् (Ñ V1 B °न).

11 ^{a}) ❀ Cm कौसल्या सुप्रजा सुपुत्रेण त्वया... । Cg.k t explain similarly Cg also यद्वा कौसल्याया सुप्रज· सुपुत्र असिच्प्रत्ययान्त । ❀ Ś1 Ñ B D1 2 4–7 G1 देवी(G1 °वि [sic]), Dt1 Dd1 Dm1 T3 M4 राम, Ck as in text (for देव) V1 कौसल्यासुत जानीहि —^{b}) Ś1 Ñ V1 B D1 2 4–7 M4 देवस्(Ś1 D2 °व) (for पिता) T1 damaged from मिच्छति up to क्त in 12^{a} —^{c}) Dt1 [अ]पि हि (for सह) Ś1 Ñ V1 B D1 2 4–7 M4 कैकेयी (M4 °यि)सहितो राजा(Ñ B D1 राम, M4 तत्र) गम्यता यदि रोचते

12 T1 damaged up to क्त in ^{a} (cf v l 11) —^{c}) Dg1 स मानयामास —For 12, Ś1 Ñ V1 B D1 2 4–7 M4 subst.

देवि देवश्च देवी च समागम्य मदन्तरे ।
मन्त्रयेते ध्रुवं किंचिदभिषेचनसंहितम् ॥ १३
लक्षयित्वा ह्यभिप्रायं प्रियकामा सुदक्षिणा ।
संचोदयति राजानं मदर्थं मदिरेक्षणा ॥ १४
यादृशी परिषत्तत्र तादृशो दूत आगतः ।
ध्रुवमद्यैव मां राजा यौवराज्येऽभिषेक्ष्यति ॥ १५
हन्त शीघ्रमितो गत्वा द्रक्ष्यामि च महीपतिम् ।
सह त्वं परिवारेण सुखमास्स्व रमस्व च ॥ १६
पतिसंमानिता सीता भर्तारमसितेक्षणा ।
आद्वारमनुवव्राज मङ्गलान्यभिदध्युषी ॥ १७ G 2 13 19 B 2 16. 21 L 2 17 19

314* एवमुक्त सुमन्त्रेण रामो राजीवलोचन ।
शिरसा प्रतिगृह्याज्ञा पितु सीतामथाब्रवीत् ।

[(1 1) D6 राजविलोचन (for राजीव°) —(1 2) M4 राज्ञ (for पितु) D4 यथा (for अथ)]

13 ^{ab}) Ś1 reads श्च in marg D2 om second च (subm) Dg1 तदंतरे, Cg मदतरे (as in text) Ś1 Ñ V1 B D1 2 4–7 M4 सीते and परस्पर (for देवि and मदन्तरे respy.) —^{c}) Dg1 मन्त्रयेत, Dm1 मन्त्रयेति (both sic) (for °येते) —^{d}) T1 2 G3 Ck -संयुत, Cr g t -सहित, Cm as in text (for -संहितम्) —For 13^{cd}, Ś1 Ñ V1 B D1 2 4–7 M4 subst

315* मम मन्त्रयतो नून यौवराज्याभिषेचनम् ।

[Ś1 D4(after corr *sec m*)–7 चिंतयतो, M4 [आ]-मन्त्रयतो D1 नित्य (for नून) D1 यौवराज- (for यौवराज्य-)]

14 ^{a}) T1 damaged from त्वा ह्य up to first म in ^{d} Dm1 G2 M1 2 तु (for हि) —^{b}) G2 सुदारुणा —^{d}) Dg1 T G1 3 M2 3 Cg मदिरेक्षणे, Dt1 Dd1 Dm1 असितेक्षणा (for मदिरे°) —For 14, Ś1 Ñ V1 B D1 2 4–7 M4 subst

316* ध्रुव मे यतते माता कैकेयी मत्प्रियेच्छया ।
अद्यैव मा यौवराज्य प्रतिपादयितु स्वयम् ।
नून रहसि राजान मत्कृते त्वरयत्यसौ ।
अथवा सहिता राज्ञा मा प्रिय वक्तुमिच्छति ।

[(1 1) B4 मेवतरे (sic) (for मे यतते) B1 सीता (sic) (for माता) D1 2 4 5 7 M4 ध्रुव यतति(D2 तयति [metathesis], M4 याचति) माता(D4 यातो [sic]) मे (for the prior half) Ñ1 कैकेयी B4 illeg for प्रियेच्छ D1 2 4 6 7 °प्रियेप्सया —(1 2) Ñ V1 B1 3 M4 मे (for मां) Ś1 D4 6 7 यौवराज्ये D2 प्रतिपादयतु M4 ध्रुव (for स्वयम्) —(1 3) Ñ1 B3 (also as above) यत्कृते (for मत्कृते) Ś1 D1 2 4–7 °त्वरयत्येव (D1 सत्वारयते [sic], D2 त्वरयाप्येव, D4 7 त्वरयत्यति), M4 सा त्वारयति मत्कृते (for the post half) —(1 4) D1 2 5 प्रिय मा (by transp), D4 7 प्रिय मे, M4 प्रिय मा (for मा प्रिय) B3 (also as above) वक्षुम् (for वक्तुम्) B4 D4 7 अर्हति]

—After 14, Dg1 Dt1 Dd1 Dm1 T G M1–3 ins

317* सा प्रहृष्टा महाराज हितकामानुवर्तिनी ।
जननी चार्थकामा मे केकयाधिपते सुता ।
दिष्ट्या खलु महाराजो महिष्या प्रियया सह ।
सुमन्त्र प्राहिणोद्दूतमर्थकामकर मम ।

[(1 4) Dg1 सुमत (for °मन्त्र) T1 damaged from प्राहिणो up to दू in 15^{b} Dg1 -कामपर (for कामकर).]

15 T1 damaged up to दू in 15^{b} (cf v l 14) —^{a}) Ñ1 प[...]त् (for परिषत्) M4 यादृश पश्यसे Ś1 Ñ V1 B D1 2 4–7 M4 सीते (for तत्र) —^{b}) Ś1 Ñ V1 B D1 2 4(after corr *sec m*)–7 M4 दूत(M4 सूत)श्चाय (V1 D2 °पि) यथा(Ñ2 B3 4 D2 4 7 तथा)विधः(B2 °गत) —^{c}) Ś1 D4–7 M4 सप्रति (for अद्यैव) Ñ V1 B D1 2 राजा मा (by transp) —^{d}) B1 [ऽ]भिषिक्ष्यति (sic), B3 [ऽ]भिषेक्ष्यते

16 ^{a}) G1 अह T2 शीघ्रगतो (sic) (for °मितो) —For 16^{ab}, Ś1 Ñ V1 B D1 2 4–7 M4 subst

318* तस्माच्छीघ्रमहं गत्वा पश्यामि जगतीपतिम् ।
एक रहसि कैकेय्या सहासीन गतज्वरम् ।

[(1 2) Ñ1 D2 एव रहसि, V1 एकान्तरणे, D6 एक रहस्ये Ñ1 केकेय्या Ś1 D6 मुखासीन, B2 reads सहासीन in marg]

—Ñ V1 B D1 2 M4 om 16^{cd} —^{c}) Ś1 D6 इह, D4 5 7 यथा (for सह) D4(after corr *sec m*) 5 परिचारेण, T3 परिवारैश्च

17 ^{a}) Ś1 D4–7 इति समानिता —^{b}) T1 damaged from सि in 17^{b} up to राजा in l 2 of 321* Ś1 D4–7 भर्त्रा त्व(D4 स्व)सितलोचना —^{c}) Ś1 D4–7 द्वारातम्, G1 आत्मानम् (for आद्वारम्) D4 अनुप्रव्राज (sic) —^{d}) Dm1 मगलान्, D4 5 7 मगल्यानि (for मङ्गलानि) Ś1 (marg also as in Dm1) D6 [अ]पि दध्युषी, Dg1 °दध्रुपी (both sic), Dd1 Dm1 °ध्रुपी, D5 °चाद्रिनी, T2 °ध्युषे (sic), G1 [अ]वि° (for [अ]भिदध्युषी) —For 17, Ñ V1 B D1 2 M4 subst

319* इति भर्तृवच श्रुत्वा सीता वचनमब्रवीत् ।
गच्छार्यपुत्र पितर द्रष्टु मातरमेव च ।
इत्युक्त्वा साञ्जलि कृत्वा राम सप्रस्थित तदा ।
आद्वारमनुवव्राज सीता भर्तृवशानुगा ।

[(1 1) M4 राम- (for भर्तृ) —(1 2) B4 [आ]ज्यपुत्र (sic), D1 [आ]र्यं भर्त( ) (for [आ]र्यपुत्र) B1 पितरम् (for मातरम्) —(1 3) D1 2 M4 चाजलिं D2 च (for स-) —(1 4) Ñ2 V1 B1–3 (B3 also as above) D1 2 आ द्वाराद्, B4 आत्वयाद् (sic), M4 अद्वराद् (for आद्वारम्). D2 अनुश्व्राज]

—Then all cont

स सर्वानर्थिनो दृष्ट्वा समेत्य प्रतिनन्द्य च ।
ततः पावकसंकाशमारुरोह रथोत्तमम् ॥ १८
मुष्णन्तमिव चक्षूंषि प्रभया हेमवर्चसम् ।
करेणुशिशुकल्पैश्च युक्तं परमवाजिभिः ॥ १९
हरियुक्तं सहस्राक्षो रथमिन्द्र इवाशुगम् ।
प्रययौ तूर्णमास्थाय राघवो ज्वलितः श्रिया ॥ २०
स पर्जन्य इवाकाशे स्वनवानभिनादयन् ।
निकेतान्निर्ययौ श्रीमान्महाभ्रादिव चन्द्रमाः ॥ २१

320* तां निवर्त्य ततो रामो निर्जगाम त्वरान्वितः ।
पितरं द्रष्टुमाहूतः कैकेय्या सहितं रहः ।
विनिर्गत्य च तस्मात्स गृहादनुपमद्युतिः ।
ददर्शार्थिजनं द्वारि स्थितं दर्शनलालसम् ।

[(l 1) D1 2 तदा (for ततो) M4 त्वरन्नित्र —Ñ1 om l 3 —(l 3) B2 4 विनिर्गतश्च, D1 2 विनिर्गम्य Ñ2 reads in marg, B4 om (subm) (for स) —(l 4) B1 [अ]र्थिजनान्, D2 [अ]र्थ जन B1 स्थितान्दर्शनलालसान् (for the post half)]

—After 17, Ś1 Dg1 Dt1 Dd1 Dm1 D4–7 T G M1–3 ins

321* राज्यं द्विजातिभिर्जुष्टं राजसूयाभिषेचनम् ।
कर्तुमर्हति ते राजा वासवस्येव लोककृत् ।
दीक्षितं व्रतसंपन्नं वराजिनधरं शुचिम् ।
कुरङ्गशृङ्गपाणिं च पश्यन्ती त्वां भजाम्यहम् ।
पूर्वां दिशं वज्रधरो दक्षिणां पातु ते यमः । [5]
वरुणः पश्चिमामाशां धनेशस्तूत्तरां दिशम् ।
अथ सीतामनुज्ञाप्य कृतकौतुकमङ्गलः ।
निश्चक्राम सुमन्त्रेण सह रामो निवेशनात् ।
पर्वतादिव निष्क्रम्य सिंहो गिरिगुहाशयः ।
लक्ष्मणं द्वारि सोऽपश्यत्प्रह्वाञ्जलिपुटं स्थितम् । [10]
अथ मध्यमकक्ष्यायां समागच्छत्सुहृज्जनैः ।

[T1 damaged up to राजा in l 2 —(l 1) D7 मज्य (sic) (for राज्य) Ś1 D4–6 -[अ]भिषेकजत्, D7 (after corr *sec m*) °षेकज (for -[अ]भिषेचनम्) —(l 2) G2 अर्हसि —(l 3) T3 M2 वृत्त, Cg as above (for व्रत-) Ś1 M2 शुभ, T2 (before corr) सुत, G2 शुची (sic) (for शुचिम्) —(l 4) D5 पश्यति (sic) G1 त्वा (for त्वां) Ś1 D4–7 भवामि (for भजामि) —(l 5) Dt1 दिशो, D5 दिर्शि (both sic) (for दिशं) T1 damaged from ज्र in l 5 up to first म in l 7 —(l 6) G2 [उ]रमा (sic) (for [उ]त्तरा) D4 (marg *sec m*) तथा (for दिशम्) —(l 8) Ś1 स्वमन्त्रेण —(l 9) D6 निष्क्रांत (for °ष्क्रम्य) D4 °गुहाश्रय —Ś1 D4–7 om l 10 —(l 10) G3 लक्ष्म M3 -पुट (for -पुटं) T1 damaged from स्थितम् up to 18^b —After l 10, Dm1 ins राम —(l 11) Dg1 Dt1 Dd1 Dm1 -कक्षाया Dm1 समागच्छन् (sic) (for °च्छत्) Ś1 D4–7 मध्यमाया समे(D6 [after corr]°मी)याय कक्ष्या(D4 6 7 [after corr] °क्षा)यामर्थि(D4 °र्थि [sic])भिर्जनैः (Ś1 D6 °र्द्विजैः)]

18 T1 damaged for 18^{ab} (cf v l line 10 of 321*) —^{a}) M3 अर्थितो (for °नो) M4 स तु सर्वार्थिनो Ñ1 reads दृष्ट्वा in marg —^{b}) G2 M1 च ननद (for प्रतिनन्द्य) —After 18^{ab}, Ś1 D4–7 read l 2 of 322*. —^{c}) Ś1 D4 6 7 तथा, D5 तदा, G3 स तु (for ततः) G2 M1 पवित- (for पावक-) Ñ V1 B D1 2 M4 युक्तमेव रथं रौप्यम् (V1 योग्यम्, D1 2 रौक्मम्) —^{d}) Ñ V1 B2–4 त्वरान्वितः, B1 त्वराणि च (sic) (for रथोत्तमम्) —After 18, Ś1 Dg1 Dt1 Dd1 Dm1 D4–7 T G M1–3 ins

322* वैयाघ्रं पुरुषव्याघ्रो राजन्तं राजनन्दन ।
मेघनादमसंबाधं मणिहेमविभूषितम् ।

[(l 1) Dd1 पुरुष (sic) (for पुरुष-) Ś1 Dt1 D4 6 7 Ct राजिन, Dd1 Dm1 D5 Cg राजन, Cv *gp* as above (for राजन्तं) ❀ Cr राजन्तं राजनन्दन इति पाठः । ❀ —Ś1 D4–7 read l 2 after 18^{ab} —(l 2) Ś1 D4 6 7 -समारात्, G2 सम बाध (for असंबाध) M3 मेघदाममम बाध (sic) (for the prior half) Dg1 मणिस्तोम- (for °हेम-)]

19 D2 om from 19 up to l 1 of 323* —^{a}) B3 मुष्टतम् (sic) (for मुष्णन्तम्) —T1 damaged from 19^b up to रथ in 20^b —^{b}) Ś1 Dd1 Dm1 D4–7 T3 सूर्यवर्चसं, Ñ V1 B M4 (before corr as in B4) मेघनादिन (B4 °त), Dt1 Ct मेरु°, D1 [अ]र्कमिवापरे (for हेमवर्चसम्). —^{c}) V1 B4 करेणुशिष्ट-, M4 °वर- (for °शिशु-)

20 T1 damaged up to रथ in 20^b (cf v l 19). —^{a}) Ś1 D6 सहस्रहयसंयुक्तं —^{b}) M2 [अ]परः (for [आ]शुगम्) D4 7 रथं च मघवानिव —^{c}) M3 moth-eaten for यौ तू D5 पूर्णम्, T3 रथम् (for तूर्णम्) Dd1 M2 (before corr) उत्थाय (for आस्थाय) —^{d}) Ś1 D4–7 ज्वलित, Dg1 Dd1 T2 3 G3 M2 3 ज्वलित-, Dt1 ज्वलितैः (sic) (for ज्वलितः) ❀ Ct उज्ज्वलित इति वा । तदा सधिरार्षः । ❀ G1 राघवो हि श्रिया सह —For 20, Ñ V1 B D1 2 M4 subst

323* हर्यश्वयुक्तं भगवान्स्वरथं मघवानिव ।
तमारुह्य ययौ रामः श्रिया परमया ज्वलन् ।

[D2 om l 1 (cf v l 19) —(l 1) Ñ1 हर्यश्वयुक्तं महसा (for the prior half) Ñ1 स्व, V1 सु- (for स्व-) Ñ1 म वान्, V1 मघवा, B1 भगवान् (for मघवान्) —(l 2) Ñ2 ततो (for ययौ)]

21 ^{a}) Dt1 पर्जन्यम्, Ct as in text —^{b}) Ś1 D4 वै वि(Ś1 D6 नि)नादयन्, G1 अभिनन्दयन् —^{c}) Ś1 D4 6 7 केतनान् (for निकेतान्) D6 शीघ्र (for श्रीमान्) —^{d}) Dg1 महेन्द्राद् (for महाभ्राद्) ❀ Cg महेन्द्रशब्द उदयाद्रिपरः । ❀ —For 21, Ñ V1 B D1 2 M4 subst

छत्रचामरपाणिस्तु लक्ष्मणो राघवानुजः ।
जुगोप भ्रातरं भ्राता रथमास्थाय पृष्ठतः ॥ २२

ततो हलहलाशब्दस्तुमुलः समजायत ।
तस्य निष्क्रममाणस्य जनौघस्य समन्ततः ॥ २३

G 2. 13. 27
B 2 16 34
L. 2 17 31

324* स तेन रथमुख्येन पर्जन्यसमनादिना ।
विनिर्ययौ स्वभवनात्सिताभ्रादिव चन्द्रमा ।

[(l 1) D2 रथु- (for रथ-) B2 (m gloss) पर्जादिरन्य इति अन्य अस्यप (sic) (for पर्जन्य) Ñ2 -[ज]समनादिना, B4 -समनेन च (sic) (for -समनादिना) B1 पर्जन्य समपद्यत (for the post half) —B1 om (hapl ?) from l 2 up to 23^{ab} —(l 2) D1 स्वभुवनात्]

22 B1 om 22 (cf v l 21) V1 om 22^{ab} —^{a}) Ñ1 Dd1 Dm1 G1 M1 Ct*p* (first) चित्र, Dt1 Ct*p* (second) चन्द्र, Cg as in text (for छत्र-) Ñ2 V1 B2 3 D2 M4 -पाणिस्तं, B4 D1 पाणिस्थ T1 damaged from र in 22^{a} up to ततो in 23^{a} —^{b}) Ś1 D6 राघवो लक्ष्मणोनुज, Ñ V1 B2–4 D1 2 M4 प्रयात लक्ष्मणस्तदा —^{cd}) M3 moth-eaten for गोप भ्रा Dm1 reads भ्रातर in marg Dm1 पृच्छत (sic) (for पृष्ठत) Ñ V1 B2–4 D1 2 M4 अन्वारुरोह देवेंद्रमुपेंद्र (Ñ2 repeats मुपेंद्र) इव हर्षयन्

23 B1 om 23^{ab} (cf v l 21) T1 damaged for ततो (cf v l 22) Ś1 D4–7 repeat 23^{ab} (= var) after l 16 of 327* —^{a}) Dg1 reads हल in marg D2 कोलाहल, D6 (second time) हलाहला, D7 (second time) हल ला- (for हलहला-) —^{b}) G3 तुमुल (for तुमुल) Ś1 Ñ B2–4 D4 6 M4 (Ś1 D6 first time, D4 second time) समपद्यत, D6 (second time) समजा‹ › —After the repetition of 23^{ab}, Ś1 D4–7 ins

325* उपस्थाने नरेन्द्रस्य विमर्दश्च महान्पथि ।
[Ś1 D6 विमर्द सुमहान्]

—^{c}) Ś1 D4–7 निष्क्रामतस्तत्र, Dg1 (before corr) Dd1 निष्काम°, Cg as in text (for निष्क्रममाणस्य) —For 23^{cd}, Ñ V1 B D1 2 M4 subst

326* दृष्ट्वैव राममायान्त रथेन रथिना वरम् ।
हर्षात्तेन जनौघेन सहसा समुदीरित ।
स शब्दः पूरयामास दिशोऽथ विदिशास्तथा ।

[(l 1) Ñ दृष्ट्वे B3 (*sup lin*) रथेन M4 रथिन (for रथिना). D1 2 उपस्थाने प्रहृष्टाना जनाना प्रेक्ष्य राघव —(l 2) D2 सन्दीरित —(l 3) B1 दिश स D1 2 दिव भूमि च सर्वत (for the post half)]

—After 23, Ś1 Dg1 Dt1 Dd1 Dm1 D4–7 T G M1–3 ins.

327* ततो हयवरा मुख्या नागाश्च गिरिसंनिभा ।
अनुजग्मुस्तदा रामं शतशोऽथ सहस्रश ।
अग्रतश्चास्य संनद्धाश्चन्दनागरुभूषिता ।
खड्गचापधरा शूरा जग्मुराशसवो जना ।
ततो वादित्रशब्दाश्च स्तुतिशब्दाश्च वन्दिनाम् ।
सिंहनादाश्च शूराणा तदा शुश्रुविरे पथि ।
हर्म्यवातायनस्थाभिर्भूषिताभि समन्तत ।
कीर्यमाण सुपुष्पौधैर्ययौ स्त्रीभिररिंदम ।
राम सर्वानवद्याङ्ग्यो रामपिप्रीषया तत ।
वचोभिरग्र्यैर्हर्म्यस्था क्षितिस्थाश्च ववन्दिरे ।
नूनं नन्दति ते माता कौसल्या मातृनन्दन ।
पश्यन्ती सिद्धयात्र त्वा पित्र्य राज्यमुपस्थितम् ।
सर्वसीमन्तिनीभ्यश्च सीता सीमन्तिनीं वराम् ।
अमन्यन्त हि ता नार्यो रामस्य हृदयप्रियाम् ।
तया सुचरित देव्या पुरा नूनं महत्तप ।
रोहिणीव शशाङ्केन रामसंयोगमाप या ।
इति प्रासादशृङ्गेषु प्रमदाभिर्नरोत्तम ।
शुश्राव राजमार्गस्थ प्रिया वाच उदाहृता ।

[(l 1) T1 damaged for वरा T2 हयरथा (for हयवरा) Ś1 घन, M3 गिर- (sic) (for गिरि) —(l 2) M3 moth-eaten for जग्मुस्त Ś1 D4 6 7 G1 2 M1 ततो (for तदा) T1 damaged from त in शतशो up to शू in शूरा in l 4 —(l 3) Ś1 Dg1 D6 7 चन्दनागुरु Ś1 D6 -वासिता, Dt1 -भूषिन (sic), T2 3 G M1–3 Cg रूषिता (for भूषिता). —(l 4) Ś1 D6 -चर्मधरा, D7 -चापवरा (for °धरा) Ś1 D6 रामस्य पृष्ठत, D4 5 7 आशसतो°, M3 आशस तो° —(l 5) Ś1 D4–7 अथ, G1 2 M1 तत्र, Cg as above (for ततो) Ś1 D4–7 -शब्दाश् for both the -शब्दाश् Dg1 om (subm), D4 T1 तु (for first च) Dg1 -शब्दस्तु (for second -शब्दाश्च) —(l 6) Ś1 D4–7 -नादाश् (for -नादाश्). Dg1 G3 तथा, Dt1 Dd1 Dm1 Ct तत, Cg as above (for तदा) T1 damaged for दा शुश्रु Ś1 D4–7 शुश्राव वै, T3 शुश्रुवुरे (sic) (for शुश्रुविरे) G1 भृश (for पथि) —(l 7) Ś1 वैतायन-स्थाभिर्, T3 °स्ताभिर् (both sic) (for -वातायन°) T1 damaged from त in समन्तत up to the prior half of l 9 —(l 8) D4 5 7 M2 च, T3 G2 M1 म, M3 तु (for सु-) Ś1 सुपुष्पैश्च D3 आकीर्यमाण पुष्पैश्च (for the prior half) —(l 9) D5 शशसुश्च (for राम सर्व-) Ś1 D6 -[अ]नवद्याग (for °ङ्ग्यो) D5 राम, D7 घागमा (for राम-) Dg1 G3 -विप्र (Dg1 °प्रे)पया (sic), Cg as above (for -पिप्रीषया) M2 स्त्रिय (for तत) Ś1 D6 (after corr) रामाश्च प्रीतिस्युता, T2 3 °प्रियचिकीर्षया (for the post half) —(l 10) T2 अग्रे (for अग्र्यै) Ś1 D4 6 7 क्षितिस्थ च (Ś1 [marg] D6 त), Dg1 °स्तु (for क्षितिस्थाश्च) —(l 11) M3 moth-eaten for न्दति in नन्दति Ś1 D6 भ्रात-, T1 damaged (for मातृ) —(l 12) D5 T2 3 पश्यति (sic) Ś1 D6 सिद्धमत्र, Dg1 सिद्ध (before corr °द्धि)पात्र, M3 विद्ध° (sic), Cg as above (for सिद्धयात्र). D7 त्वा (for त्वा) T G M1–3 Cg k अव, Cm t as above (for उप-) T1 damaged from त्र्य in l 12 up to

स राघवस्तत्र कथाप्रलापं
शुश्राव लोकस्य समागतस्य ।
आत्माधिकारा विविधाश्च वाचः
प्रहृष्टरूपस्य पुरे जनस्य ॥ २४
एष श्रियं गच्छति राघवोऽद्य
राजप्रसादाद्विपुलां गमिष्यन् ।
एते वयं सर्वसमृद्धकामा
येषामयं नो भविता प्रशास्ता ।
लाभो जनस्यास्य यदेष सर्वं
प्रपत्स्यते राष्ट्रमिदं चिराय ॥ २५

स घोषवद्भिश्च हयैः सनागैः
पुरःसरैः स्वस्तिकसूतमागधैः ।
महीयमानः प्रवरैश्च वादकै-
रभिष्टुतो वैश्रवणो यथा ययौ ॥ २६
करेणुमातङ्गरथाश्वसंकुलं
महाजनौघैः परिपूर्णचत्वरम् ।
प्रभूतरत्नं बहुपण्यसंचयं
ददर्श रामो रुचिरं महापथम् ॥ २७

इति श्रीरामायणे अयोध्याकाण्डे चतुर्दशः सर्गः ॥ १४ ॥

ता in l 14 —(l 13) D5 तु (for च) T2 चरा (sic) (for वराम्) Dg1 D4 M2 सीता सीमतिनीवरा, Dt1 Dm1 सीता(Dm1 [before corr] °ता) सीमन्तिनी(Dm1 °नीं) वरा (for the post half) —(l 14) Ś1 D6 अभ्यनन्दत(D6 °न्दतु) वै, D4 7 °न्तनो, T3 °हि + (for अमन्यन्त हि ता) Ś1 (before corr) D7 हृदयप्रिय, D4 हृदये प्रिया M3 moth-eaten from प्रि in l 14 up to त in तया in l 15 —(l 15) D5 यनो (sic) (for तया) Dg1 तया (for पुरा) —(l 16) Ś1 D4–7 रोहिण्या शशिनेनेह (for the prior half) Ś1 D4–7 -मयोगकाम्य(D5 7 °म)या, Dt1 °मायया, Dd1 °मागन (sic), Dm1 °गना (for -सयोगमाप या) M2 रामयोगमवाप या (for the post half) —After l 16, Ś1 D4–7 repeat (= var) 23[ab] —Ś1 D4–7 om l 17–18 —(l 17) T1 damaged from पु in l 17 up to तत्र 24[a] —(l 18) Dg1 (before corr) राजा, M3 रा+- (for राज-) M3 moth-eaten for स्य प्रिया T3 हृदा हृता (for उदा°) ❀ Cg प्रमदाभिरुदीरिता इति योजना । ❀]

24 Ñ V1 B D1 2 M4 om 24–25 (For om cf 336*) —[a]) T1 damaged up to तत्र (cf v l l 17 of 327*) Ś1 D4–7 कथाभिरामा, Dg1 °प्रसगान्, Dt1 Dd1 Dm1 T G M1–3 कथा(Dt1 तदा, G3 तथा)प्रलापान्(T3 °भा [sic]), Cg °प्रपचान् (for °प्रलाप) —[c]) Ś1 D6 ह्यात्माधिकारैर्, D4 5 7 °कारे (for °कारा) D6 (before corr) वाचा ,(for वाच) —[d]) M3 प्रहृ - (for प्रहृष्ट-) Dg1 Cg पुरो (for पुरे)

25 Ñ V1 B D1 2 M4 om 25 (cf v l 24) —[a]) Ś1 D4–7 स्वय (for श्रिय) M3 moth-eaten for ऽद्य D7 ins वो after ऽद्य —[b]) Dg1 विपुला (for °लां) Ś1 D4–7 राज प्रसादात्पृथिवीमलप्स्यत् (D5 °मभिलिप्सन्, D7 °प्स्यन्) —[c]) Ś1 D6 जाता (for एते) T1 damaged after ए up to 25[e] D4 5 G1 2 °समृद्धिकामा ❀ Cm सर्वसमृद्धकाम समृद्धसर्वकाम. । ❀ —[d]) Dm1 T2 G3 एषाम्. —[e]) Ś1 D6 [अ]य (for [अ]स्य) —After 25, Ś1 Dg1 Dt1 Dd1 Dm1 D4–7 T G M1–3 ins

328* न ह्यप्रिय किंचन जातु कश्चि-
त्पश्येन्न दु ख मनुजाधिपेऽस्मिन् ।

[(l 1) Ś1 D4–7 कश्चन, Dg1 किंच+, Dt1 °नु, Cg t as above (for किंचन) Ś1 D4–7 किंचित् M3 moth-eaten for श्चि, and त्प in l 2 —(l 2) Ś1 D4 6 7 पश्येत, M3 पश्यन्न (for पश्येन्न) D5 पश्यन्दुष्टे]

26 [a]) D4 7 सु-, G1 स- (for स) M3 घोषमद्भिश्(sic) D5 सु- (for च) Ś1 D4–7 स(D4 - सु)सारथि , Dg1 T1 2 G3 M3 च नागै , Dd1 सुनागै (for सनागै) —[b]) Ś1 D4–7 पुरस्थितैरथिक(Ś1 °रथिक [sic])सूत°. —[c]) T1 damaged from मा up to कु in 27[a] D5 (before corr.) महीसमानः; M2 महीयमान (sic) (for महीयमान) Ś1 D6 च वा जनैर्; Dg1 Dt1 Dd1 Dm1 G1 M3 च वाद्भिकैर्; D4 7 वणिग्जनैर्, D5 °वाणिजैर् (for च वादकैर्) —[d]) M3 moth eaten for ययौ —For 26, Ñ V1 B D1 2 M4 subst .

329* प्रहर्षवद्भि पुरवासिभिर्जनै
सभाज्यमान प्रियशब्दवादिभि ।
कराग्रदृष्टिस्मितभाषितेङ्गित-
र्ययौ जनौघ प्रतिपूजयञ्शनै ।

[(l 1) D1 प्रहर्षवाग्भि —(l 2) B3 स बाधमान (for सभाज्य°) —(l 3) B3 (also as above) -हस्त- (for -दृष्टि-) M4 -स्थिनि (for -स्मित-) Ñ2 -भावितेर्गितैर्; D2 -भाषितागतैर् —(l 4) B4 illeg for शनै M4 प्रतिपूरयञ्शनै .]

27 Ñ V1 B D1 2 M4 om 27 —[a]) T1 damaged up to कु (cf v l 26) M3 moth-eaten for करेणुमा.

१५

स रामो रथमास्थाय संप्रहृष्टसुहृज्जनः ।
अपश्यन्नगरं श्रीमान्नानाजनसमाकुलम् ॥ १
स गृहैरभ्रसंकाशैः पाण्डुरैरुपशोभितम् ।
राजमार्गं ययौ रामो मध्येनागरुधूपितम् ॥ २
शोभमानमसंबाधं तं राजपथमुत्तमम् ।
संवृतं विविधैः पण्यैर्भक्ष्यैरुच्चावचैरपि ॥ ३
आशीर्वादान्बहूञ्शृण्वन्सुहृद्भिः समुदीरितान् ।
यथार्हं चापि संपूज्य सर्वानेव नरान्ययौ ॥ ४ G 2 14 8 B 2 17 8 L 2 18 8

—[b]) Ś1 Dg1 Dd1 Dm1 D4–7 महाजनौघ(Dg1 °घ)प्रतिपूर्ण° (Ś1 D6 °पन्न) —G3 illeg for 27[cd] —[c]) Ś1 D4–7 -वस्त्रसचय —[d]) Dt1 Dd1 Dm1 विमल (for रुचिर)

Colophon *Kāṇḍa name* M3 सुदर° (sic) —*Sarga name* Ś1 D4–7 (D5 prefixes दशरथ प्रति)रामानयनो (Ś1 D6 °न), Ñ V1 B D1 2 रामाह्वान(D1 2 °नो) —*Sarga no* (figures, words or both) Ñ1 B1 4 D6 om Ś1 17, Ñ2 B2 3 12, V1 13, Dg1 Dt1 Dd1 Dm1 D3 T G M1–3 16, D1 69, D4 7 19, D5 22 —After colophon, Dm1 concludes with राम श्री, D6 G M1 2 श्री(D6 om श्री)रामाय नम·, T2 श्रीरामचन्द्राय नम

15

☞ D3 missing for Sarga 15 (cf v l 2 12 12) Dm1 begins with ॐ

1 T1 missing from स रामो up to रु in 330* on a damaged fol —[a]) In M3 the portion up to मा is moth-eaten —[b]) Dg1 T2 G3 सप्रहृष्ट सुहृज्जनै, Dm1 (before corr) सप्रहृष्टसुहृज्जनै —After 1[ab], Dg1 Dt1 Dd1 Dm1 T G M1–3 ins

330* पताकाध्वजसपन्न महार्हागरुधूपितम् ।

[Dg1 Dt1 महार्हागुरु , M3 °र्हगरु- (for महार्हागरु)]

—T1 damaged from अपश्य up to समा in [d] —[d]) Dt1 -समन्वित, G2 -समाकुला (sic) (for -समाकुलम्) —For 1, Ś1 D4–7 subst

331* प्रायादेव च काकुत्स्थ सप्रहृष्टसुहृज्जन ।

[D5 प्रयाते च (for प्रायादेव) D4 5 6 7 तु (for च)]
and then cont

332* शुश्राव राजमार्गस्थ प्रिया वाचोऽभ्युदीरिता ।
एष राज्ञ प्रसादेन राघवो रघुनन्दन ।
ह्लादयन्पौरहृदयान्यतुला प्राप्स्यति श्रियम् ।
जनस्यास्य महानेष लाभो यद्राघवो बली ।
राज्य प्राप्स्यति दुर्धर्ष सकोशबलवाहनम् । [5]

[(l 1) Ś1 राजमार्गस्था . D5 [ऽ]भ्युदाहृता —(l 3) D5 ह्लादयानोरुहृदयानि (corrupt) (for the prior half)]
—For 1, Ñ V1 B D1 2 M4 subst

333* अथ रामो रथगत पूज्यमान· समन्तत ।
पौरैरञ्जलिमालाभिरनुगै पथि सस्थितै ।

[(l 1) B3 अथो (for अथ) Ñ (Ñ2 marg also) पृच्छमान (for पूज्यमान) —(l 2) V1 अन्वगै (for अनुगै) Ñ1 सवृत , V1 सश्रितै (for सस्थितै) D1 2 अभ्यगच्छत्प(D1 °न्प)थि स्थितै , M4 अनुरागात्पथि स्थितै (for the post half)]

2 Ñ V1 B D1 2 M4 om 2–3 —[a]) Ś1 D6 सुगृहैर् (for स गृहैर्) —[b]) T G M1–3 पाडरैर् M3 moth-eaten from रै up to first रा in 2[c] —[d]) D5 मध्ये च (for मध्येन) Ś1 Dg1 Dt1 D6 7 [अ]गुरु- —After 2, Ś1 Dg1 Dt1 Dd1 Dm1 D4–7 T G M1–3 ins.

334* चन्दनाना च मुख्यानामगरूणा च सचयै ।
उत्तमाना च गन्धाना क्षौमकौशाम्बरस्य च ।
आविद्धाभिश्च मुक्ताभिरुत्तमैः स्फाटिकैरपि ।

[Ś1 D5–7 transp l 1 and 2 —(l 1) Ś1 Dg1 Dt1 D6 अगुरु(Dt1 °रु)णा Ś1 D4–(D5 before corr)7 धूपित (for सचय) T1 missing for l 2–3 on a damaged fol —D4 om l 2 —(l 2) Ś1 D6 7 क्षौमपट्टाबरस्य च, D5 क्षौमवस्त्रादिभूषित, T2 3 G M1 3 क्षोमकोशावरस्य च (for the post half) —(l 3) Dm1 T2 3 M1 2 Cv m g k t*p* अविद्धाभिश् M3 मु· (moth-eaten), Cr t as above (for मुक्ताभिर्) Ś1 D4–7 आवद्धाभिश्च मुख्याभिर् (for the prior half) Ś1 D4–7 मणि(Ś1 °णी)भि (for उत्तमै) Ś1 Dg1 D4 6 स्फ(Dg1 स्फ)टिकैर् (for स्फाटिकैर्)]

3 Ñ V1 B D1 2 M4 om 3 (cf v l 2) —[a]) D4 7 शोभयानम् —[b]) Ś1 D4–7 नरेन्द्र- (for त राज-) —[c]) Dg1 सभृत, D5 सवृत्त (for °वृत) Dg1 Dt1 पुष्पैर्, T3 पुण्यैर् (for पण्यैर्) —[d]) Dg1 D5 7 भक्षैर् (for भक्ष्यैर्) Ś1 D4 तथा, D5 7 शुभै (for अपि) —After 3, Ś1 Dg1 Dt1 Dd1 Dm1 D4–7 T G M1–3 (Ś1 D4–7 l 1 only) ins

335* ददर्श त राजपथ दिवि देवपथ यथा ।
दध्यक्षतहविर्लाजैर्धूपैरगरुचन्दनै· ।
नानामाल्योपगन्धैश्च सदाभ्यर्चितचत्वरम् ।

[(l 1) Ś1 D6 राजमार्ग, D4 5 7 °सुतो (for °पथ) Dg1 reads देव in marg Ś1 D6 दिव्य राजसुतस्तथा(D6 °दा), Dt1 दिवि देवपतिर्यथा, D4 5 7 दिव्य राज(D5 देव)पथ यथा (for the post half) —(l 2) Dg1 Dt1 अगुरु (for अगरु) T1 missing from चन्दनै up to द्भि in 4[b] on a damaged fol —(l 3) M3 मा moth-eaten in नानामाल्योप- Dg1 Dt1 M3 तदा (for सदा)]

4 T1 missing up to सुहृद्भि· (cf v l 3) —[b])

०८९ पितामहैराचरितं तथैव प्रपितामहैः ।
अथोपादाय तं मार्गमभिषिक्तोऽनुपालय ॥ ५
यथा स्म लालिताः पित्रा यथा पूर्वैः पितामहैः ।
ततः सुखतरं सर्वे रामे वत्स्याम राजनि ॥ ६
अलमद्य हि भुक्तेन परमार्थैरलं च नः ।
यथा पश्याम निर्यान्तं रामं राज्ये प्रतिष्ठितम् ॥ ७

Dt1 बहुभि (for सुदृद्धि) —^{c}) Ś1 D4 6 7 ताश्च, D6 तान्सु- (for चापि) —^{d}) Dt1 T1 2 वरान (for नरान्) —For 4, Ñ V1 B D1 2 M4 subst

336* शुश्राव राम शनको वाच पौरजनेरिता ।
आत्माभिष्टवसंयुक्ता पुण्यश्रवणकीर्तना ।
अद्य राज्ञा स्वय दत्ता रामो राजीवलोचन ।
स्वगुणोपार्जिता धर्म्यामतुला प्राप्स्यति श्रियम् ।
अर्हत्येष श्रिय प्राप्तु पृथिव्या वासवोपम' । [5]
राज्ञ सकाशाद्गुणवान्मानमर्हति राघव ।
यदि नाम भवेद्रामो राजा न परिरक्षिता ।
भुवि मोदेमहि तदा नित्य स्वर्गनिवासिवत् ।
यदि न सुकृत किंचिद्यदि दत्त हुत यदि ।
फलेन तेन राजाय रामो भवतु रक्षिता । [10]
न कृच्छ्रजीवी भविता न दु खी भुवि कश्चन ।
यदि राजा यौवराज्ये राममद्याभिषेक्ष्यति ।
इति राम शुभा वाच शृण्वन्पौरजनेरिता ।
राजमार्गे हृष्यमाणो जगाम भवन पितु ।

[(l 1) Ñ1 अथवं (for शुश्राव) D1 M4 चेमा (for राम) —(l 2) Ñ2 आत्माभिमत°, B3 आत्माभिनव° (for the prior half) B1 -कीर्तन, M4 -कीर्तिता (for -कीर्तना) —(l 3) D1 अथ (for अद्य) —(l 4) Ñ1 रम्यम् (for धर्म्याम्) V1 सुगुणो°, D2 स्वगुणोपचिता धर्म्याम्, M4 स्वगुणोपाश्रिता पुण्याम (for the prior half) B3 M4 प्राप्स्यते (for प्राप्स्यति) —(l 5) D1 2 M4 [ए]व (for [ए]ष) D2 प्रिय (for श्रिय) Ñ पृथि या (for पृथिव्या) —(l 6) B1 पितु (for राज्ञ) M4 राज्यम (for मानम्) —(l 7) V1 वाथ, B4 गम (for नाम) Ñ2 B3 परिनदिता, B2 D2 °ता (for परिरक्षिता) —(l 8) Ñ1 मन्त्रा (for तदा) B1 2 D1 2 अतीव(D1 2 °व)भुवि मोदेम(B2 [before corr] D1 2 °न), M4 अचिरा भुवि नो देवाश्च (for the prior half) B1 2 D1 2 M4 जनान्(D1 2 जना, M4 तत) स्वर्गनिवासिन (for the post half) —(l 9) B4 om किंचिद् V1 शत (for हुत) —(l 10) B3(also as above) 4 राजान, D1 2 नो राजा (for राजाय) M4 तेन पुण्येन वै रामो (for the prior half) M4 राजा (for रामो) —(l 11) V1 कृच्छ्रसेवी D1 2 वन (for भुवि) V1 कश्चन (for कश्चन) M4 दु खी भवति कश्चन (for the post half) —(l 12) D1 यत्र (for यदि) Ñ1 [अ]भिषिञ्चति, B1 [अ]भिनेक्ष्यति (for [अ]भिषेक्ष्यति) —After l 12, M4 ins

336(A)* न दरिद्र पापशीलो रामे राज्येऽभिन स्थिते ।
यदि पुण्यानि वा सन्ति कृतानि सुबहून्यत ।
तेन वै सुकृतेनेह रामो राज्येऽभिषिच्यताम् ।

—(l 13) M4 [ऽ]नुगा (for शुभा) B4 पौरजनेरिता, D2 पौजननावृत (sic) (for पौरजनेरिता) —(l 14) Ñ2 प्रहृष्यन्स, B1 सुप्रहृष्यन् (for हृष्यमाणो) Ñ2 V1 B2 3 राजमार्गेषु हृ(V1 क्रु)ष्यन्स B4 राजमार्गे प्रपश्यन्स (for the prior half) D1 भुवन (for भवन)]

—and then cont

337* वातायनगताश्चैव यान्त पौरजनस्त्रिय ।
ददृशु प्रशशसुश्च स्वगुणैरनुरञ्जिता ।

[(l 1) Ñ1 [ए]व (for [ए]न) B4 पौरजने स्त्रिय. —(l 2) Ñ1 प्रमममुश्च, B4 प्र ममुश्च, D1 प्रशमसुश्च (for प्रशशसुश्च) M4 ददृशुश्च प्रहृष्यन्त्य (for the prior half)]

5 ^{b}) M3 त॰ ॰ (moth-eaten) (for तथैव) —D5 om (hapl) 5^{c}–6^{b} —^{c}) Ś1 D6 अद्य समाप्य, T2 अथोपायैव (corrupt) (for °पादाय) —For 5^{cd}, Ñ V1 B D1 2 M4 subst

338* अनुवर्तिष्यते वृत्त रामो गुणगणान्वित ।

[B2 अति, B4 अपि (for अनु-) D1 2 अतिवर्तस्यय वृत्त (sic), M4 अभिपत्स्यत्यय वृत्त (for the prior half) Ñ1 transp वृत्त and गतो B4 -गुणान्वित, D1 2 -शतान्वित (for -गणान्वित) M4 रामो रतिगुणाकर (for the post half)]

6 D5 om 6^{ab} (cf v l 5) —^{a}) T1 damaged from स्म up to हि in 7^{a} Dt1 पोषिता, D4 7 लाडिता (for लालिता) —^{b}) Ś1 Dg1 Dt1 Dd1 Dm1 D4 6 7 T3 G1 2 M1–3 सर्वैः (for पूर्वैः) T2 G3 तथैव प्रपितामहैः —^{c}) T3 तथा (for तत) —^{d}) M3 राज॰ (moth-eaten) (for राजनि) Ś1 D4–7 वत्स्यामस्त्वयि राजनि —For 6, Ñ V1 B D1 2 M4 subst

339* यथा पितामहेनास्य वय पित्रा च पालिता ।
तथाविकृतर राम पालयिष्यति नो ध्रुवम् ।

[(l 1) D2 तथा (for यथा) V1 पितामहैर् Ñ1 [अ]च (for [अ]स्य) Ñ1 B1 2 4 लालिता, Ñ2 रक्षिता (for पालिता) —(l 2) B1 रक्षिष्यति च, B2 3 लालयिष्यति (for पालयिष्यति)]

23 Ñ2 B om 23–24^{b} —^{a}) V1 D1 2 5 तत सूत· (by transp) (for सूतस्तत·) Ñ1 V1 Dm1 स त्वरित, D2 त त्वरित·, D4 7 तु त्वरित (for सत्व°) Ś1 D6 ततस्तु सूतस्त्वरित·, M4 सूतस्तत· स्म त्वरित —^{b}) V1 D1 3 त (for तैर्) Ś1 Ñ1 D2 4–7 M4 स्यदनेन (D2 5 °ने तान्, D4 7 °ने च) हयोत्तमान् —^{c}) Ś1 Dt1 Dd1 Dm1 D4 6 7 G2 M1 तु, Ñ1 Dg1 T3 G1 M3 च, D5 [आ]शु, M2 स (for [अ]थ) Dg1 Dt1 Dd1 Dm1 T3 G2 M1 3 रामस्य (for रामाय) —After 23, Dg1 Dt1 Dd1 Dm1 T G M1–3 ins

1028* अय युक्तो महाबाहो रथस्ते रथिना वर ।
त्वमारोहस्व भद्र ते ससीत. सहलक्ष्मण· ।

[(l 1) G2 M1 अथ (for अय) Dt1 महाबाहु (sic) Dg1 reads थस्ते र in marg G3 रथेन (for रथस्ते) Dg1 (bf corr) Dd1 T3 वर —(l 2) Dg1 G1 तमारोहस्व, Dt1 Dd1 Dm1 त्वरयारोह (for त्वमा°)]

24 Ñ2 B om 24^{ab} (cf v l 23) —Dg1 Dt1 Dd1 Dm1 T G M1–3 read 24–26 (followed by 1029*) after 28 —^{a}) D4 om (hapl) from पौराणा up to विद्यु in 25^{c} —^{b}) V1 वचोऽब्रवीत् (by transp) —^{d}) Ś1 D6 आदाय, Dt1 M4 आरुह्य (for आस्थाय)

25 D4 om up to विद्यु in ^{c} (cf v l 24) —Dg1 Dt1 Dd1 Dm1 T G M1–3 read 24–26 (followed by 1029*) after 28 —^{a}) Ñ1 D1 5 7 G1 त्वरितो —^{c}) V1 B3 (*sup lin* also) विद्म· (for विद्यु) V1 B3 (*sup lin* also) Dg1 (sic) पौराणा, D6 7 पौरा मे (for पौरा मा) Ś1 Ñ1 D6 यथा च न (Ñ1 न मे) विदु पौरास्

26 Dg1 Dt1 Dd1 Dm1 T G M1–3 read 24–26 (followed by 1029*) after 28 —^{a}) Dg1 Dt1 Dd1 Dm1 T3 G1 2 M1–3 तु वच (for वचन). —^{b}) M4 यथा (for तथा) Dt1 Dd1 Dm1 G2 M1 च, D3 om (subm) (for स) —^{c}) B1 प्रत्यावेद्य (sic) Ś1 Ñ V1 B D1–4 6 7 M4 तु (Ñ B D4 7 च) रामाय (for च रामस्य) —After 26, Dg1 Dt1 Dd1 Dm1 T G M1–3 ins, M4 ins after 28

1029* ता म्प्रयुक्त तु रथ समास्थितौ
तदा ससीतौ रघुवशवर्धनौ ।
प्रचोदयामास ततस्तुरगमा-
न्स सारथिर्येन पथा तपोवनम् ।
तत समास्थाय रथ महारथ
ससारथिर्दाशरथिर्वन ययौ । [5]
उदङ्मुख त तु रथं चकार स
प्रयाणमाङ्गल्यनिमित्तदर्शनात् ।

[(l 1) G1 त (for तौ) T3 सुप्रयुक्त (for स°) M4 सुमन्त्रयुक्त —G1 damaged from समास्थितौ up to l 2 —(l 2) M3 तथा (for तदा) T3 ससीता —(l 4) Dg1 तथा, Dt1 यथा (for पथा) —(l 5) G1 सराघव (for महारथ) —(l. 7) Dg1 तुरग, Cg as above (for तु रथ) Dt1 Dm1 om स —(l 8) T2 M2–4 Cv r -मगल्य-]

—Thereafter M4 cont 1031*, while Dg1 Dt1 Dd1 Dm1 S (M4 after 1031*) ins an addl colophon [—*Sg no* (figures, words or both) All above MSS (ex M4) 46, M4 44 —After colophon, T2 concludes with श्रीरामचन्द्राय परमगुरवे नम, G श्रीरामाय नम·]

27 ^{a}) Ś1 D4 6 7 स, D2 तत् (for तं) Ñ2 B1 समास्थाय (for अधिष्ठाय) G1 धर्मात्मा रथमारुह्य —^{c}) Ñ2 B1 2 4 D3 शीघ्र ताम्, B3 (m also as in Ñ2) शीघ्रमार्गा-, T3 शीघ्ररामा- —^{d}) Ñ2 V1 B2 4 D1 2 अतरत्तमसा (Ñ2 °समा [meta]) (by transp), B1 अतरत्तामसा, B3 T3 आतरत्तामसा, D3 M3 4 अतरत्तमसा-, G2 तमसामातरन् (for तमसामतरन्)

28 ^{a}) Ś1 Ñ V1 B D1 2 5 6 M4 सतीर्य च, D3 तामुत्तीर्य, D4 7 सनीत्वा च (for स सतीर्य) —^{b}) Ś1 Ñ V1 B D1–4 6 7 श्रीमच् (for श्रीमाञ्) M4 श्रीमत्समम् (for श्रीमाञ्शिवम्) Ñ2 अकर्पण (for अकण्टकम्) —^{cd}) Ś1 Ñ V1 B D1–7 M4 प्रपेदे तमसामार्ग (D4 5 7 °तीर)मभय क्षेम (Ś1 D2 4–7 शुभ)

प्रभातायां तु शर्वर्यां पौरास्ते राघवं विना ।
शोकोपहतनिश्चेष्टा बभूवुर्हतचेतसः ॥ २९
शोकजाश्रुपरिद्यूना वीक्षमाणास्ततस्ततः ।
आलोकमपि रामस्य न पश्यन्ति स्म दुःखिताः ॥ ३०
ततो मार्गानुसारेण गत्वा किंचित्क्षणं पुनः ।
मार्गनाशाद्विषादेन महता समभिप्लुताः ॥ ३१
रथस्य मार्गनाशेन न्यवर्तन्त मनस्विनः ।
किमिदं किं करिष्यामो दैवेनोपहता इति ॥ ३२
ततो यथागतेनैव मार्गेण क्लान्तचेतसः ।
अयोध्यामगमन्सर्वे पुरीं व्यथितसज्जनाम् ॥ ३३

इति श्रीरामायणे अयोध्याकाण्डे एकचत्वारिंशः सर्गः ॥ ४१ ॥

दर्शन Dg1 Dt1 Dd1 Dm1 T G M1-3 read 24-26 (followed by 1029*) after 28 —After 28, M4 ins 1029*

29 Dm1 begins with ॐ, M1 2 श्रीरामाय नम —d) T G M गत-, Cg t as in text (for हृत-) G1 -चेतना —For 29-33, Ś1 Ñ V1 B D1-7 subst 1031*

30 M3 om (hapl) from 30 up to l 3 of 1030* —a) M3 -परिन्यूना (sic) —b) Dg1 Dd1 Dm1 वीक्ष्यमाणास् —c) T2 इति (for अपि) —d) Dt1 पश्यत्मा* (corrupt) —After 30, Dg1 Dt1 Dd1 Dm1 S (M3 om l 1-3 for which see above) ins

1030* ते विषादार्तवदना रहितास्तेन धीमता ।
कृपणा करुणा वाचो वदन्ति स्म मनस्विन ।
धिगस्तु खलु निद्रा ता ययापहृतचेतस ।
नाद्य पश्यामहे राम पृथूरस्क महाभुजम् ।
कथ नाम महाबाहु स तथावितथक्रिय । [5]
भक्त जनमभित्यज्य प्रवास राघवो गत ।
यो न सदा पालयति पिता पुत्रानिवौरसान् ।
कथ रघूणा स ज्येष्ठस्त्यक्त्वा नो विजनं गत ।
इहैव निधन यामो महाप्रस्थानमेव वा ।
रामेण रहिताना हि किमर्थं जीवित हि न । [10]
सन्ति शुष्काणि काष्ठानि प्रभूतानि महान्ति च ।
तै प्रज्वाल्य चिता सर्वे प्रविशामोऽथ पावकम् ।
कि वक्ष्य मो महाबाहुरनसूय प्रियवद ।
नीत स राघवोऽस्माभिरिति वक्तु कथ क्षमम् ।
सा नून नगरी दीना दृष्ट्वास्मान्राघव विना । [15]
भविष्यति निरानन्दा सस्त्रीबालवयोधिका ।
निर्यातास्तेन वीरेण सह नित्य जितात्मना ।
विहीनास्तेन च पुन कथ द्रक्ष्याम ता पुरीम् ।
इतीव बहुधा वाचो बाहुमुद्यम्य ते जना ।
विलपन्ति स्म दु खार्ता विवत्सा इव धेनव । [20]

(l 1) G2 M1 -नयना (for -वदना) —(l 2) M4 कृपणा (for करुणा) Dt1 Dd1 Dm1 मनीषिण (for मनस्विन).—(l 3) Dg1 Dd1 [अ]पहत- (for °हृत-) Dt1 Dd1 Dm1 -चेतना —(l 4) G1 महाराज (for °भुजम्) —(l 5) Dt1 Dd1 Dm1 रामो, T1 ना (for नाम) M3 damaged for तथा M4 तथागतविक्रिय —(l 6) Dg1 T1 2 G3 M2 परित्यज्य, M4 इह त्यक्त्वा (for अभित्यज्य) Dt1 तापसो (for राघवो) —(l 7) Dg1 पाल्यते, G2 पालयिता —(l 8) Dg1 Dt1 Dd1 Dm1 T3 M2 3 स श्रेष्ठस्, M4 श्रेष्ठ सन् (for स ज्येष्ठस्) Dt1 Dd1 Dm1 विपिन (for विजन) M3 गत —(l 9) M3 damaged for यामो Dm1 च (for वा) —(l 10) Dt1 नो, M4 वै, Cv as above (for हि) Dt1 Dd1 Ct हित (for हि न) —(l 11) T3 सतु (for सन्ति) T1 2 G M1 3 4 काष्ठानि शुष्काणि (by transp) —(l 12) Dg1 M2 [ऽ]थ वानल, Dt1 [ऽ]थ वा वय, M4 यथा वय —(l 14) T1 2 G3 क्षम कथ (by transp) —(l 15) M4 [अ]स्मान्दृष्ट्वा (by transp) —(l 16) G1 M4 गतानदा T3 [ऽ]धिना (sic), G2 [ऽ]धिक (for ऽधिका) —(l 17) M3 damaged for निर्यात in निर्यातास् Dt1 Dd1 Dm1 महात्मना (for जिता°) —(l 18) M4 पश्याम (for द्रक्ष्याम) —(l 19) G2 M1 वा (for [इ]व) Dm1 T1 2 बाहून् (for बाहुम्) M4 दु खिता (for ते जना) —(l 20) Dt1 M4 हृतवत्सा इवाध्यगा (M4 °वर्षभा) (for the post half)]

31 b) Dt1 Dd1 Dm1 Ct तत क्षण, M1 क्षण पुर (for क्षण पुन) —cd) M4 मार्गनाशविषादेन सहसा समभिप्लुता

32 a) Dt1 Dd1 रथमार्गानुसारेण —b) T2 न्यवर्तत —c) T2 किमिदानीं (for किमिद किं)

33 a) Dg1 Dt1 M4 तदा, M3 तथा (for ततो) —For 29-33, Ś1 Ñ V1 B D1-7 subst, M4 cont after 1029*

1031* प्रबुध्य पौरास्तु ततो निशाक्षये
रथस्य तत्सदृशुर्निवर्तनम् ।
नृपात्मज सोऽनुगत पुरीमिति
व्यपेक्षया ते नगरीं पुनर्ययु ।

४२

1 2 1 अनुगम्य निवृत्तानां रामं नगरवासिनाम् ।
उद्गतानीव सत्त्वानि बभूवुरमनस्विनाम् ॥ १

स्वं स्वं निलयमागम्य पुत्रदारैः समावृताः ।
अश्रूणि मुमुचुः सर्वे बाष्पेण पिहिताननाः ॥ २

[(l 1) Ñ1 B1 प्रवृद्ध- Ñ1 निशाक्षये तदा, D4 ततो निशालये V1 D1 3 M4 समुत्थितास्तास्तु(D1 °ता ता तु) निशाक्षये प्रा —(l 2) B2 च (for तत्) —(l 3) V1 B2 3 D1-3 नृपात्मजश्च (B4 °स्य) B3 M4 नृपात्मजमनुयानुगता (M4 °न) B2 D5 इव, D3 त्व, D4 इमा (for इति) —(l 4) D5 [न]4 (for ते). Ś1 D2 नगर (for °रा)]

—After 33, Dg1 Dt1 Dd1 Dm1 S ins

1032* आलोक्य नगरीं तां च क्षयव्याकुलमानसा ।
अवर्तयन्त तेऽश्रूणि नयनैः शोकपीडिता ।
एषा रामेण रहिता नगरी नातिशोभते ।
आपगा गरुडेनेव ह्रदादुद्धृतपन्नगा ।
चन्द्रहीनमिवाकाशं तोयहीनमिवार्णवम् । [5]
अपश्यन्निहतानन्दं नगरं ते विचेतसः ।
ते तानि वेश्मानि महाधनानि
दुःखेन दुःखोपहता विशन्त ।
नैव प्रजग्मुः स्वजनं जनं वा
निरीक्षमाणा प्रविनष्टहर्षा । [10]

[(l 1) M3 -चेतस (for -मानसा) —(l 2) Dg1 Dt1 T2 3 M3 4 (*inf lin sec m*, bf corr as above) Ct आवर्तयन्(Dg1 °ति), G2 M1 अन्ववर्तन्त, Cv r m g as above Dg1 Dt1 Dd1 Dm1 M3 शोकपीडित —(l 3) Dg1 Dt1 Dd1 Dm1 T3 M2 नगरी रहिता (by transp) —(l 4) Dg1 T2 G2 M1 [न]व (for [ने]व) Dg1 बलाद् (for ह्रदाद्) —(l 6) T1 2 विचेतना —(l 7) M4 महान्ति (for महाधनानि) —(l 8) M4 तदाति- (for दुःखेन) —(l 9) T2 प्रजग्मे, T3 G2 3 M1 2 4 Cr m g प्रजग्मुः, G1 प्रजग्मु, Ct °जग्मुः (as above) Dt1 पुर, G2 धन (for जन) —(l 10) Dg1 Dm1 निरीक्ष्यमाणा, T3 निनिक्षमाणा (sic).]

Colophon —M4 om. colophon (cont the Sg)—*Sg name* Ś1 Ñ2 V1 B D1-3 6 तमसातीर(V1 °रे)निवास, Ñ1 पौरमोह, D4 7 पौरव्या(D7 °स्या)मोह., D5 पौरप्रत्यागमन —*Sg no* (figures, words or both) Ñ1 D1 3 om Ś1 D4 7 48, Ñ2 B1 3 4 43, V1 45, B2 34, Dg1 Dt1 Dd1 Dm1 D2 T G M1-3 47; D5 52, D6 44 —After colophon, D6 T2 G2 3 conclude with श्री(D6 om)रामाय नम

42

M4 continues the previous Sarga Dm1 begins with ॐ, M1 श्रीरामचन्द्राय नम, M2 श्रीरामाय नम —Before 1, Dg1 Dt1 Dd1 Dm1 S ins

1033* तथामेव विषण्णानां पीडितानामतीव च ।
बाष्पविप्लुतनेत्राणां सशोकानां मुमूर्षया ।

[(l 1) Dd1 एवाविषण्णानां (corrupt) —(l 2) M4 -विप्लव- (for -विप्लुत-) M4 मुमूर्षया]

1 [a]) Dt1 Dd1 Dm1 अभिगम्य —D2 om from 1[c] to l 2 of 1034* —Ñ1 illeg from [c] to बभूवुर in [d] —[c]) Ñ2 B1 4 उद्धृतानि, V1 तपतानि (sic), B2 D3 6-7 तद्गतानि, D4 तद्धतानि (for उद्गतानि) —[d]) Ś1 Ñ V1 B D1 3-7 गतचेतसा(D1 °स:, D7 °स) (for अमनस्विनाम्)

2 D2 om 2 (cf v l 1) —[a]) D1 सस्व (sic), G2 स्वस्व (for स्वं स्वं) Ś1 Ñ1 D4-7 ते गृहम्, Ñ2 V1 B D1 3 M4 शरणम् (for निलयम्) Ś1 D4 6 -आसाद्य (for आगम्य) —[b]) Ś1 D4-7 G2 M1 4 समागता —[d]) Ś1 V1 D3 6 स (D3 6 मु)स्वर बाष्पविह्वला (V1 D3 °ह्वा), Ñ1 D5 6 7 सस्वन(Ñ1 °स्वर, D5 °स्वर) बाष्पगद्गदा, Ñ2 B सुस्वर(B1 4 सस्वरा) शोकविह्वला (B2 4 °विह्वला), D1 सस्वर बाष्पमुद्गता (sic), M4 बाष्पपूर्णमुखा नरा —After 2, Ś1 Ñ V1 B D1-7 M4 ins (D2 after 1[ab] owing to omission, Ñ D5 ins l 1-2 after 2 and l 3-6 after 3)

1034* न स्म सद्यो मृतान्कश्चित्सुप्रियानपि बान्धवान् ।
तथा शोचन्त्ययोध्याया यथा रामविवासनम् ।
न च श्रीराविशत्कश्चिन्न चैव जुहुवुर्द्विजा ।
ब्रह्म न प्राभवत्किंचिन्न च धर्मोऽभ्यवर्तत ।
व्यनदन्नाप्यमुत्सृज्य केचित्तत्र सुदुःखिता । [5]
शयनेष्वपतश्चान्ये निकृत्ता इव पादपा ।

[D2 om. l 1-2 (cf v l 1) —(l 1) B2 तास्तु, D4 7 नाम्म (for न स्म) D5 नाम्मरयो (for न स्म सद्यो) Ś1 D1 मृता (for मृतान्) Ñ1 illeg, B1 D4 6 7 M4 काश्चित्, D1 केचित् (for कश्चित्) V1 B1 स्वप्रियान्; B3 सप्रियान् (for सुप्रियान्). D4 7 वापि, M4 न च (for अपि). Ñ1 प्रियानपि च B2 बाधव. —(l 2) D4 7 नि स्नेहा, D5 [अ]तिस्नेहाद् (for [अ]योध्यायां) Ś1 B1 D4 6 7 -विवासने, B4 -निमादने, D1 -विवेशन (for -विवासनम्). —Ñ1 om l 3-6, D4 7 om l 3-4 —Ñ2 repeats consecutively l 3 —(l 3) D5 श्रीशोभित (for श्रीराविशद्). V1 मिचिन्, D5 तश्चिन् (for कश्चिन्) Ñ2 (first time) D5 न च धर्मो व्यवर्तत (for the post half) Ñ2 (second time) B पौरा न चा(B2 न पौराश्चा)विशन्केचिज्जुहुवुर्न द्विजातय; M4 न च वीराविशत्काश्चिद्विजातिर्नाप्यजुहुत —D5 om l 4 —(l 4) Ñ2 B1 4 प्रा(B4 प्र)वदत्कश्चिन्, B2 प्रावदत्केचित्, D2 प्राभनेत्किंचिन् V1 B3 ब्राह्मणप्रभावा(B3 °प्रावद)त्कश्चिन्

न चाहृष्यन्न चामोदन्वाणिजो न प्रमारयन् ।
न चाशोभन्त पण्यानि नापचन्गृहमेधिनः ॥ ३
नष्टं दृष्ट्वा नाभ्यनन्दन्विपुलं वा धनागमम् ।
पुत्रं प्रथमजं लब्ध्वा जननी नाभ्यनन्दत ॥ ४
गृहे गृहे रुदन्त्यश्च भर्तारं गृहमागतम् ।
व्यगर्हयन्त दुःखार्ता वाग्भिस्तोत्रैरिव द्विपान् ॥ ५
किं नु तेषां गृहैः कार्यं किं दारैः किं धनेन वा ।
पुत्रैर्वा किं सुखैर्वापि ये न पश्यन्ति राघवम् ॥ ६
एकः सत्पुरुषो लोके लक्ष्मणः सह सीतया ।
योऽनुगच्छति काकुत्स्थं रामं परिचरन्वने ॥ ७

(for the prior half) D1 [ऽ]भ्यवर्तत, D3 न्यवर्तत, M4 एनवर्तत (for ऽन्यवर्तत) —(1 5) B4 D2 व्यरुदन् (for व्यनदन्) V1 व्यादननाप्प (corrupt) समुत्सृज्य (for the prior half) D3 सुदु खित —(1 6) D2 शयने न्यपतश्चान्ये (for the prior half) D1 निकृता, D4 न्यकृता (for निष्कृता)]

3 Ś1 D4 6 7 om 3 —[ab]) B प्राहृष्यन्, Dd1 Dm1 चाहर्षन्, M3 चाभाष्यन (for चाहृष्यन्) B न चा(B3 [also] वा)मज्जन् for न चामोदन्) V1 D1–3 M4 न प्रा (D1 2 प्र)मोदन्न चाहृष्यन् (for [a]) B3 D1–3 [अ]प्रसारयन्, M4 नाप्रयोपि प्रसारिता (for [b]) Ñ D5 अप्रसा(D6 °मा)देन वणिजो न पण्यानि च चक्रिरे(D5 वव्रिरे) —[c]) M4 [आ]हरत (for [अ]शोभन्त) B3 पश्यानि, D6 T3 M4 Cr g पुण्यानि, Ck as in text (for पण्यानि) —[d]) Ñ2 [आ]चरन् (for [अ]पचन्)

4 Ñ1 illeg for [ab] —[a]) Ś1 V1 D1–3 6 M4 इष्ट, Ñ2 B1 3 लब्ध (for नष्ट) D4 5 7 लब्ध्वा (for दृष्ट्वा) Ś1 Ñ2 V1 B D1–3 6 M4 न चा(Ś1 Ñ2 B3 D6 च ना [by transp]) हृ(B3 °कृ)ष्यन्, D4 7 धन दृष्ट्वा, T3 नाप्यनदन् (for नाभ्यनन्दन्) —[b]) B4 साधनागम, D4 5 7 धनसचय (for वा धनागमम्) —[cd]) D2 3 पुत्र- Ś1 V1 D1–3 6 M4 दृष्ट्वा (for लब्ध्वा) D4 5 7 पुत्र प्रसूत दृष्ट्वापि(D5 °ष्ट्वा च) (for [c]) D1 सवित्री, M4 जनित्री (for जननी) Ñ1 नाप्यनंदत, D4 7 नाभिनदति (for नाभ्यनन्दत) Ñ2 B न चाभ्यनदज्जननी दृष्ट्वा प्रथमज (Ñ2 B3 च प्रथम) सुत.

5 [a]) Ś1 Ñ2 V1 B1 2 4 D1–7 M4 कुले कुले(D2 लेभे [sic]) Ñ B4 रुदत्यश्च, D4 7 तु नार्यश्च (for रुदन्त्यश्च) —[c]) Ś1 V1 D1–3 6 वितु(D2 °न)दती(D3 °त) सुदु खार्ता, B3 व्यगर्हंत सुदु खार्ता, Dg1 विगर्हयत दु खार्ता, D4 5 7 अ(D5 व्य)गर्हन्त खिता सर्वा(D6 नार्यो), G1 व्यगर्हयन्स्त्रियो दु खात्, M4 गर्हयंति स्म दु खार्ता, Cg as in text —[d]) Ñ1 illeg for वाग्भिस्तोत्रै D3 वाग्यैस, D4 5 7 वाक्य- (for वाग्भिस्) Ś1 V1 D1–3 6 M4 द्विप (for द्विपान्)

6 [a]) Ñ2 न, V1 D1 2 4 5 M1 तु (for नु) V1 D2 गृहे (for गृहै) —[b]) Ñ2 B दारैर्वा(B1 °र)पि, V1 D1–5 7 M4 दारैर्वा किं(D3 किं वा [by transp]) (for किं दारै किं) —[c]) Ś1 Ñ2 V1 B D1–7 M4 प्राणैर् (for पुत्रैर्) Ñ1 B1 Dg1 Dt1 [अ]पि (for किं) V1 D3 G2 सुखर्वा किं, Dg1 किं सुखैर्वा, D4 5 7 सुतैर्वापि (for सुखैर्वापि)

7 [a]) Ś1 D4–7 स एक (D5 °प) पुरुषो, V1 Dd1 एक स पुरुषो, D1 एक सुपुरुषो, D2 एकस्तु पुरुषो (for एक सत्पुरुषो) —[c]) T1 * * . च्छति (damaged) (for योऽनुगच्छति) —[d]) D3 परि' , D3 5 परिचयन् (for परिचरन्) B3 वन (for वने)

☞ In Ś1 Ñ2 V1 B D1–7 the sequence of stanzas 8–16 (including star passages) is so complicated that it is given separately in a tabular form and is mostly ignored in the notes

Tabular conspectus of the sequence of stanzas 8–16 in Ś1 Ñ2 V1 B D1–7

Ś1	Ñ2	V1	B	D1	D2	D3	D4	D5	D6	D7
8	8	8	8	8	8	8	8	8	8	8
11^{ab}	11^{ab}	11^{ab}	11^{ab}	11^{ab}	11^{ab}	11^{ab}	11^{ab}	11^{ab}	11^{ab}	11^{ab}
12^{cd}	12^{cd}	12^{cd}	12^{cd}	12^{cd}	12^{cd}	12^{cd}	12^{cd}	21^{cd}	12^{cd}	12^{cd}
11^{c-f}	11^{c-f}	11^{c-f}	11^{c-f}	11^{c-f}	11^{c-f}	11^{c-f}	11^{c-f}	11^{c-f}	11^{c-f}	11^{c-f}
10	10	10	10	10	10	10	10	10	10	10
1036*		—	—	—	1036*	—	1036*	1036*	1036*	1036

11 9 10 आपगाः कृतपुण्यास्ताः पद्मिन्यश्च सरांसि च ।
येषु स्नास्यति काकुत्स्थो विगाह्य सलिलं शुचि ॥ ८
शोभयिष्यन्ति काकुत्स्थमटव्यो रम्यकाननाः ।
आपगाश्च महानूपाः सानुमन्तश्च पर्वताः ॥ ९
काननं वापि शैलं वा यं रामोऽभिगमिष्यति ।
प्रियातिथिमिव प्राप्तं नैनं शक्ष्यन्त्यनर्चितुम् ॥ १०

Ś1	Ñ2	V1	B	D1	D2	D3	D4	D5	D6	D7
12^{ab}	—	—	—	—	12^{ab}	—	12^{ab}	12^{ab}	12^{ab}	12^{ab}
9	9	9	9	9	9	9	9	9	9	9
1035*	1035*	1035*	1035*	1035	1035	1035	1035	1035*	1035*	1035
13^{ab}	13^{ab}	13^{ab}	13^{ab}	13^{ab}	13^{ab}	13^{ab}	13^{ab}	13^{ab}	13^{ab}	13^{ab}
14^{ef}	14^{ef}	14^{ef}	14^{ef}	14^{ef}	14^{ef}	14^{ef}	14^{ef}	14^{ef}	14^{ef}	14^{ef}
—	—	1038*	—	1038*	1038	1038	—	—	—	—
—	—	12^{ab}	—	12^{ab}	12^{ab} (r)	12^{ab}	—	—	—	—
16^{ab}	—	—	—	—	16^{ab}	—	16^{ab}	16^{ab}	16^{ab}	16^{ab}
1039 (14^{ab})	14^{ab}	14^{ab}	14^{ab}	14^{ab}	1039 (14^{ab})	14^{ab}	1039* (14^{ab})	1039 (14^{ab})	1039* (14^{ab})	1039* (14^{ab})
1040* (14^{cd})	1040 (14^{cd})	1040 (14^{cd})	1040 (14^{cd})	1040 (14^{cd})	1040 (14^{cd})	1040* (14^{cd})	1040* (14^{cd})	1040 (14^{cd})	1040 (14^{cd})	14^{cd}
15	15	15	15	15	15	15	15	15	15	15
16^{ab} (r)	16^{ab}	16^{ab}	16^{ab}	16^{ab}	16^{ab} (r)	16^{ab}	16^{ab} (r)	16^{ab} (r)	16^{ab} (r)	16^{ab} (r)
16^{cd}	—	—	16^{cd}	—	16^{cd}	16^{cd}	16^{cd}	16^{cd}	16^{cd}	16^{cd}
—	—	—	—	1039	—	—	—	—	—	—
—	13^{ab} (r)	13^{ab} (r)	13^{ab} (r)	13^{ab} (r)	—	13^{ab} (r)	—	—	—	—
13^{cd}	13^{cd} (illeg)	13^{cd}	13^{cd}	13^{cd}	13^{cd}	13^{cd}	—	—	13^{cd}	—

8 [a]) D2 lacuna for कृत Ś1 Dd1 Dm1 D2 6 च, M3 तु (for ता) —[b]) Ś1 Ñ2 B D1–3 6 M4 च वने शुभा.(D1 °भां), Ñ1 कमलानना, V1 च वने गुहा, D4 5 7 च शुभा वने (for च सरांसि च) —[c]) Ś1 D2–7 यासु यास्यति, Ñ2 B1–3 T3 G2 M1 3 यासु(B2 यास्तु, T3 G2 M1 3 येषु) पास्यति, V1 B4 य उपास्यति, Dg1 यासु स्नास्यति, D1 याश्च पास्यति, G1 3 एषु स्नास्यति, M4 यास्तु पश्यति (for येषु स्नास्यति) —[d]) V1 B1 4 Dt1 Dd1 Dm1 D1 2 5 T3 M2 4 शुचि (for शुचि)

9 The sequence in M4 is 11^{ab}, 12^{cd}, 11^{c-f}, 1038*, 12^{ab}, 10, 9, 1035*, 13^{ab} —[a]) Ś1 D2 4–7 रमयिष्यति, Ñ2 B लोभयिष्यंति (for शोभयिष्यन्ति) —[b]) D1 6 M3 अटव्या (for अटव्यो). Ś1 Ñ V1 B D1–7 M4 चित्रकानना (for रम्य°) —[c]) Ś1 Ñ1 D4 तथारूपा, V1 B1 D3 M4 सहानूपा, D2 6–7 तथानूपा, M3 महाकूला., Cr m g as in text, Cr*p* °रूपा (for महानूपा) —After 9, Ś1 Ñ V1 B D1–7 M4 ins

1035* स हि भर्ता सशैलाया वसुमत्या महायशा. ।
धर्मपालश्च लोकस्य वीरो दशरथात्मज ।

[D4 7 om] 1 —(l 1) D1 सशीलाया (sic), D5 सशीलाय (sic) (for सशैलाया) V1 M4 वसुधाया —(l 2) Ś1 Ñ V1 D2 5 धर्मपालस्य B1 रामो (for वीरो)]

10 For sequence in M4, cf v l 9 —[a]) B2 D2 4 चापि (for वापि) —[b]) M4 यद् (for य) Ś1 D6 [ऽ]तिगमिष्यति, V1 D1–3 T2 [ऽ]धिगमिष्यति, Dg1 Dt1 Dd1 Dm1 M3 [ऽ]नुगमिष्यति (for ऽभि°) G1 3 यं वा रामो गमिष्यति —B4 reads 10^{cd} in marg —[c]) D5 प्रियमिवातिथि —[d])

विचित्रकुसुमापीडा बहुमञ्जरिधारिणः ।
अकाले चापि मुख्यानि पुष्पाणि च फलानि च ।
दर्शयिष्यन्त्यनुक्रोशाद्गिरयो राममागतम् ॥ ११
विदर्शयन्तो विविधान्भूयश्चित्रांश्च निर्झरान् ।
पादपाः पर्वताग्रेषु रमयिष्यन्ति राघवम् ॥ १२

यत्र रामो भयं नात्र नास्ति तत्र पराभवः ।
स हि शूरो महाबाहुः पुत्रो दशरथस्य च ॥ १३
पुरा भवति नो दूरादनुगच्छाम राघवम् ।
पादच्छाया सुखा भर्तुस्तादृशस्य महात्मनः ।
स हि नाथो जनस्यास्य स गतिः स परायणम् ॥ १४

V1 एन, B1 M3 नैव, D5 तेन (for नेन) Ś1 V1 शिक्ष्य(V1 °श्य)न्ति, B1 2 4 Dg1 T3 G1 2 M1 शक्ष्यति, Cg k t as in text (for शक्ष्यन्ति) Ś1 D6 चार्चितु, Ñ B1-3 D1-3 5 मार्चितु, V1 B4 नार्चित, D4 चर्चितु, D7 चार्चितु, M3 [अ] नर्पितु (for [अ]नर्चितुम्) —After 10, Ś1 Ñ1 D2 4-7 ins

1036* विचित्रकुसुमैर्वृक्षैर्लम्बमञ्जरिधारिभिः ।

[D5 वृक्ष (for °क्षैः) D4 नव, D7 लन- (for लम्ब-) D5 7 -मजर- (for -मञ्जरि-)]

11 For sequence in M4, cf v 1 9 —^{a}) B1 -कुसुमापीता, B4 -कुसुमापीड —^{b}) Ś1 Ñ2 V1 B D1-7 M4 मजरिभृ (D4 5 7 मधुमजरि- [by transp]), Ñ1 मजरीजरि (for बहुमञ्जरि-) B2 -चारिण (for -धारिण) —After 11^{ab}, Dg1 Dt1 Dd1 Dm1 T G M1-3 ins

1037* राघव दर्शयिष्यन्ति नगा भ्रमरशालिनः ।

—^{cd}) Ś1 Ñ V1 B D1-7 M4 ह्यपि, Dd1 चापि, G1 चैव, G2 M1 [ऽ]पि च (by transp) (for चापि) Ś1 Ñ V1 B D1-7 M4 मुख्यानि फलानि, Dg1 पुष्पानि पु°, T1 2 G1 3 पुष्पाणि मुख्यानि (by transp) —In Ñ1, ^{ef} is illeg —^{e}) G1 दर्शयि यंति Ś1 D4 6 7 वृक्षेषु, Ñ2 V1 B D1-3 M4 सानूनि, D5 कुजेषु, T2 [अ]नाक्रोशाद् (for [अ]नुक्रोशाद्) —^{f}) Ś1 Ñ2 V1 B D1-3 6 M4 गिरिणा (for गिरयो) —After 11, Dg1 Dt1 Dd1 Dm1 S ins, V1 D1-3 ins after 14

1038* प्रस्रविष्यन्ति तोयानि विमलानि महीधरा ।

[D3 प्रभविष्यति, T1 °विशति, G2 M1 3 प्रस° (for प्रस्रविष्यंति) V1 D1 3 शैला हि (for तोयानि) Dd1 महीरुहा, M3 मणी° (for महीधरा) V1 D1-3 विमल(D2 निर्मल) वारि शीतल (for the post half)]

12 For sequence in M4, cf v 1 9 D2 repeats 12^{ab} after 1038* and then reads 16^{ab} repeating 16^{ab} in its proper place —Ñ2 B om 12^{ab} —^{a}) D5 विदर्शयति V1 D1-3(D2 second time) धातूनि(D3 °तूंश्च) (for विविधान्) —^{b}) Ś1 D2(first time) 5 6 धातूश्चित्राश्, V1 D1-3 (D2 second time) चित्रान्नम्याश्, D4 7 वास(D7 राम)चित्राश् (for भूयश्चित्राश्) Dd1 वीर्यवान्, D4 (after corr) निकुटान्, D6 नैर्ऋतान्, M3 निर्झरा (for निर्झरान्) —^{c}) Ś1 N B1-3 D1-7 M4 पर्वताग्रस्था(D1 6 M4 °स्थ),

V1 सर्वथा ग्रस्त, B4 पर्वताग्रस्ता (for पर्वताग्रेषु) —^{d}) V1 Dg1 D3 रमयिष्यति

13 For sequence in M4, cf v 1 9 Ñ2 V1 repeat (var) 13^{ab} after 16^{ab}, while B D3 repeat after 16 and D1 repeats 13^{ab} after 1039* —^{a}) Ś1 Ñ2 (first time) V1 (both times) D6 भवेद्भर्ता(Ñ2 °त्तत्र), Ñ2 B (all second time) न तत्रास्ति, B1 2 (both first time) [ऽ]भय तत्र, B3 (first time) [ऽ]भवत्तत्र, B4 (first time) D5 वसे(D5 भवे)न्निलय, Dg1 G M1 2 भय नास्ति, D1-3 (D1 3 both times) [ऽ]भवद्भर्ता, D4 7 [ऽ]भवत्तत्र, M4 [ऽ]भवद्भाता (for भय नात्र) —^{b}) Ñ2 (first time) नास्ति कश्चित्, Ñ2 B (all second time) भय न च(Ñ2 नैव), Dg1 तत्र तत्र, D4 7 नास्ति कस्य, G3 तत्र नास्ति (by transp) (for नास्ति तत्र) G1 पराभव —Ñ1 (illeg) D4 5 7 om 13^{cd} Ś1 D2 6 read 13^{cd} after 16, while Ñ2 V1 B D1 3 read after the repetition of 13^{ab} —^{d}) Ś1 Ñ2 V1 B D1 3 6 चै, D2 हि (for च)

14 ^{a}) B1 2 G2 पुरो V1 च याति (for भवति) Cr m k t (ऽ)दूरात्, Cg as in text —^{b}) T1 अनुगच्छति —For 14^{ab}, Ś1 Ñ1 D2 4-7 subst, while D1 ins after 16^{ab}

1039* तूर्णं तमनुगच्छामो यावद्दूरं न गच्छति ।

[D4 7 द्रुत (for तूर्णं)]

—Thereafter D1 repeats 13^{ab} —^{c}) Dt1 T1 2 Ct सुख भर्तुस्, Dd1 Dm1 सुखोदर्का, D4 7 सुख तस्य, G2 M1 सुखा तस्य (for सुखा भर्तुस्) —For 14^{cd}, Ś1 Ñ1 V1 B D1-6 subst

1040* पादच्छाया गतास्तस्य निवत्स्यामोऽकुतोभया ।

[B1 पादच्छाया V1 D1-3 सुखा, D4-6 सुख (for गतास्). Ś1 पादच्छायासुख Ś1 D6 सश्रयाम, V1 निवसामो (for निवत्स्यामो). V1 D1 [ऽ]कुतोभय]

—^{e}) Ś1 Ñ2 V1 B D1-3 5-7 [ऽ]स्य जगत, D4 [ऽ]स्य लोकस्य (for जनस्यास्य) —^{f}) V1 D1 2 सा गति, D3 चागति V1 D1 3 तत् (for second स) Ñ2 B2 4 D4 5 7 T2 G3 परायण, Cr m g l t °ण (as in text) —After 14, Ś1 D1-7 read 16^{ab} (var) for the first time, repeating it in its proper place —After 14, V1 D1-3 ins 1038*

वयं परिचरिष्यामः सीतां यूयं तु राघवम् ।
इति पौरस्त्रियो भर्तृन्दुःखार्तास्तत्तदब्रुवन् ॥ १५
युष्माकं राघवोऽरण्ये योगक्षेमं विधास्यति ।
सीता नारीजनस्यास्य योगक्षेमं करिष्यति ॥ १६
को न्वनेनाप्रतीतेन सोत्कण्ठितजनेन च ।
संप्रीयेतामनोज्ञेन वासेन हृतचेतसा ॥ १७
कैकेय्या यदि चेद्राज्यं स्यादधर्म्यमनाथवत् ।
न हि नो जीवितेनार्थः कुतः पुत्रैः कुतो धनैः ॥ १८
यया पुत्रश्च भर्ता च त्यक्तावैश्वर्यकारणात् ।
कं सा परिहरेदन्यं कैकेयी कुलपांसनी ॥ १९
कैकेय्या न वयं राज्ये भृतका निवसेमहि ।
जीवन्त्या जातु जीवन्त्यः पुत्रैरपि शपामहे ॥ २०
या पुत्रं पार्थिवेन्द्रस्य प्रवासयति निर्घृणा ।
कस्तां प्राप्य सुखं जीवेदधर्म्यां दुष्टचारिणीम् ॥ २१

15 ^{a}) B3 (also वने and वय in marg.) राम (for वयं) D3 परि॰॰ष्याम (damaged) —^{b}) D7 शूर (for यूयं) Ś1 Ñ B Dt1 Dd1 Dm1 D2.4-7 च (for तु) —^{d}) Ś1 ता समब्रुवन्, V1 B D1-3.5.7 ता स्त(B2 च त, D1.2 तास्त, D3.5 ॰स्त)दाब्रुवन्, T2 पर्यभर्त्सयन्, G2 M1 तास्तदब्रुवन्, G3 तास्तद्ब्रुवन्, D6 सुदु खार्तास्तदाब्रुवन्

16 Ś1 D2.4-7 repeat 16^{ab} here (cf v l 14 and 12) —^{a}) Ś1 V1 D1-3.6 (Ś1 D2.6 second time) रक्षन्, Ś1 D4.6.7 (all first time) [s]त्यर्थं, Ñ2 B नाथो, D2.5 (both first time) [s]त्वन, D4.5.7 (second time) रक्षा (for ऽरण्ये) —^{b}) Ś1 Ñ V1 B D1-7 (Ś1 D4-7 both times, D2 first time) करिष्यति(D2 [second time] ॰ते) —After 16^{ab}, Ñ2 V1 repeat (var) 13^{ab} (cf v l 13) and D1 ins 1039* —Ñ2 V1 D1 om (hapl) 16^{cd} —^{c}) G1 अस्माक जानकी सीता —After 16, B D3 repeat (var) 13^{ab} (cf v l 13)

17 ^{a}) Ś1 को न तेन, V1 B1.4 को ह्यनेन, B3 कोर्थं॰ (sic), D3.5 कस्त्वनेन, D6 को नु नेन (for को न्वनेन) Ś1 D6 प्रनीयेत, V1 D1 M4 प्रनीपेन (for [अ]प्रतीतेन) —Ś1 Ñ V1 B D1-7 M4 transp 17^{b} and 17^{d} —^{b}) Ñ V1 B D1.3.5.6 सू कठिनजनेन च (D3 ॰व), D4.7 शोकचित्तजनेन च —^{c}) B1 D7 सप्रीयेता मनोज्ञेन —^{d}) Ś1 D6 वास न, V1 B4 रामेण, B2 वालेन (for वासेन) Ś1 V1 D1-3.6 [उ]द्विग्नमानव , Ñ B D4.5.7 M4 [उ]द्विग्नचेतसा(B3 D4.7 ॰सा, M4 ॰न), G1.3 M2.3 ॰तेजसा, Cm g k t as in text (for हृतचेतसा)

18 M4 om 18 —^{a}) Ś1 V1 D1-3.6 यदिह, Ñ B D4.5.7 चेदिह(B4 ॰त [sic]) (for यदि चेद्) D1 वान्य, D4.7 राष्ट्रं, T2 राज्यं (for राज्य) —^{b}) V1 B3.4 D1.2.6.7 T2 - G2.3 M3 Ck अधर्मम्, Cm g t as in text (for ॰र्म्यम्) —^{c}) Ś1 Ñ2 V1 B1-3 D1-3.6 नात्र, B4 अत्र (for न हि) D5 [अ]र्थं (for [अ]र्थः) —B2 reads 18^{d} in marg —After 18, Ś1 Ñ2 V1 B D1-7 read 21^{ab}

19 ^{a}) Ś1 B2 D1-3.5 यया T2 पुत्राश् —^{b}) V1 त्यक्त, B2 Dg1 त्यक्तश्, G1 यया (for त्यक्ता) B1.2.4 Dt1 T2 ऐश्वर्य॰ —^{c}) Ś1 D1-3.6 M4 न सा (M4 क सं) स(D3 सु) रक्षितु शक्ता, Ñ V1 B D4.5.7 क थ सा (V1 न च सा) रक्षितु शक्ता (D4.7 शक्या) —^{d}) Ñ2 B3 D6 कुलपाशनी, V1 B1 ॰पाशुली, B2 Dg1 D1-3 ॰पाशुनी(D1 ॰ना), B4 T1.2 G M1.2 ॰पासिनी, M4 भर्तृघातिनी (for कुलपासनी)

20 ^{a}) D6 M2 वन (for वय) D2 न कैकेय्या नवं राज्ये —^{b}) Ś1 भृतका निवसीमहि, Ñ भृता अपि वसेमहि V1 भृत्याः क्वापि वसेमहि, B भृता अपि वसेम, B3 वसे न) वें, Dt1 Dd1 Dm1 भृतका हि वसे॰, D1-5.7 भृतका(D2 ॰ताका, D3 ॰त्यका)पि वसे॰, G3 M3 हृतकामा वसे॰, M2 भृतकामा वसे॰, Cm g as in text —^{c}) Ś1 B1.3 D6 M3.4 जीवत्या, Dm1 जीवत्या, D3 जीवित्या, D5 जीवंतो, Cm as in text (for जीवन्त्या) Ś1 V1 D1.2.6 साधु, B1 तु न, B2 G2 M1.2 न तु D3 नानु-, G1 ननु, M3 अनु- (for जातु) Ś1 V1 B1.2 D1-3.6 जीवाम , Ñ2 B3 जीवेम, D5 जीवन्या (for जीवन्त्य) —^{d}) Dm1 T3 G1.2 M1-3 शपाम, Dm1 ॰मि) व (for शपामहे)

21 Ś1 Ñ2 V1 B D1-7 read 21^{ab} after 18 —^{b}) Ś1 Ñ2 B D4-7 प्रव्राजयति, M4 प्रस्थापयति (for प्रवासयति) V1 D1-3 प्रव्राजयितुमिच्छति —After 21^{ab}, Ś1 Ñ V1 B D1-7 ins , M4 after 21

1041* इच्छेद्यदि महाराजस्त राज्ये नाभिषेचितुम् ।
न हि जातु चिरं जीवेद्राजा परमदु खित ।
गते दशरथे स्वर्गमधर्मं प्रतिपत्स्यते ।

[M4 om l 1 —(l 1) V1 तान्, D1.6 ता, D5 ते (for त) Ñ2 B3 राज्ये च (for राज्ये न) D3.5 अभिषे(D5 ॰षिं) चयेत् —(l 2) D3 च (for हि) B2 राजा जीवेत (by transp) Ñ1 damaged, D4.5.7 धार्मिक (for दुखित) —(l 3) B2.4 अवनें , B3 D5 ॰र्थं (for अधर्मं) V1 M4 प्रतिपत्स्यति]

—Ś1 Ñ V1 B D1-7 om 21^{cd} —^{d}) T2 अधर्मां, G1 ॰र्थं (for ॰धर्म्यां) —After 21, Dg1 Dt1 Dd1 Dm1 S ins

1042* उपद्रुतमिदं सर्वमनालम्बमनायकम् ।
कैकेय्या हि कृते सर्वं विनाशमुपयास्यति ।

[(l 1) Dg1 Dt1 Dd1 अनालम्भम्, M3 निरालम्बम्, M4 damaged (for अनालम्बम्) —(l 2) Dt1 Dd1 Dm1 तु (for हि) T3 कृत (for कृते) Dg1 राष्ट्रं, T1.3 G2.3 M1.4 राष्ट्र, M2 सत्र (for सर्वं)]

न हि प्रव्रजिते रामे जीविष्यति महीपतिः ।
मृते दशरथे व्यक्तं विलोपस्तदनन्तरम् ॥ २२
ते विषं पिबतालोड्य क्षीणपुण्याः सुदुर्गताः ।
राघवं वानुगच्छध्वमश्रुतिं वापि गच्छत ॥ २३
मिथ्या प्रव्राजितो रामः सभार्यः सहलक्ष्मणः ।
भरते संनिसृष्टाः स्मः सौनिके पशवो यथा ॥ २४

तास्तथा विलपन्त्यस्तु नगरे नागरस्त्रियः ।
चुक्रुशुर्भृशसंतप्ता मृत्योरिव भयागमे ॥ २५
तथा स्त्रियो रामनिमित्तमातुरा
यथा सुते भ्रातरि वा विवासिते ।
विलप्य दीना रुरुदुर्विचेतसः
सुतैर्हि तासामधिको हि सोऽभवत् ॥ २६

इति श्रीरामायणे अयोध्याकाण्डे द्विचत्वारिंशः सर्गः ॥ ४२ ॥

---

22 [a]) B1 D4 7 G2 M1 प्रव्राजिते —[c]) Ś1 दशरथ Dd1 व्यक्ते (for व्यक्त) T2 मृते दशरथेऽयुक्त —[d]) Ś1 Ñ V1 B Dg1 D1-7 M4 Cg विलापम् (for विलोपम्) D1 अनुत्तर, D2 अनतर

23 Ś1 Ñ V1 B D1-7 transp 23 and 24 (including 1043*) Ñ2 B transp 23^{ab} and 23^{cd}, repeating 23^{cd} in its proper place —[ab]) Ñ2 B विष वा (for ते विष) D1 2 T2 पिबता (for पिबत) V1 सुदुर्गमा, B1 4 च दुर्गता, D2 T2 G3 सु(T2 तु)निर्गता, T3 तु दुर्गता, Cg as in text (for सुदुर्गता) Dt1 T1 G2 M1 2 4 क्षीणपुण्या स्म (T1 स्थ, M1 °थ) दुर्गता (Dt1 G2 M1 दु खिता) (for [b]) M3 [आ]लो॰॰णपुण्या स्थ दुर्गता (lacuna) —[c]) V1 B1 4 (B1 4 second time) च, Dg1 om (for वा) V1 [अ]नुगच्छ त्व, G2 M1 [अ।पि गच्छध्वम् (for [अ]नुगच्छध्वम्) Ñ2 B (all second time) अनुगच्छत वा राम —[d]) Ś1 Ñ B (Ñ2 B1 2 3 both times, B4 second time [first time विनाश]) प्रणाश, V1 प्रणाम, Dg1 M2 अश्रुत (for अश्रुति) Ś1 मानुगच्छत, Ñ1 V1 B2 3 (B2 3 first time) M4 (before corr) वानु°, Dt1 चापि गच्छत, Dm1 वापि गच्छथ, M4 वा निगच्छत (for वापि गच्छत)

24 Ś1 Ñ V1 B D1-7 transp 23 and 24 —[a]) Ś1 Ñ2 B1-3 D1-4 6 T1 2 M3 4 Cv k प्रव्रजितो, Cm g t प्रव्रा° (as in text) —[b]) T1 2 G1 3 ससीत (for सभार्य) Ś1 Ñ V1 B D1-7 सीता लक्ष्मण एव च —[c]) Dg1 Dd1 T1 2 G2 3 M1-3 Cm k संनिविष्टा स्म, Dt1 Ct संनिबद्धा स्म, Dm1 संनिविष्टस्ते, G1 °विष्टात्मा, M4 °कृष्टा स्म, Cv g as in text (for संनिसृष्टा स्म) —[d]) Dg1 शौनक, Cg नानि° (as in text) —For 24^{d}, Ś1 Ñ V1 B D1-7 subst

1043* भरताय ।भिसृष्टा स्म रुद्राय पशवो यथा ।

[Ś1 विदिष्टा स्म, V1 D1-3 निसृष्टा स्म (V1 मे), B3 [अ]तिसृष्टा स्म, D4 6 7 विसृष्टा स्म, D5 च विसृष्टा (for [अ]भिसृष्टा स्म) B1 क्षेत्राय, B2 D3-7 क्षुद्राय, Dd1 क्षुत्काय, G(ed) याग्याय (for रुद्राय)]

—After 24, Dg1 Dt1 Dd1 Dm1 S ins

1044* पूर्णचन्द्रानन श्यामो गूढजत्रु रेन्दम ।
आजानुबाहु पद्माक्षो रामो लक्ष्मणपूर्वज ।
पूर्वाभिभाषी मधुर सत्यवादी महाबल ।
सौम्यश्च सर्वलोकस्य चन्द्रवत्प्रियदर्शन ।
नून पुरुषशार्दूलो मत्तमातङ्गविक्रम । [5]
शोभयिष्यत्यरण्यानि विचरन्स महारथ ।

[(l 3) G2 M1 पूर्वभाषी च M3 मतिमान् (for मधुर) —(l 4) Dt1 -लोकश्च, T3 M4 सर्वस्य (for -लोकस्य) —(l 6) G2 M1 महाबल (for महारथ)]

25 [a]) G3 ततो (for तथा) Dg1 G1 3 च (for तु). —[b]) M4 नगर, T1 G1 M2 नागरा (for नागर-) —[c]) Dg1 M3 दु खसंत्रस्ता, Dt1 Dd1 Dm1 M2 4 दु खसंतप्ता —[d]) M1 समागमे (for भया°) —For 25, Ś1 Ñ V1 B D1-7 subst

1045* विलेपुरेवमार्तास्ता नगरे नागरस्त्रिय ।

[Ś1 B2 D3 नगर, D2 4 5 7 नागरा (for नागर-)]

—D1 cont

1046* बहुमुत्सृज्य कल्याणी शोकतोद्विग्नमानसा ।

—After 25, Dg1 Dt1 Dd1 Dm1 S ins

1047* इत्येव विलपन्तीना स्त्रीणा वेश्मसु राघवम् ।
जगामास्त दिनकरो रजनी चाभ्यवर्तत ।
नष्टज्वलनसपाता प्रशान्ताध्यायसत्कथा ।
तिमिरेणानुलिप्तेव तदा सा नगरी बभौ ।
उपशान्तवणिक्पण्या नष्टहर्षा निराश्रया । [5]
अयोध्या नगरी चासीन्नष्टतारमिवाम्बरम् ।

[(l 1) M4 वेश्मनि (for वेश्मसु) —T1 damaged for l 2 —(l 2) T2 न (for च) —(l 3) Dg1 T3 -सताप (for -सपाता) Dm1 T1 2 G2 3 M1 Ck शान्ताध्ययन-, Cm g t as above (for प्रशान्ताध्याय) G2 M1 सत्क्रिया —(l 4) Dt1 [अ]नुलिप्त च Dg1 तिमिरेणाभिलिप्तेव, G1 तिमिरेणेवलिप्त° (for the prior half) Dg1 सा तथा, Dt1 तत्तदा, T2 M2 3 सा (T2 स) तदा, T3 नगर, G3 तथा सा, M4 बभूव (for तदा सा) Dt1 नगर, T3 सा तदा (for नगरी) Dt1 भवत, M4 तदा (for बभौ) —(l 5) M2-4 उपशान्त(M2 °न्त्य) M4 नष्टाहारा (for नष्टहर्षा) —(l 6) T3 [अ]पि (for [आ]सीन्)]

26 [a]) Ś1 D4-7 इति, Ñ2 B3 4 अथ (for तथा) Ś1 D4-7 स्म ता (for स्त्रियो) D1 राज (for राम-) M3 -निवृत्तम् (for -निमित्तम्) D2 रामनिमित्तकारणात् —[b]) Ś1

४३

रामोऽपि रात्रिशेषेण तेनैव महदन्तरम् ।
जगाम पुरुषव्याघ्रः पितुराज्ञामनुस्मरन् ॥ १
तथैव गच्छतस्तस्य व्यपायाद्रजनी शिवा ।
उपास्य स शिवां संध्यां विषयान्तं व्यगाहत ॥ २
ग्रामान्विकृष्टसीमान्तान्पुष्पितानि वनानि च ।
पश्यन्नतिययौ शीघ्रं शनैरिव हयोत्तमैः ॥ ३
शृण्वन्वाचो मनुष्याणां ग्रामसंवासवासिनाम् ।
राजानं धिग्दशरथं कामस्य वशमागतम् ॥ ४

D4 6 7 पितुर् (for सुते) B1 भर्तरि (for भ्रातरि) Ñ B निपातिते (B1 °त), D2 [अ]तिसर्जिते (for विवासिते) —c) G2 M1 विलप्यमाना D3 रु.हू (for रुरुदुर्) Ś1 V1 D1–3 6 सुदुःखिता, Ñ2 B M4 विचेतनास्, Dg1 विचेतना (for विचेतस) —d) D2 सुतो (for सुतैर्) Dt1 [ऽ]पि (for second हि) Ś1 V1 D1–7 M4 स राघव, Dg1 हि नोभवत् (for हि सोऽभवत्) Ñ B तासां सुतेभ्योभ्य (Ñ2 B4 °भ्य) धिग्गो हि राघव —After 26, Dg1 Dt1 Dd1 Dm1 S ins :

1048* प्रशान्तगीतोत्सवनृत्यवादना
व्यपास्तहर्षा पिहितापणोदया ।
तथा ह्ययोध्या नगरी बभूव सा
महार्णवः संक्षुभितोदको यथा ।

[(l 1) M4 -नृत्तोत्सव- Dt1 Dd1 T1 G1 3 M1–3 Cm -नृत्त, M4 -गीत- (for -नृत्य). Dg1 T3 M2–4 -वादिता (T3 °ना), T1 2 -वाद्या, G2 M1 -वादिनी, G3 -वाद्यभा (for -वादना) —(l 2) Dt1 Dd1 Dm1 विभ्रष्ट, M3 व्यपास्य (for व्यपास्त) Dd1 पिहिता महोदया —(l 3) Dt1 T3 M2 4 तदा, M3 om (for तथा) M4 तु (for हि) —(l 4) Dg1 Dt1 Dd1 T3 G3 Cv m g t सक्षपि (T3 °क्षिप)तोदको, K(ed) सक्षिपितोदको, Cr t p as above (for संक्षुभितो°)]

Colophon —*Sarga name* Ś1 Ñ B नगर (Ñ1 illeg)-स्त्रीविलाप, V1 D1 3 4 6 7 स्त्रीविलाप, D2 नागरिकस्त्रीविलाप, D5 पौरस्त्रीविलाप —*Sarga no* (figures, words or both) Ñ1 B1 D3 5 om Ś1 D4 7 49, Ñ2 B4 44, V1 46, B2 35, B3 43 Dg1 Dt1 Dd1 Dm1 D2 T G M1–3 48, D1 101, D6 47, M4 45 —After colophon, D6 G M1 conclude with श्री (D6 om) रामाय नमः, T2 श्रीरामचन्द्राय नमः

43

Dm1 begins with ॐ, M2 श्रीरामाय नमः

2 b) Ś1 Ñ V1 B D1–7 M4 प्रभाता, M1 व्यपेयाद् (for व्यपायाद्) Ś1 Ñ B D4 6 7 शुभा, D3 प्रिया (for शिवा) —c) Ñ V1 B D1–3 M4 [अ]थ, Dt1 Dd1 Dm1 T1 तु (for स) Ñ1 तत (for शिवां) —d) Dt1 व्यगाहयत् Ñ V1 B D1–3 M4 प्रययौ राघवः पुनः, B(ed) विषयान्तमगाहत —For 2cd, Ś1 D4–7 subst

1049* उपस्थाय ततः संध्यां तथैवाभ्युदिते रवौ ।

[D4 5 7 उदिते विमले (for तथैवाभ्युदिते)]

—Ś1 D4–7 cont, while Ñ V1 B D1–3 M4 ins after 2

1050* ततः स्यन्दनमविष्टाय सभार्यः सपरिच्छदः ।
श्रीमतीमाकुलावर्तामतरत्तां महानदीम् ।
तामुत्तीर्य महाबाहुः श्रीमच्छिवमकण्टकम् ।
प्रपेदे स महामार्गमनुरूपं शिवं शुभम् ।

[Cf 2 41 27–28 —(l 1) Ñ B3 तत- (for ततः) V1 D1–3 M4 राघवः (for सभार्यः) Ś1 D4–7 प्रययौ (Ś1 D6 °तस्थे) राघवस्तदा (for the post half) —After l 1, B3 ins

1050(A)* हृष्टरूपोऽभवद्रामो राज्यं लब्ध्वा यथापरः ।

—(l 2) Ś1 B4 D4 6 7 गोमतीम् (for श्री°) V1 D1 2 M4 श्रीमद्भागकुलावर्ताम् (for the prior half) Ś1 D4–7 वै (for ता) M4 तमसा नदी (for ता महा°) —(l 3) D2 M4 तामुत्तार्य, D5 समुत्तीर्य V1 D1–3 M4 समम् (for शिवम्) Ś1 B2 (bef corr) D4 6 7 अकर्दमं (for अकण्टकम्) —(l 4) B3 reads स in marg. V1 D1–3 M4 प्रतिपेदे V1 महाबाहुर् (bef corr. °राज) Ś1 D4–7 प्रपेदे तममार्गम् (D4 ग्रामम्) (for the prior half) V1 D1–3 सुखं (for शुभम्).]

3 a) D7 ग्रामा Ñ सुहृष्ट, V1 प्रहृष्ट-, D2 3 प्रकृष्ट, M3 द्विकृष्ट- (sic) (for विकृष्ट-) Ś1 D6 सुकृष्टसीमांश्च, Ñ2 B2 3 दृष्टसु (B3 °कृ)ष्टसीमान्स्, B1 D4 5 7 सुकृष्टसीमांश्च (D4 5 7 °मान) B4 सुहृष्टान्मान्स्, D1 M4 प्रकृष्टसीमान्तान् (M4 °मान्दि) —b) B1 पुष्पाणि च (for पुष्पितानि) —c) Ś1 D6 एव, Ñ1 B D2 5 अपि, V1 M4 अभि-, Dt1 इति, D4 7 इव (for अति) Ś1 D4–7 शीघ्रैः, D2 राम (for शीघ्रं) —d) D3 damaged for च हयो Ś1 D6 श्वेतैरेव, Ñ B D1–5 7 M4 (af corr as in text) श्येनैरिव, Dt1 Ck t p शैरिव, Cv r m g t as in text (for शनैरिव). D3 महोत्तमैः

4 a) D5 वादान्, M4 रामो (for वाचो) —b) V1 D1–3 सीमान्त-, M4 -सामन्त (for संवास-) Ñ2 B ग्रामसवासिना तदा (B2 °था) —After 4ab, Dd1 Dm1 M1 2 ins :

1051* निगर्हिता हि कैकेयी क्रूरा क्रूरेण कर्मणा ।

[M1 विगर्हिता Dd1 reads क्रूरा in marg]

—d) D3 damaged for का स्य and व D5 वलज- (for कामस्य) Ś1 Ñ V1 B D1 2 4–7 M4 वशवर्तिनं, Dg1 Dt1 Dd1 Dm1 M2 3 °मास्थितं, D3 °वर्तिनी (sic) (for °मागतम्).

हा नृशंसाद्य कैकेयी पापा पापानुबन्धिनी ।
तीक्ष्णा संभिन्नमर्यादा तीक्ष्णे कर्मणि वर्तते ॥ ५
या पुत्रमीदृशं राज्ञः प्रवासयति धार्मिकम् ।
वनवासे महाप्राज्ञं सानुक्रोशमतन्द्रितम् ॥ ६
एता वाचो मनुष्याणां ग्रामसंवासवासिनाम् ।
शृण्वन्नति ययौ वीरः कोसलान्कोसलेश्वरः ॥ ७
ततो वेदश्रुतिं नाम शिववारिवहां नदीम् ।
उत्तीर्याभिमुखः प्रायादगस्त्याध्युषितां दिशम् ॥ ८
गत्वा तु सुचिरं कालं ततः शीतजलां नदीम् ।
गोमतीं गोयुतानूपामतरत्सागरंगमाम् ॥ ९
गोमतीं चाप्यतिक्रम्य राघवः शीघ्रगैर्हयैः ।
मयूरहंसाभिरुतां ततार स्यन्दिकां नदीम् ॥ १०
स महीं मनुना राज्ञा दत्तामिक्ष्वाकवे पुरा ।
स्फीतां राष्ट्रावृतां रामो वैदेहीमन्वदर्शयत् ॥ ११

5 D3 om (hapl ?) 5 —a) Ñ1 धिङ् and [अ]थ (for हा and [अ]द्य) Ś1 D4–7 नृशंसा बत, M3 हा हा नृशंसा —b) D4 यान्नौ (for पापा) Ñ1 पापानुवर्तिनीं (sic), G2 °नाधिनी (for °बन्धिनी) —c) Dt1 Dd1 T1 तीक्ष्ण, G3 M2 तीद्ष्णा, Cm g °क्ष्णा (as in text) Ś1 D4 6 7 सा (for सं-) —d) Ś1 D4–7 क्रूरे, Dg1 Dt1 Dd1 Dm1 T1 G3 तीक्ष्ण, T2 G1 क्षुद्र, M3 तीव्र- (for तीक्ष्णे) —For 5, Ñ2 V1 B D1 2 M4 subst .

1052* धिङ्नृशंसा च कैकेयीं पापां पापानुवर्तिनीम् ।
तीक्ष्णां संभिन्नमर्यादां क्रूरकर्मानुसेविनीम् ।

[(l 1) M4 पापानुदर्शिनीं —(l. 2) Ñ2 तीक्ष्णा- G(ed) सारिणीं (for -सेविनीम्) V1 D1 2 M4 क्रूरे कर्मणि वर्तिनीं (for the post half)]

6 a) D3 damaged for या पुत्र —V1 om (hapl ?) 6bc —b) Ñ B M4 विवासयति, D2 प्रव्राजयति (for प्रवासयति) D2 T3 G2 M1 4 राघव —c) D1–3 महारण्ये, M4 महाशूर (for वनवासे) G2 M1 महात्मान (for °प्राज्ञ) Ś1 Ñ B D4–7 अरण्याय महात्मानं —d) Ś1 Dg1 Dt1 Dd1 Dm1 D6–7 T3 G2 M1 जितेंद्रिय (for अतन्द्रितम्) —After 6, Dg1 Dt1 Dd1 Dm1 S ins

1053* कथं नाम महाभागा सीता जनकनन्दिनी ।
सदा सुखेष्वभिरता दुःखान्यनुभविष्यति ।
अहो दशरथो राजा निःस्नेहः स्वसुतं प्रियम् ।
प्रजानामनघं रामं परित्यक्तुमिहेच्छति ।

[Dt1 om l 1–2 —(l 3) M3 स सुतं, M4 परम- (for स्वसुतं) Dt1 Dd1 Dm1 G2 M1 प्रति (for प्रियम्) —(l 4) Dg1 [इ]च्छते (sic)]

7 a) D3 damaged for चो and ष्या —b) Ś1 Ñ V1 B D1–7 M4 शृण्वन्राघवनि (Ś1 Ñ1 D4–7 पथि ग्रामेषु) राघव —c) Ś1 D4–7 अपि (for अति) M2 3 राम (for वीर) Ñ B M4 अचिरेणात्य (B3 4 °भ्य, M4 °न्त्र)गाद्वीर, V1 D1 2 अचिरादभ्ययाद्वीर, D3 अचिरादभ्ययाद्वेर (corrupt) —d) Dd1 कोमलान् (sic), D3 कोशलयान् (sic), D5 कुशली, M3 कौसलान्, M4 कोसल (for कोसलान्) Ś1 D4 6 7 कौसल्यानन्द (D7 °दि)वर्धन

8 Ś1 D6 om 8 and 9 —a) Dg1 देव- (meta) (for वेद-) Ñ1 V1 D1 2 4 5 7 -स्मृति, B1 -श्रुती, Dg1 -श्रुतीं, Dt1 श्रुतिर् (corrupt) (for श्रुति) —b) Dg1 M2 3 शीत, D4 7 शिवा (for शिव-) T3 G1 2 M1 2 -तोय, Cm k t as in text (for वारि-) Ñ V1 B D1–3 G3 शिवावर्तां (V1 °ववारि [sic], D1–3 G3 °ववारि) महानदीं —After 8ab, D2 reads 9cd —c) V1 D2 5 (bef corr) M3 उत्तार्य Ñ2 -मुस (sic), Dg1 -मुख (for -मुख.) —d) B3 निशं (sic) (for दिशम्)

9 Ś1 D6 om 9 (cf v l 8) —a) Ñ V1 B1 2 D1 2 5 7 M4 यात्वा तु, B3 4 स्नात्वा तु (B3 [m also] गत्वा च), D4 पीत्वा स (for गत्वा तु) —b) G2 तव (sic) (for तत) G2 3 M3 शिव-, M2 शील- (sic) (for शीत-) Dt1 Dd1 Dm1 -वहा (for -जला) B1 शुभा (for नदीम्) —D2 reads 9cd after 8ab —c) D1 गोतमीं, D7 गोमतीं (for गोमतीं) Ñ V1 B D1–5 7 गोकुलाकीर्णाम्, M4 गोचरानूपाम् —d) V1 अगमत्, G2 अतर (sic) (for अतरत्) Ñ2 B2–4 स त्वरन्निव, B1 ता महानदीं —After 9, D1 ins

1054* गोतमीं वासमकरोत्स्यन्दनेन हयोत्तमैः ।

10 a) Ñ2 B समतिक्रम्य, V1 D1 2 चापि निष्क्रम्य, Dg1 चाप्युपक्रम्य, D3 चाथ विक्रम्य, D4 वाप्यतिक्रम्य —b) Ñ2 B तत प्रजवि (B1 प्रव)तैर्हयैः —c) D5 -सिंह- (for -हंस-) Dm1 -[अ]भिरताम्, D7 -[अ]भिहता (for -[अ]भिरुता) —d) Ś1 D4 6 7 सस्मार, Ñ1 Dd1 Dm1 D2 5 T3 अतरत्, Ñ2 ननतार (corrupt) (for ततार) Ś1 Ñ1 D1 3 5–7 M4 सरयूं (D3 °यू), Ñ2 B2 ऋषिका, V1 च सतीं, B1 4 ऋषिकां, B3 (m also as in B1) शयिका, Dg1 स्यन्दकीं (for स्यन्दिकां)

11 a) B4 महतीं, M1 स नदीं (for स महीं) M3 moth-eaten for नुना रा —b) Ñ2 B1 D2 5 M3 दत्वास्य (sic) Ś1 D4 7 चेक्ष्वाकवे —c) Ś1 Ñ V1 B1–3 D1–7 G2 M1 4 स्फीत (for स्फीतां) Ś1 D6 -राष्ट्रवर्तीं, Ñ2 B2 3 D4 7 -राष्ट्रभृ (D4 °धृ, D7 °वृ)तां, B1 D5 -राष्ट्र च तां (D5 वृतां), D2 राष्ट्राभिमां, T M2 Ct राष्ट्रं, Cm g k as in text (for राष्ट्रावृतां) B4 स्फीतराष्ट्रं च गोग्राम (sic) —d) T3 G1 अनुदर्शयन् Ś1 Ñ V1 B1 D1–7 M4 वैदेहीं समदर्शयत् (Ñ1 °वेद)यत

11 सूत इत्येव चाभाष्य सारथिं तमभीक्ष्णशः ।
13 12 हंसमत्तस्वरः श्रीमानुवाच पुरुषर्षभः ॥ १२
कदाहं पुनरागम्य सरय्वाः पुष्पिते वने ।
मृगयां पर्यटिष्यामि मात्रा पित्रा च संगतः ॥ १३

नात्यर्थमभिकाङ्क्षामि मृगयां सरयूवने ।
रतिर्ह्येषातुला लोके राजर्षिगणसंमता ॥ १४
स तमध्वानमैक्ष्वाकः सूतं मधुरया गिरा ।
तं तमर्थमभिप्रेत्य ययौ वाक्यमुदीरयन् ॥ १५

इति श्रीरामायणे अयोध्याकाण्डे त्रिचत्वारिंशः सर्गः ॥ ४३ ॥

---

12 ^{a}) Ś1 Ñ1 V1 B1 2 4 Dd1 D1-7 G2 M1 2 4 [ए] वमाभाष्य —^{b}) D4 अभीक्ष्ण (subm) (for अभीक्ष्णश). —^{c}) Ś1 Ñ V1 B D2-7 T2 M4 मत्तहंस- (by transp) Ś1 D6 स्वन, G1 2 -स्वरा (sic), M3 -चर (for स्वर) D1 लक्ष्मणानुचर श्रीमान —^{d}) B1 पुरु र्षभ, B4 D3 पुरुषर्षभ, Dt1 Dd1 Dm1 पुरुषोत्तम

13 ^{a}) Dd1 वद (for कदा) Ś1 B4 D4-7 आगत्य (for °म्य) D1 कुर्वन्राजा पुन सूत (sic) —^{b}) V1 सरव्व (for सरय्वा) Ś1 D4-7 सलिले शुभे (for पुष्पिते वने) —^{d}) Ś1 Ñ V1 B D1-7 M4 पित्रा मात्रा (by transp), M3 माता पित्रा (sic) —After 13, Ñ V1 B Dg1 Dm1 D1 2 S Cv r m g t ins, while Dt1 ins after 14, whereas D3 ins l 1 after 13 and l 2 after 14

1055* राजर्षीणां हि लोकेऽस्मिन्नत्यर्थं मृगया वने ।
काले वृतां तां मनुजा धन्विनामभिकाङ्क्षिताम् ।

[(l 1) Ñ2 V1 B1 4 Dg1 D2 च (for हि) T2 राजर्षिभिर् Ñ B2 3 अ य य, D1-3 T3 अत्यथ (for त्यर्थं) B1 2 4 G1 मृगया —(l 2) Ñ1 Dt1 वृता ता, Ñ2 B D3 M4 वृताना, V1 D1 2 वृतानां T3 lacuna for वृ (for वृता ता) V1 D2 अभिकाङ्क्षा, B2 अनुकाङ्क्षिणा, D1 °णा (for अभिकाङ्क्षिताम्) Ñ B3 धन्विना (B3 [m. also] °न [sic]) मनुकाङ्क्षिभि (Ñ1 °णा), B4 वधुनमनुकाङ्क्षिणा (for the post half)]

14 ^{a}) Ś1 D4 6 7 इत्येवम्; Ñ V1 B D1-3 5 G2 M1 4 अ (Ñ1 इ) त्यर्थम्, G1 रत्यर्थम्, Cv r m g h t (as in text) (for नात्यर्थम्) B4 अनु- D7 इह (for अभि-) T1 -काक्षा*, M4 -काक्षेय (for काङ्क्षामि) —^{b}) T1 गया (for मृ°) V1 शरयू- Ś1 D6 -तटे (for -वने) —^{c}) Ś1 D6 गतिर् (for रतिर्) B1 येषा (for ह्येषा) Ś1 D4-7 परा, Ñ B1 3 सता, V1 D1-3 M4 सदा, B2 4 मदा (for [अ]तुला) —^{d}) Ś1 Ñ V1 B D1 2 4-7 M4 -सेविता, D3 -सद्गृता (for -समता). —After 14, Dt1 ins 1055* and D3 ins l 2 of 1055*

15 ^{a}) M4 तद् (for तम्) Ś1 Ñ V1 B D2 4-7 M4 इक्ष्वाकु, Dm1 D1 G2 ऐक्ष्वाकु, Cg 1 °क (as in text). —^{b}) Ś1 Ñ B D4-7 सर्वं मधुरजल्पकः, V1 D1-3 M4 रामो दशरथात्मज —^{c}) Ñ1 V1 D1-5 अभिप्रेक्ष्य (D1 °क्ष्य) —After 15, (bef colophon) Ñ V1 B D1 3 M3 read 1056*, 1^{cd} (M4 first occurrence) and 1058(C)* of Sarga 44

Colophon Ś1 D2 4-7 om (Sarga cont) —*Sarga name* Ñ V1 B D1 3 शृङ्गवेरपुराभिगमन (Ñ1 °पुरगमनः D1 3 °पुरगमन) —*Sarga no* (figures, words or both) Ñ1 V1 B1 D3 om, Ñ2 B4 45, B2 35, B3 44, Dg1 Dt1 Dd1 Dm1 I G M1-3 49, D1 102, M4 46 —After colophon, T2 concludes with श्रीरामचन्द्राय नम, G श्रीरामाय नम.

४४

विशालान्कोसलान्रम्यान्यात्वा लक्ष्मणपूर्वजः । आससाद महाबाहुः शृङ्गवेरपुरं प्रति ॥ १

44

Ś1 D2 4–7 continue the previous Sarga M1 2 begin with श्रीरामाय नम

1 Ñ V1 B D1 3 read st 1 (including 1056*) before colophon of 2 43 —^{a}) M4 विगाढ (for विशालान्) —^{b}) G1 ज्ञात्वा, M4 वीरो, Cv as in text (for यात्वा) —For 1^{ab}, Ś1 Ñ V1 B D1–7 subst, M4 ins before colophon after 2 43 15

1056* यात्वा चामरसंकाशं शीघ्रं शीघ्रपराक्रम ।

[Ś1 D4–7 गत्वा, V1 पथा, B1 3 4 यद्वा (for यात्वा) Ś1 V1 D1–7 M4 देव (for [अ]मर-) B4 राम (for शीघ्र)]

—Ñ V1 B D1 3 read 1^{cd} after 1056*, Dg1 Dt1 Dd1 Dm1 T G M1–3 read 1^{cd} after 1062* (preceded by st 3), M4 reads 1^{cd} for the first time after 1056*, repeating it after 1062* —^{c}) Ś1 Ñ1 D4–7 अगमसाद सायाह्ने, Ñ2 V1 B D1–3 M4 आससाद च (V1 D1 2 °दाथ, B1 2 4 M4 [first time, second time as in text] °द स) सायाह्ने —^{d}) Ś1 शृगवीर-, Dd1 Dm1 (af corr as in text) M1 3 4 (both times) शृंगिवेर, D6 शृगवीर, T G M2 Cr m शृ(G2 3 श्रि)गिवेर, B(ed) शृगवेर, Cg t as in text V1 -पुरे (for पुर) Ś1 Ñ1 B4 D2 4–7 महत्, Ñ2 B2 3 तदा, V1 D1 पुर, B1 D3 पुर (ditto), M4 (first time) तत (for प्रति) —After 1, Ś1 Ñ1 D2 4 6 7 ins, D5 ins after 2 43 15

1057* विगाह्य सरयू रम्या वीरो लक्ष्मणपूर्वज ।

—Ś1 Ñ1 D2 4 6 7 cont D5 cont l 1 and ins l 2 onwards after 1058(A)*, Dg1 Dt1 Dd1 Dm1 S ins after 1^{ab}

1058* अयोध्याभिमुखो धीमान्प्राञ्जलिर्वाक्यमब्रवीत् ।
आपृच्छे त्वा पुरिश्रेष्ठे काकुत्स्थपरिपालिते ।
दैवतानि च यानि त्वा पालयन्त्यावसन्ति च ।
निवृत्तवनवासस्त्वामनृणो जगतीपते ।
पुनर्द्रक्ष्यामि मात्रा च पित्रा च सह संगत ।
ततो रुचिरताम्राक्षो भुजमुद्यम्य दक्षिणम् ।
अश्रुपूर्णमुखो दीनोऽब्रवीज्जानपदं जनम् ।
अनुक्रोशो दया चैव यथार्हं मयि व कृत ।
चिरं दुःखस्य पापीयो गम्यतामर्थसिद्धये ।
तेऽभिवाद्य महात्मानं कृत्वा चापि प्रदक्षिणम् ।
विलपन्तो नरा घोरं व्यतिष्ठन्त क्वचित्क्वचित् ।
तथा विलपतां तेषामतृप्तानां च राघव ।
अचक्षुर्विषयं प्रायाद्यथार्कः क्षणदामुखे ।
ततो धान्यधनोपेतान्दानशीलजनाञ्शिवान् ।
अकुतश्चिद्भयान्रम्याश्चैत्ययूपसमावृतान् ।
उद्यानाम्रवणोपेतान्सम्पन्नसलिलाशयान् ।
तुष्टपुष्टजनाकीर्णान्गोकुलाकुलसेवितान् ।
रक्षणीयान्नरेन्द्राणां ब्रह्मघोषाभिनादितान् ।
रथेन पुरुषव्याघ्र कोसलानत्यवर्तत ।
मध्येन मुदितं स्फीतं रम्योद्यानसमाकुलम् ।
राज्यं भोज्यं नरेन्द्राणां ययौ धृतिमतां वर ।

[(l 1) Dt1 अयोध्यामुन्मुखो Ś1 Ñ1 D2 4 6 7 राम, D6 वीर (for धीमान्) —After l 1, Ś1 D2 4 6 7 ins, D5 ins after 1

1058(A)* मोच्छ्वासहृदयं पश्यन्सीतां लक्ष्मणमेव च ।

[D2 तद्भावयहृदय]

—(l 2) M2 4 त्वा (for त्वा) Ś1 Ñ1 D2 4 (af corr *sec m*) 5–7 आपृच्छामि (for आपृच्छे त्वा) D5 l 2 पुर-, T3 पुरीं, L(ed) पुरी- (for पुरि-) D5 -परिपालने —(l 3) Dg1 reads च यानि in marg M2–4 त्वा (for त्वां) D4 7 देवतायतनानि त्वा (for the prior half). M4 वसति (for [आ]वसन्ति) Ś1 D6 देवता भवनानि त्व पालयता वसति न —(l 4) Ś1 Ñ1 D2 4 (bef corr) 6 7 कृतज्ञो (D4 [af. corr] °ज्ञ), D5 कृताज्ञा (for अनृणो) Ś1 D4 6 7 जगतीपति (D4 7 °तिं) —D4 om from first च in l 5 up to दया in l 8 —(l 5) D6 पित्रा (for मात्रा) Ś1 Ñ1 D2 5–7 M4 पित्रा च मात्रा (by transp) M2 मम (for सह) D5 सह समागत (for च सह संगत) —(l 6) Ś1 Ñ1 D2 5–7 रुधिर- (for रुचिर-). D2 लक्ष्मण (for दक्षिणम्) —(l 7) M2 -मुख (for -मुखो) Ś1 Ñ1 D2 5–7 उवाचाश्रु(L[ed] °स्रु)मुखो दीनो रामो जा(Ñ1 D6 [bef corr] 7 ज)नपदान्जन —(l 8) M2 यदा (meta) (for दया) G1 य (for व) D1 M3 4 कृता Ś1 Ñ1 D2 4–7 युष्माभिर्दर्शितो(D2 °त, D4 5 °ता) मयि (for the post half) —D6 reads l 9 and 10 in marg —(l 9) M4 दु खाय Ś1 Ñ1 D2 4 6 7 चिराद्दु खेन(D2 °खानि) पापेन (Ñ1 D4 पापीयो, D4 *sec m* ins समूढा ये गता रामदर्शने नरा after दु खेन and reads from पापीयो up to the post half of this line within brackets, D7 यान्त्यायो [sic], L[ed] पापी [subm]) (for the prior half). D6 नम्यताम् G3 धर्म- (for अर्थ-) —After l 9, Dm1 ins

1058(B)* निवर्तध्वं महाभागा गम्यतामर्थनिश्चये ।

—(l 10) Ś1 Ñ1 D2 4–7 प्रणम्य (for ऽभिवाद्य) Ś1 Ñ1 Dg1 D2 4 6 7 M3 4 (af corr *inf lin sec m* as above) [अ]भिप्रदक्षिण —(l 11) Ś1 Ñ1 D2 4–7 M1 निनदन्तो (Ñ1 illeg from तो up to l 14) (for विलपन्तो) Ś1 D2 6 जना (for नरा) Ś1 D2 5 6 न्यवर्तंत, Dg1 वितिष्ठन (sic), Dt1 Dd1 Dm1 व्यतिष्ठश्च, D4 7 त्यक्तवत, G1 2 व्यतिष्ठन् तत्र (for

I 12 I तत्र त्रिपथगां दिव्यां शिवतोयामशैवलाम् । ददर्श राघवो गङ्गां पुण्यामृषिनिषेविताम् ॥ २

व्यतिष्ठन्त) D6 reads second कश्चित् (*sup lin sec m* —(1 12) I2 तदा, T3 रथा (sic) (for तथा) Dd1 विश्रित —(1 13) Ś1 D4 6 7 प्रासादं, D2 प्रासादं (for प्रासादं) Ś1 D2 5 6 क्षणनागमे D4 7 यथा विद्युज्जलागमे (for the post half) —Dd1 om l 14 —(1 14) Ś1 D2 1 6 7 वनोपेता Dg1 -शीतान् (for -शील-) Ś1 D6 -जनावृता, D2 -जनयुता, D4 7 -जनायुता, D5 द्विजाकान् (for -जनान्वितान्) —(1 15) Ś1 Ñ1 D2 4 6 7 अनुनश्चिद्रया शोभा, D5 °द्रयान्शेभान्, M3 °द्रयान्नागान् (for the prior half) D2 चलयूथ, M2 चलयूथ (for चेल-यूथ-) Ś1 Ñ1 D2 4–7 -शताकिना (D5 °तान्), T1 2 G M1 समन्वितान् (for समावृतान्) —(1 16) Dg1 -[आ]त्रनो M2 सपम्बनगयान् (for the post half) Ś1 Ñ1 D2 4–7 उद्यानोपवनापेता (Ñ1 °नाम्नरोपेता D4 7 °नाम्नरोपेता D5 °तान्) सप्तवर (Ñ1 °)गोरथा (D5 °मान्) —(1 17) G2 हृष्ट (for तुष्ट) Ś1 D2 4 6 7 -जनाकीर्णा, Ñ1 -जनोपेता (for -जनाकीर्णान्). Dd1 गोकुलतुल- (sic), I1 2 G1 3 गोपगोकुल, Cm g k t as above

☞ In Ñ1, the portion from सेवितान् up to म गो in l 10 of cont passage after 2 68 23 (subt) is lost on missing folios It s mostly ignored

Ś1 D2 4 6 7 -शोभिता, Dm1 मदितान्, D5 -शोभितान् (for -सेवितान्) —(1 18) Ś1 D4 6 7 प्रेक्षणीया, Dg1 Dd1 G1 2 M1 Cr g लक्षणीयान्, G3 रम°, Ck t as above (for रक्षणीयान्) Ś1 D2 4–7 G3 M2 3 -नि(Ś1 -वि)नादिता (D5 G3 M2 3 °तान्), T3 -[अ]भिनन्दितान् (for -[अ]भिनादितान्) —(1 19) Ś1 D2 4 7 मनुज (for पुरुष-) Ś1 (*sup lin* also नगरीम्) ग्रामम्यान्, D2 4 6 7 कोमल्याम् Ś1 अभिवर्तन, D2 4 7 अन्य(D5 °भ्य)वर्तत (for जल°) —After l 19 (owing to omission of l 20 and 21), Ś1 D2 6 ins, Ñ V1 B D1 3 ins after 1, M4 ins after the first occurrence of 1^{cd}

1058(C)* सबद्धनिर्विगमुदान्वित
  चीत्तिरामङ्गर सुतानम् ।
 हृष्टाभिजग्मुर्मुदिता निषादा
  गुहं पुरस्कृत्य मुक्षणवर्णा ।

[(1 1) Ñ1 ते बद्ध, Ñ2 तद्युद्ध, V1 B D1 3 त बद्ध, M4 अन्वच्छ (for सबद्ध) —(1 2) D1 निधिं (for -धर) B4 प्रधान (for सुतानम्) —(1 3) D1 M4 त्वरिता (for मुदिता) D2 किराता (for निषादा) Ñ B प्रत्युद्ययौ तत्र निषादराजो —(1 4) D2 गृह परित्यज्य V1 -वर्णं (for -वर्णा) Ñ B गुह स नीलाम्बुदतुल्यवर्ण —Then Ś1 D2 6 ins colophon —*Sarga name* Ś1 D6 शृङ्गवेरपुरोपगमन, D2 शृङ्गवेरपुराभिगमन, L(ed) शृङ्गवेरपुरोपगमन —*Sarga no* (figures, words or both) Ś1 50, D2 49 —After colophon, Ś1 ins श्रीरामाय नम, D6 रामाय नम]

—Ś1 D2 6 om l 20 and 21 —(1 20) G1 2 M1 -शतावृत (for -समाकुलम्) D4 5 7 मध्येन मुदितां (D5 °तान्) स्फीता (D5 °तान्) मध्यानसमावृता (D5 °तान्) —D4 5 7 om l 21. —(1 21) G1 M3 राष्ट्र T2 G M1 भजेय (for भीत्य)]

2 ^{a}) Ś1 Ñ2 V1 B D1–7 T1 2 G3 M2 ततस्, Cg k t तत्र (as in text) Ś1 V1 D1–7 गता, Ñ2 B तत्र (for दिव्यां) —^{b}) Ś1 Ñ2 V1 B Dt1 Dd1 Dm1 D1–7 शीत- (for शिव-) Cg शिवतोयां (as in text) Ś1 D6 अशैवलां, B4 अर्माय, D1 मशैवलां, G M1 अकर्दमां Dg1 शिवतोयाम शैवलां —D6 om (hapl) 2^{cd} —^{c}) Ś1 V1 D1–3 6 पुण्यां, Ñ2 B D4 7 दिव्य, T1 om (for गङ्गां) —^{d}) Ś1 D1–3 6 दिव्याम्, Dt1 Dd1 Dm1 रम्याम् (for पुण्याम्) G2 M1 मुनि- (for ऋषि) Ñ2 V1 B सुपुण्यां (V1 दिव्यां [subm], B1 नदीं ता)मृषिसेवितां —After 2, Ś1 Ñ2 B D6 ins, D2 ins after 3^{cd}, D4 5 7 ins after 2^{ab}

1059* पवित्रसलिलस्पर्शां हिमवच्छैलसंभवाम् ।
  स्वर्गसोपानभूतां श्रेणीं महर्षिगणसेविताम् ।

[(1 1) D7 हिमवद्गले —(1 2) Ś1 D6 स्वर्गारोहण, D2 स्वर्गमार्गस्य (for स्वर्गसोपान-) Ñ2 B2–4 -श्रेणीं Ñ2 B गां भागीरथीं (B1 4 भगवतीं) नदीं, D2 देवनद्यां गते° (for the post half)],

while Dg1 Dt1 Dd1 Dm1 S ins after 2

1060* आश्रमैरविदूरस्थैः श्रीमद्भिः समलंकृताम् ।
  कालेऽप्सरोभिर्हृष्टाभिः सेविताम्भोहदां शिवाम् ।
  देवदानवगन्धर्वैः किंनरैरुपशोभिताम् ।
  नागगन्धर्वपत्नीभिः सेवितां सततं शिवाम् ।
  देवाक्रीडशताकीर्णां देवोद्यानयुतां नदीम् । [5]
  देवार्थमाकाशगमां विख्यातां देवपद्मिनीम् ।
  जलाघाताट्टहासोग्रां फेननिर्मलहासिनीम् ।
  क्वचिद्वेणीकृतजलां क्वचिदावर्तशोभिताम् ।
  क्वचित्स्तिमितगम्भीरां क्वचिद्वेगजलाकुलाम् ।
  क्वचिद्गम्भीरनिर्घोषां क्वचिद्भैरवनिःस्वनाम् । [10]
  देवसंघाप्लुतजलां निर्मलोत्पलसंकुलाम् ।
  क्वचिदाभोगपुलिनां क्वचिन्निर्मलवालुकाम् ।

[(1 1) T2 3 अपि दूरस्थैः —(1 2) G2 M1 परिपूर्णहदां शुभां (for the post half) ⊛ Cv सेविताम्भोहदा इति पाठ । ⊛ —(1 3) M2 -गन्धर्व- (for -गन्धर्वै) —(1 4) Dg1 T3 Cr g नाना, Ck t as above (for नाग) G2 M1 4 शुभैः; Cv g t as above (for शिवाम्) —(1 5) K(ed) देवाक्रीडा- (for °क्रीड-) T1 G2 3 M1 -शतायुतां (for युतां नदीम्). ⊛ Ck देवोद्यानयुतां । ⊛ —(1 6) T1 आकाश- G1 2 M1 3 4 Ck t -गमां, G3 समां, Cr m g as above (for -गमां) T1 G3 हेमपद्मिनीं, M3 देववर्त्मनीं —(1 7) Dg1 Dt1 Dd1 Cg k t -[आ]घात, M4 -हास, Cr m as above (for घात-) ⊛ Ct : पाठान्तरे जलेनाधूता प्रक्षालिता गुहाग्रा गुहामुखानि यया ताम् । ⊛ M4 -वासिनीं (for -हा°) —T2 G1 transp l. 8 and 9 —(l.

हंससारससंघुष्टां चक्रवाकोपकूजिताम् ।
शिंशुमारैश्च नक्रैश्च भुजंगैश्च निषेविताम् ॥ ३
तामूर्मिकलिलावर्तामन्ववेक्ष्य महारथः ।
सुमन्त्रमब्रवीत्सूतमिहैवाद्य वसामहे ॥ ४

अविदूरादयं नद्या बहुपुष्पप्रवालवान् ।
सुमहानिङ्गुदीवृक्षो वसामोऽत्रैव सारथे ॥ ५
लक्ष्मणश्च सुमन्त्रश्च बाढमित्येव राघवम् ।
उक्त्वा तमिङ्गुदीवृक्षं तदोपययतुर्हयैः ॥ ६

8) M4 -गात- (for कूत-) —(l 9) Dt1 Dd1 Dm1 -समाकुला, G1 जनाकुला (for -जला°) —(l 10) Dd1 Dm1 S -निस्वना —(l 11) T1 स... (damaged), G1 2 M1 -शोभिता (for -सकुलाम्) —(l 12) M4 -कुटिलां (for -पुलिना)]

3 Ś1 D6 (both hapl ?) om 3, Ñ2 (hapl ?) D2 4 5 7 om 3^{ab} V1 B D3 transp 3^{ab} and 3^{cd} —^{a}) T3 सागर- (for -सारस-) V1 B2 4 D1 3 -सर्वैश्च, B1 3 -संहृष्ट (sic) (for -संघुष्टा) —^{b}) Dt1 Dd1 Dm1 T3 G1 M2 -[उ]पशोभिता, V1 D1 वारणैश्चाभिताडिता, B वारणैश्च निषेविता, D3 वारणैश्चाभिनन्दिता —After 3^{ab}, Dg1 Dt1 Dd1 Dm1 S ins

1061* सद्दामदैश्च विहगैरभिसनादितान्तराम् ।
क्वचित्तीररुहैर्वृक्षैर्मालाभिरिव शोभिताम् ।
क्वचित्फुल्लोत्पलच्छन्नां क्वचित्पद्मवनाकुलाम् ।
क्वचित्कुमुदषण्डैश्च कुड्मलैरुपशोभिताम् ।
नानापुष्परजोध्वस्तां समदामिव च क्वचित् ।
व्यपेतमलसंघातां मणिनिर्मलदर्शनाम् ।
दिशागजैर्वनगजैर्मत्तैश्च वरवारणैः ।
देवोपवाह्यैश्च मुहुः सनादितवनान्तराम् ।
प्रमदामिव यत्नेन भूषितां भूषणोत्तमैः ।
फलपुष्पैः किसलयैर्वृतां गुल्मैर्द्विजैस्तथा ।
विष्णुपादच्युतां दिव्यामपापां पापनाशिनीम् ।

[(l 1) Dg1 Dt1 Dd1 Dm1 मत्तैश् (for -मदैश्) Dt1 अभिपन्नामभिदिता (for the post half) —(l 2) Dg1 T1 (bef corr) उपशोभिता —(l 3) M4 पद्मसमाकुला —(l 4) Dg1 Dt1 Dd1 Dm1 -खण्डैश्च, M4 -पद्माढ्या (for -षण्डैश्च) Dm1 कुड्मलैर् (for कुड्मलैर्) Dg1 T3 M2 3 चोपशोभिता (for उप°) —(l 5) G1 -रजोलिप्ता —(l 6) M4 व्युपेतजल-, Ct*p* व्यपेतजल- —(l 7) G3 च वनजैर् (for वनगजैर्) —(l 8) G2 M2 [उ]पवाह्यश् M3 समदैस्, M4 स्तत (for च मुहुः) Dt1 देवराजोपवाह्यैश्च (for the prior half) —(l 9) G2 भूषणा (for भूषिता) —(l 10) M1 Ck मूले (for -पुष्पे) Cg and K(ed) फलैः पुष्पैः M3 मता (sic!) (for वृता) —M4 om l 11 —T1 2 G M1–3 ins l 11 after St 3 —(l 11) Dd1 देव्याम् (for दि°)]

—D1 reads 3^{cd} after 5 —^{c}) Ñ2 V1 B Dt1 Dd1 Dm1 D1–t.. शिशुमारैश् D2 चक्रैश् (for नक्रैश्) —^{d}) Ñ2 B मकरैश्, Dm1 D2–4 7 G1 M4 भुजगैश्, D5 श्वापदैश् Dt1 Dd1 Dm1 समन्विता, D4 7 [उ]पशोभिता, D6 [ए]व से° (for निषेविताम्) —After 3, T1 2 G M1–3 ins l 11 of 1061* —T1 2 G M1 2 3 (om l 1) cont, Dt1 Dd1 Dm1 ins after st 3, while Ś1 D2 4–7 cont l 2 only after 1059* and Dg1 T3 M4 ins l 2 only after 3

1062* तां शकरजटाजूटाद्भ्रष्टां सागरतेजसा ।
समुद्रमहिषीं गङ्गां सारसक्रौञ्चनादिताम् ।

[K(ed) reads l 1 within brackets —(l 1) Dt1 Dd1 Dm1 शक्रस्य (for तां शकर-) G3 -जूटा, M2 -भ्रष्टां (for -जूटाद्) G3 इष्टा (for भ्रष्टा) M2 सागरगामभिदिनीं (for the post half) —(l 2) Ś1 D2 4–7 इष्टा (for गङ्गां) D2 -निनादिता (hypm) (for -नादिताम्)]

—Ś1 D2 6 cont, D4 7 ins after 3^{cd}

1063* मृगयूथैः पिबद्भिश्च वारणैश्चाभिनादिताम् ।

[D2 चाभिनदिता, D4 7 चापि नादिता (D7 °त)]

—After 1062*, M4 reads 1^{cd} for the second time, reading it for the first time after 1056*.

अधस्ताद्व्रजतस्तस्याः सुरराज्ञो महात्मनः ।
बिन्दवः पतिता गात्रे सूक्ष्माः सुरभिगन्धिनः ॥ १७
तां दृष्ट्वा शोकसंतप्तां वज्रपाणिर्यशस्विनीम् ।
इन्द्रः प्राञ्जलिरुद्विग्नः सुरराजोऽब्रवीद्वचः ॥ १८

भयं कच्चिन्न चास्मासु कुतश्चिद्विद्यते महत् ।
कुतोनिमित्तः शोकस्ते ब्रूहि सर्वहितैषिणि ॥ १९
एवमुक्ता तु सुरभिः सुरराजेन धीमता ।
प्रत्युवाच ततो धीरा वाक्यं वाक्यविशारदा ॥ २०
शान्तं पापं न वः किंचित्कुतश्चिदमराधिप ।
अहं तु मग्नौ शोचामि स्वपुत्रौ विषमे स्थितौ ॥ २१

---

16 ^{a}) Dg1 Dt1 Dd1 Dm1 T3 G2 M1–3 Cr *mp gp* t -दिवस, T1 2 °स-, Cg k as in text (for -दिवसे) Dg1 reads ^{b} in marg —^{b}) Dg1 पुत्रौ दृष्ट्वा (by transp) —^{d}) Dg1 Dt1 -कुलेक्षण (for °णा) —For 16, Ś1 Ñ2 V1 B D1–7 M4 subst

1752* दृष्ट्वा पुत्रौ रुरोदार्ता सीदमानौ मुहुर्मुहु ।
तामिन्द्रो रुदतीं दृष्ट्वा धर्मात्मा वै कृपा गत ।

[(l 1) Ś1 रुदती च, Ñ2 °नु, D2 तु भारार्तौ (for रुरोदार्ता) Ś1 Ñ2 B D6 सीदता (Ś1 D6 °ती) च, D2 दीद° (sic), D4 7 क्रदमाना (D4 °ना) (for सीदमानौ) M4 सीदमाना पुन पुन (for the post half) —(l 2) V1 [अ]थ कृपान्वित, D1–3 5 M4 त्व (D1 5 त्व, D3 त्वत्) कृपायत (D1 °त [sic]) (for वै कृपा गत)]

17 ^{a}) Dd1 Dm1 G1 M3 तस्य (for तस्या) —For 17^{ab}, Ś1 Ñ2 V1 B D1–7 M4 subst

1753* आकाशे गच्छतो ह्यस्य सुरभ्या अश्रुबिन्दव ।

[Ś1 D2 4–7 तस्या, M4 [s]प्यस्या (for ह्यस्य) D1 4 7 चाश्रु, M4 दश्रु- (for अश्रु-)]

—^{c}) Ś1 Ñ2 V1 B D1 3–7 M4 शोकोष्णा (Ñ2 °ष्णा, D4 °स्या) (for बिन्दव) D2 शोकाश्रुपतिता (sic) —^{d}) Ś1 Ñ2 V1 B D1–7 M4 भृश (for सूक्ष्मा) Ś1 Ñ2 B1 3 4 D6 -गधय (for -गन्धिन) —After 17, Dm1 G3 ins l 3–4 of 1764* —Dm1 G3 cont, Dg1 Dt1 Dd1 T G1 2 M1–3 ins after 17

1754* निरीक्षमाणस्ता शक्रो ददर्श सुरभि स्थिताम् ।
आकाशे विष्ठिता दीना रुदतीं भृशदु खिताम् ।

[(l 1) Dg1 Dd1 Dm1 निरीक्ष्य-, Cr g as above (for °क्ष-) T1 शक्रस्ता (by transp) (for ता शक्रो) —T3 om (hapl) l 2 —(l 2) G3 निष्ठिता (for वि°) Dt1 Dd1 Dm1 G3 M1 2 रुदतीं (for रुदतीं)]

18 ^{d}) G3 damaged for ब्रवी —For 18, Ś1 Ñ2 V1 B D1–7 M4 subst

1755* तेरश्रुबिन्दुभि स्पृष्ट समुद्वीक्ष्याथ वासव ।
सुरभि प्राञ्जलिर्वाक्यमभिगम्येदमब्रवीत् ।

[(l 1) B3 4 (B3 *sup. lin* before corr) येर् (for तेर्) V1 B2 D1–3 समुदीक्ष्य —(l 2) D4 7 भूत्वा समागम्य (for वाक्यमभिगम्य)]

19 ^{a}) Dd1 Dm1 T1 3 G1 2 M1 3 किंचि (M1 [before corr] कश्चि) न (for कच्चिन्) —^{c}) G3 -निमित्तं (for °त्त) —^{d}) Dg1 T2 3 G1 3 M2 सर्वं (for सर्व-) Dg1 T2 M3 -सुखैषिणि, Dm1 G1 2 -हितैषिणी (for °णि) —For 19, Ś1 Ñ2 V1 B D1–7 M4 subst

1756* कच्चिन्न भयमस्माक कुतश्चिदनुपश्यसि ।
यन्निमित्त सुदु खार्ता रोदिषि ब्रूहि तन्मम ।

[(l 1) D1 5 क्वचिन्, D4 किंचिन् (for कच्चिन्) Ñ2 B1 3 4 तु (for न) D4 7 अस्मासु (for °क) Ñ2 अपि पश्यसि, B3 अपि° (for अनुपश्यसि) —(l 2) D2 5 किंनि°, D6 °न्निमित्ते (for °त्त) D1 मदु खार्ता (for सु°) —D5 om (hapl) from रोदिषि up to सुदु खार्ता in l 2 of 1757* V1 D2–4 7 M4 रोदिष्येव (V1 °षि त्व, M4 °तत्) ब्रवीहि (D2 वदस्व) मे, D1 रोदिषीद ब्रवीमि ते (for the post half)]

20 ^{ab}) M2 3 उक्त्वा (for उक्ता) Dg1 reads भि सुर in marg —^{d}) K(ed) वाक्यविशारद —For 20, Ś1 Ñ2 V1 B D1–7 M4 subst

1757* इत्युक्ता सुरभिस्तेन शक्रेणामिततेजसा ।
प्रत्युवाच सुदु खार्ता पुरदरमिद वच ।

[D5 om up to सुदु खार्ता in l 2 (cf v l 1756*) —(l 1) B1 3 4 D7 [उ]क्त्वा (for [उ]क्ता) D1 3 सुरभी (for °भिस्) —(l 2) D7 इम (for इद)]

21 ^{a}) M2 शात (sic) (for शान्त) Cv r m g as in text, Ck मे (for व) Ś1 D6 नाह भयं व पश्यामि, Ñ2 V1 B D1–5 7 M4 न वो (Ñ2 B नाहं) भय (B4 भय in marg) प्रपश्यामि —^{b}) Dd1 D2 अमराधिप (sic), G(ed) ते-मरा°, Ck as in text (for अमराधिप) —^{c}) Dd1 Dm1 G1 2 M1 2 किल, M3 मानौ (sic), Ck t as in text (for मग्नौ) —For 21^{cd}, Ś1 Ñ2 V1 B D1–7 M4 subst

1758* अहं त्विमौ कृशौ पुत्रौ शक्र शोचामि दु खितौ ।

[V1 D1 3 अहो (for अह) Ś1 (also इ in marg) Ñ2 D6 हि (for तु) Ś1 D6 त्वौ (for [इ]मौ) D2 5 कृशाविमौ (for त्विमौ कृशौ) V1 D1–5 7 कृपणौ शक्र (D4 7 वीक्ष्य) रोदिमि (D2 4 5 7 शोचिमि [sic]), M4 कृपणो पुत्रशोचिनी (for the post half)]

एतौ दृष्ट्वा कृशौ दीनौ सूर्यरश्मिप्रतापितौ ।
वध्यमानौ बलीवर्दौ कर्षकेण सुराधिप ॥ २२

मम कायात्प्रसूतौ हि दुःखितौ भारपीडितौ ।
यौ दृष्ट्वा परितप्येऽहं नास्ति पुत्रसमः प्रियः ॥ २३

22 ^{a}) Dm1 T3 G2 3 M1-3 ततो; Cv g as in text (for एतौ) —^{b}) M2 -प्रदीपितौ, M3 °तौ (for -प्रतापितौ) —For 22^{ab}, Ś1 Ñ2 (om [hapl ?]) V1 B (B3 marg) D1-7 M4 subst

1759* प्रतोदप्रतिभिन्नाङ्गौ सीदन्तौ सुबुभुक्षितौ ।

[V1 B2 M4 -प्रति(B2 °वि)तुन्न, B3 4 -प्रविभग्न, D1 3 -प्रतितुन्न (for -प्रतिभिन्न) D2 4 5 7 प्रतोदेन प्रगु(D2 °मनु [sic])न्नाङ्गौ (for the prior half) D2 वेपमानौ, M4 सीदमाना (for सीदन्तौ सु-) —D2 om (hapl) from बुभुक्षितौ up to सीदमानौ in 1760* V1 D1 3-5 7 M4 वेप(V1 D1 3 वह)मानौ महीतले (for the post half)]

—^{c}) Ś1 Ñ2 B D6 पीड्यमानौ, Dg1 अर्ध°, T1 3 बाध्य°, T2 बध्य°, G1 M4 विध्य°, G2 पच्य°, K (ed) क्षर्ध°, Ct as in text (for वध्यमानौ) Ś1 Ñ2 B D6 M4 लाङ्गलेन (for बलीवर्दौ) —^{d}) Ś1 कार्षिकेन, Dg1 कर्षणेन, D6 कर्षकेन Ś1 Ñ2 B Dt1 Dd1 D6 M4 दुरात्मना (for सुराधिप) —For 22^{cd}, V1 D1-5 7 subst

1760* दृष्ट्वा रोदिमि तौ पुत्रौ सीदमानौ मुहुर्मुहु ।

[D2 om up to सीदमानौ (cf 1759*) V1 D1 3 5 दृष्ट्वा पुत्रौ तु रोदामि (V1 रुदस्यार्ता, D1 3 रुदा[D3 °द]म्यार्ता) (for the prior half)]

23 ^{b}) Dd1 Dm1 G1 पर- (for भार-). —^{d}) Dm1 Cv -सम, G2 -सम, Cg t as in text, Ck -तम (for -सम) M3 पितु (for प्रिय) M2 नास्ति पुत्र समप्रिय —For 23, Ś1 Ñ2 V1 B D1-7 M4 subst

1761* अङ्गप्रत्यङ्गसंभूतावेतौ मे हृदयोद्भवौ ।
दृष्ट्वा विवर्धते दु ख नास्ति पुत्रात्पर प्रिय ।

[(l 1) Ś1 D6 तावेतौ, V1 D1 3 इमौ मे (for एतौ मे) M4 हृदयोद्गतौ (for °द्भवौ) —(l 2) D2 [अ]भिवर्धते (for विव°) B1 4 M4 पर प्रिय, D1 प्रिय पर (by transp), D2 परंप्रिय (sic), D6 प्रिय पर (for पर प्रिय)]

—Thereafter B3 cont

1762* प्रागेरपि सुता पाल्या मातृणा सर्वथापि च ।

—B3 further cont, while Ś1 Ñ V1 B1 2 4 D1-7 M4 cont after 1761*

1763* तामब्रवीत्तत शक्रो देवानामीश्वर प्रभु ।
न सतापस्त्वया कार्यो गवामेष हि निर्णय ।
दीर्घकाल तपस्तप्त्वा गोभिर्ब्रह्मा समियाचित ।
इच्छेम लोकान्परमान्प्राप्नु स्वै कर्मभिर्जितान् ।
अब्रवीच्च ततो ब्रह्मा गा प्रह्वावनता स्थिता ।
कुरुध्व मानुषे लोके तप पापभयापहम् ।
यो च क्लेशो बुभुक्षा च वधो बन्धश्च मानुषे ।
लोके भविष्यति तपस्तद्व पापभयापहम् ।
यो दुर्बल परिश्रान्त व्याधित वापि निर्दय ।
वाहयिष्यत्यनड्वाह स गोघ्न पापमाप्स्यति ।
शक्त समर्थ बलिन पुष्ट यो वाहयिष्यति ।
आसोपादानसयुक्त न स पापमवाप्स्यति ।
न क्रोष्टव्य तु युष्माभि छिद्यमाने कथचन ।
तेनाक्षयान्परांल्लोकास्तपसाप्स्यथ दुर्लभान् ।
एवमेतत्पुरा वृत्त धात्रा कर्म गवा भुवि ।
तस्मान्मन्युर्न कार्यस्ते स्मृत्वैत धातृशासनम् ।
इत्येव शोचितवती गवा माता सुतप्रिया ।

[Ñ1 missing up to गो in l 10 (cf 2 44 1^{ab}). —(l 2) D4 तत (for न) B2 सत्रासस्, D4 स तापस् (for सतापस्) Ś1 D6 शृणु तेद प्रवक्ष्यामि सुरभे लोकपूजिते —(l 3) B4 -काल- (for -काल) M4 तनस् (for तपस्) Ś1 D6 पुरा कृतयुगे देवि (for the prior half) M4 प्रयाचित —(l 4) V1 गच्छाम, D1 3 M4 इच्छाम (for इच्छेम) M4 प्रवरान् (for परमान्) D4 7 transp लोकान् and परमान् V1 प्राप्तान् (for प्राप्नु) D3 युतान् (for जितान्) —(l 5) Ñ2 V1 B1-3 D1 3 M4 तान(V1 D1 3 तारत्व, B1 ताम)ब्रवीत् (for अब्रवीच्च). B1 illeg from ह्मा up to स्थिता Ñ2 B3 च प्रह्वानता, M4 °नत- (for प्रह्वावनता) V1 स्थित, M4 -स्थितान् (for स्थिता). —(l 6) V1 D1-5 7 M4 च(V1 व)रध्व, B3 कुरुष्व (for कुरुध्व) B4 मनुजे (for मानुषे) B1 तत (for तप) V1 B4 D6 -भयावह (for °पहम्) —Ś1 om (hapl) l 7-8 D6 transp l 7 and 9 —(l 7) V1 आर (sic) (for यो च). B2 क्रुशो (for क्लेशो) Ñ2 D4 7 M4 मानुषे, D2 5 दारुण (for मानुषे) —(l 8) D2 4 5 7 काले (for लोके) M4 स वस् (for तपस्) V1 तद्वप्-, D6 शुद्ध (for तद्व) D2 5 -भयावह (for °पहम्) —(l 9) B1 4 व्याधित, D2 4 5 7 वाल्ति (for व्याधित) Ś1 B2 D1 6 च (for वा) Ś1 D2 4 5 7 निर्भय, V1 निर्णय, M4 निर्दय (for निर्दय) —(l 10) D2 [अ]नुद्वाह (sic) (for [अ]नड्वाह) ☞ Ñ1 resumes from घ्न D5 गोघ्न (for गोघ्न) Ś1 B4 D4 6 7 गोघ्न पापमवाप्स्यति (for the post half) —D2 om (hapl) l 11-12 —(l 11) D7 भक्त (for शक्त) D1 समध- D7 मल्लिन (for बलिन) —(l 12) B4 आस- (sic) (for आस-) V1 -[उ]पादान, D3-7 M4 °पदान (for -[उ]पादान-) V1 स न (by transp), D4 न सा (for न स) —(l 13) D2 क्रोष्टव्य (for क्रोष्टव्य) Ñ B1 3 4 D4 7 च (for तु) Ñ1 V1 छिद्यमान, D2 छेद°, D6 छेदन° (for छिद्यमाने) —(l 14) D1 तेनाक्षरान्, D4 7 ततोऽययान् (for तेनाक्षयान्) Ś1 B2 4 D6 M4 वरान्, L (ed) नराँल् (for परान्) V1 तेनाक्षयान्यौल्लोकास् (for the prior half) D4 7 प्र(D7 प्रे)लभाप्स्यथ (for तपसा°) —(l. 15) Ś1 D6 तस्माद् (for एवम्) Ś1 D6 दत्त,

यस्याः पुत्रसहस्राणि सापि शोचति कामधुक् ।
किं पुनर्या विना रामं कौसल्या वर्तयिष्यति ॥ २४
एकपुत्रा च साध्वी च विवत्सेयं त्वया कृता ।
तस्मात्त्वं सततं दुःखं प्रेत्य चेह च लप्स्यसे ॥ २५

अहं त्वपचितिं भ्रातुः पितुश्च सकलामिमाम् ।
वर्धनं यशसश्चापि करिष्यामि न संशयः ॥ २६
आनाययित्वा तनयं कौसल्याया महाद्युतिम् ।
स्वयमेव प्रवेक्ष्यामि वनं मुनिनिषेवितम् ॥ २७

V1 D1 3 5 [आ]दिष्ट, M4 दृष्ट (for धृत) D2 धर्ता (sic) (for धात्रा) D5 धर्म (sic) (for कर्म). —(l 16) Ñ2 तु मन्त्रु, B3 न मन्त्रु (by transp) (for मन्त्रुर्न) Ś1 Ñ B1 3 4 D6 श्रुत्वा (for स्मृत्वा) Ñ1 [ए]व (for [ए]तत्) —(l 17) Ś1 Ñ1 [ए]व (for [ए]व) D1 सुप्रिया (for प्रा°)]

—After 23, Dg1 Dt1 Dd1 T G1 2 M1–3 ins, Dm1 G3 ins l 1–2 and 5–6 after 23 and l 3–4 after 17

1764* यस्या पुत्रसहस्रैस्तु कृत्स्नं व्याप्तमिदं जगत् ।
ता दृष्ट्वा रुदतीं शक्रो न सुतान्मन्यते परम् ।
इन्द्रो ह्यश्रुनिपातं तं स्वगात्रे पुण्यगन्धिनम् ।
सुरभिं मन्यते दृष्ट्वा भूयसीं तामिवेश्वर ।
सदाप्रतिमवृत्ताया लोकधारणकाम्यया । [5]
श्रीमत्या गुणनित्याया स्वभावपरिचेष्टया ।

[(l 2) Dd1 Ck रुदतीं, Ct as above (for रुदतीं) —Venkateshwar press ed om l 3–4 —(l 3) Dg1 Dm1 T1 2 G2 3 M1 Cg [ऽ]पि, Cv as above (for हि) G3 -° त (for -निपात) —(l 4) M3 तान् (for ताम्) Dg1 Dt1 Dd1 Dm1 T3 Ct इद, K (ed) उर, Cv as above (for इव) G3 श्रिय (for [ई]श्वर) —(l 5) Dt1 Ck t सत, Cv m g as above (for सदा) T3 Cv -कामया, Cm g t as above (for -काम्यया) —(l 6) Dt1 Dd1 Ct -गुण्याया, Dm1 G1 -युक्ताया (for -नित्याया) Dt1 Ck t -परिचेष्टया, Dm1 °वेष्टया, Cv r m g as above (for -परिचेष्टया)]

24 —a) B1 D2 4 5 7 तस्या (for यस्या) B4 lacuna, Dd1 पुत्र, D1 पुन (for पुत्र) D4 7 -सहस्राणां (for °णि). —b) Ś1 Ñ V1 B1–3 D1–7 बहून्यासन्महौजस (D1–5 7 °सा), B4 बभूव स °हौजस —For 24c–25, Ś1 Ñ V1 B D1–7 M4 subst 1765* —c) G1 भार्या तु (for पुनर्या) —d) Dd1 Dm1 विनशिष्यति

25 a) G1 सैकपुत्री, Cv g k as in text (for एकपुत्रा) —b) Dd1 Dm1 G1 विवत्सा या (Dm1 °य [sic]), Ck विवत्सैव (for विवत्सेय) —For 24c–25, Ś1 Ñ V1 B D1–7 M4 subst

1765* एक एव सुतो यस्या किंतु रामो विवासित ।
प्राणेभ्योऽपि प्रिय. साद्य कथं शोचेन्न तु त्वया ।
यस्मादेव तु कैकेयि कौसल्यायास्त्वया कृतम् ।
हृच्छरीरमन शोषि तु स्व पुत्रवियोगजम् ।
तस्मात्त्वमपि कैकेयि दु स प्रेत्येह चाव्ययम् । [5]
महद्वाप्स्यसि दुर्मेधे निरय पापमास्थिता ।

[(l 1) Ñ1 V1 D1–5 7 M4 अयम (V1 D1 3 किंतु य, M4 किमु य) स्यास्त्वेक एव (for the prior half). Ś1 D6 त्वया, Ñ1 V1 D1–3 6 M4 पुत्रा, B2 4 [illegible] D2 [illegible] (for [illegible]) D4 7 पुत्रा (for राम) —D4 om l 2–3 —(l 2) V1 D1–3 5 7 प्राणे [illegible] (D7 °रे) (for [illegible]) Ś1 [illegible], Ñ2 D5 [illegible], B4 D2 [illegible] (for [illegible]) M4 प्राणे [illegible] (for the prior half) Ś1 D6 [illegible] D5 [illegible] (D7 [illegible]) [illegible] (D5 °त) (for the post half) —(l 3) Ñ B1 3 4 D2 [illegible], V1 D1 3 [illegible], M4 [illegible] (for [illegible]) Ñ1 न (for तु) D7 [illegible] (for [illegible]) —D6 reads in marg from [illegible] up to [illegible] in line 5 V1 D1 3 [illegible] (for [illegible]) —M4 om l 4 —(l 4) D1 -शोषि (for -शोषि) B2 [illegible], D5 [illegible] (by pm), D4 7 [illegible] (for [illegible]) —(l 5) M4 [illegible] (for प्रेत्येह) D4 7 [illegible] —(l 6) B3 [illegible] (for [illegible]) Ñ1 V1 D1–3 5 M4 [illegible], D4 7 [illegible] (D7 [illegible]) (for [illegible]) Ñ1 V1 D1–5 7 [illegible], M4 [illegible] (for [illegible]) V1 D1 3 M4 [illegible] D2 4 5 7 [illegible] (for [illegible])]

26 a) Ś1 Ñ V1 B Dt1 D1–7 M4 तु (for हि) B1 3 D1 3 [अ]पचित, T1 [अ][illegible] (for [अ]पचितिं) Ś1 D6 मातु (for भ्रातु) —c) Dg1 वधिनो, T2 G2 3 M1 2 वर्धनीं, Ck as in text (for वर्धनं) T3 [illegible] [illegible], G1 वर्धनन्यशसा चापि, M3 [illegible] [illegible]श्चापि —For 26cd, Ś1 Ñ V1 B D1–7 M4 subst

1766* धर्मस्य चायशसो लोके करिष्याम्यपमार्जनम् ।

[D2 5 7 वा (for च) V1 D1–5 [illegible], B1 [illegible] (for [अ]यशसस्त्वम) M4 [illegible] (for the post half)]

27 a) Dd1 G1 आनयित्वा तु (G3 च), Cm g k as in text (for आनाययित्वा) Dg1 Dt1 T2 Ct आनाय्य (Dg1 °नीय) च महाबाहु —b) Dg1 Dt1 T2 कोसलेन्द्र (for कौसल्याया). Dg1 Dt1 T1 2 G3 M3 महाद्युत (for °द्युतिम्) —For 27, Ś1 Ñ (Ñ1 missing cf v l 1058*) V1 B D1–7 M4 subst and read after 1736*

1767* विज्ञाप्य रघुशार्दूल राम भ्रातरमग्रजम् ।
वत्स्याम्यहं वने घोरे नव वर्षाणि पञ्च च ।
पितुर्नियोगाद्भ्राता मे रामो राजा भविष्यति ।

[(l 1) V1 D1 3 4 7 नर- (for रघु) Ñ2 B3 राघवम् (for भ्रातरम्) —(l 2) D3 वश्यामह (corrupt) (for वत्स्याम्यह) Ś1 D6 वन (for वने) D6 घोर (for घोरे) Ñ2 B1 3 4 वने (Ñ2 °न [sic]) वत्स्याम्यह (by transp) घोरे (for the prior half) D6 transp नव and वर्षाणि —(l 3) V1 D3

इति नाग इवारण्ये तोमराङ्कुशचोदितः ।
पपात भुवि संक्रुद्धो निःश्वसन्निव पन्नगः ॥ २८

संरक्तनेत्रः शिथिलाम्बरस्तदा
विधूतसर्वाभरणः परंतपः ।
बभूव भूमौ पतितो नृपात्मजः
शचीपतेः केतुरिवोत्सवक्षये ॥ २९

इति श्रीरामायणे अयोध्याकाण्डे अष्टषष्टितमः सर्गः ॥ ६८ ॥

M4 भ्रातुश्च (for भ्राता मे) D2 5 7 राज्ये (for राजा) V1 D1 3 M4 रामो राज्य करिष्यति (for the post half)]

—Thereafter Ñ2 cont l 5-6 of 1732*

—After 27, Dg1 Dt1 Dd1 Dm1 T G M1-3 ins

1768* न ह्यह पापसकल्पे पापे पाप त्वया कृतम् ।
शक्तो वारयितु पौरैरश्रुकण्ठैर्निरीक्षित ।
सा त्वमग्नि प्रविश वा स्वय वा विश दण्डकान् ।
रज्जु बद्ध्वाथवा कण्ठे न हि तेऽन्यत्परायणम् ।
अहमप्यवनीं प्राप्ते रामे सत्यपराक्रमे । [5]
कृतकृत्यो भविष्यामि विप्रवासितकल्मष ।

[(l 1) G2 ननु (for न हि) T2 -सकल्प (for °ल्पे) —M3 damaged from कृतम् in l 1 up to शक्तो in l 2 —(l 2) T1 निरीक्षित (for °त) —(l 3) T2 दडक T1 transp विश and दण्टकान् —(l 4) Dd1 बद्धा यथा कठे, Dm1 बद्धाथ कठेन, T1 G2 M2 बद्धा न वा कठे, T3 G3 Cg बधान वा(G3 व्य [sic]) कठे (for बद्धाथवा कण्ठे) —(l 6) G1 भविष्याम]

28 [a]) Cv tp [ना]रण्यस्, Cg as in text (for [अ]रण्ये) ❀ Cm अारण्यो नाग इति वा पाठ । ❀ —[b]) Dg1 Dt1 Ct -तोदित, Cv r m g as in text (for -चोदित) Ś1 Ñ V1 B D1-7 M4 सहसा बधन(D4 7 विह्वलो) गत (D2 °त) —[c]) Cv स क्रुद्ध, Cr m g t सक्रुद्ध (as in text) —[d]) Dt1 Dd1 T G M1-3 Cv r m निश्वसन्, Cg as in text (for नि°) —For 28[cd], Ś1 Ñ V1 B D1-7 M4 subst.

1769* नि श्वस्योष्ण सुदु खार्तो रुरोद भरतस्तदा ।

[V1 D1 3 M4 दु खतप्तो (for सुदु खार्ता) Ñ1 D2 4 5 7 नि श्वसन्दु खसतप्तो (for the prior half)]

29 [a]) Dt1 Dd1 Dm1 तथा (for तदा) —For 29[ab], Ś1 Ñ V1 B D1-7 M4 subst

1770* सरब्धनेत्र शिथिल क्रियासु
प्रमुक्तशुभ्राभरणाम्बरस्रक् ।

[(l 1) M4 सरक्त- (for °ब्ध-) D4 7 चपल (शिथिल) V1 D1 3 M4 शिथिलेंद्रिय स(D1 °य सन्, M4 °यस्तु), D2 5 चपलेंद्रियान्स (D5 °यात्) (for शिथिल क्रियासु) —(l 2) Ś1 D6 सत्यक्त-, V1 D1 प्रशस्त, B2 वि°, D2 5 प्रभूत-, D3 प्रध्वस्त- (for प्रमुक्त-) Ñ2 B3 -शुभ, B1 -मुद्रा-, D2 5 वस्त्र (for -शुभ्र) Ñ1 -स्वाभरण (sic), B1 [आ]स्त° (for -[आ]भरण-) V1 -[अ]बरश्च (for -[अ]म्बरस्रक्) D4 7 प्रभूतबुद्धि कृपणातिदु खी, M4 प्रशस्तशुभ्राभरणश्च य पुरा]

—[d]) D2 [उ]दय-, D5 °दक (for [उ]त्सव-) G3 damaged for -क्षये D4 7 शचीपतिर्दैत्यहतप्रभाव

Colophon —*Sarga name* Ś1 Ñ V1 B D1 3 6 भरतविलाप (B4 [before corr] °शपथ), D2 5 भरतपर्वणि सुरभ्युपाख्यान(D2 भरतकोप), D4 7 सुरभ्युपाख्यान —*Sarga no* (figures, words or both) Ñ1 B1 4 D3 6 om, Ś1 80, Ñ2 V1 B3 D7 M4 76, B2 64, Dg1 Dt1 Dd1 Dm1 T G M1-3 74, D1 132, D2 5 79, D4 75 —After colophon, D6 concludes with रामाय नम, T2 with श्रीरामचन्द्राय नम, G with श्रीरामाय नम

६९

तथैव क्रोशतस्तस्य भरतस्य महात्मनः।
कौसल्या शब्दमाज्ञाय सुमित्रामिदमब्रवीत् ॥ १

आगतः क्रूरकार्यायाः कैकेय्या भरतः सुतः।
तमहं द्रष्टुमिच्छामि भरतं दीर्घदर्शिनम् ॥ २

69

☞ For the sequence of Sargas in Ś1 Ñ V1 B D1–7 cf note before 2 68 1 —Before 1, Ś1 Ñ (Ñ1 repeats l 9–14 after 13) V1 B D1–7 M4 ins

1771* गर्हयन्नेव जननीं दु खशोकाकुलेन्द्रिय ।
भरतोऽवेक्ष्य शत्रुघ्नमिद वचनमब्रवीत्।
अनीश्वरोऽय पुरुष सुखदु खाश्रये मत ।
विकर्षत्यवश ह्येन कृतान्त सुखदु खयो ।
अहो कृतान्तो बलवान्येन सर्वगुणान्वित ।
सुखार्हस्त्ववशो रामो बलाद्दु खे नियोजित ।
पुत्रशोकपरिद्यूना भर्तृव्यसनकर्शिताम्।
कौसल्यामेहि सहितो मया पश्याद्य दु खिताम्।
गर्हित चायशस्य च कर्म मात्रा कृत मम।
यदिद तद्विपश्यामि कृतान्तकृतमेव हि।
शत्रुघ्न स्त्री पुमान्वापि कृतान्तबलमोहित ।
सुविपश्चिदपि प्राप्त न वेत्त्यात्महिताहितम्।
कृतान्तमोहिता माता मम शत्रुघ्न कैकयी।
इद कृतवती पाप सर्वलोकविगर्हितम्।
इद तु मे महद्दु ख शत्रुघ्न हृदि वर्तते।
किं नु वक्ष्यामि कौसल्यामिति मातृविदूषित ।
इत्युक्त्वा भरतो वाक्य शत्रुघ्नसहितस्तदा।
रुरोदार्तस्वरेणोच्चै पूरयन्निव तद्गृहम्।

[(l 1) Ñ1 D6 विगर्हयन्नेव (hypm), D2 4 7 विगर्हन्नेव (for गर्हयन्नेव) B2 कैकेयीं, B4 रजनीं (for जननीं) M4 -[ई]क्षण (for [इ]न्द्रिय) Ñ1 D2 4 5 7 शोकपर्याकुलेक्षण (for the post half) —(l 2) Ś1 Ñ2 D2 4–7 वीक्ष्य (for ऽवेक्ष्य) M4 भरतो वाक्यकुशल शत्रुघ्नमिदमब्रवीत् —(l 3) Ñ1 damaged for रोऽय पुरुष सुख —(l 4) Ś1 B2 D6 M4 कर्षयत्य(M4 कर्षत्यव)वश तेन, B1 3 4 कर्षत्यवश्य(B4 °श)मेवेन, (for the prior half) —(l 6) Ñ2 B1 3 4 हि, V1 B2 D2 3 5 दु- (for दु) Ś1 Ñ1 V1 (also) D2 3 6 M4 दुःखेन योजित —(l 7) Ś1 -परिदीना, Ñ2 -परा दीना, V1 -परि- ना, D2 -परिपूर्णा, M4 -परिम्लूना (for -परिद्यूना) —(l 8) B1 एव (for एहि) D. 7 पश्याद्य भृशदु खिता (for the post half). —(l 9) D2 4 वा (for first च) Ś1 Ñ1 D6 कष्ट (for कर्म) Ñ1 damaged from कर्म up to हृदि व in l 15 —(l. 10) B. तद् (for यद्) V1 D1 3 प्रपश्यामि(D3 °म), B1 2 4 D2 6 हि प°, M4 प्रशास्यामि (for विप°) M4 °विहित कृत (for the post half). —(l 11) B3 न (for वा). M4 -विनिर्मोहित —D1 reads l 12 in marg. —(l 12) B1 स्व, B3 अ- (for सु). —Ñ1 (second time) damaged from न वेत्त्यात्म up to पाप in l 14 D2 भवेति (sic) (for न वेत्ति) —(l 13) D4 7 transp मम and शत्रुघ्न V1 D1 माता मम च(D1 न मम)शत्रुघ्न कैकेयी भर्तृनाशिनी (D1 पापनिश्चया) —(l 14) D1 येद्, D2 4 5 7 लोभात्, D6 इय (for इद) —(l 15) D1 om from हृदि up to वाक्य in l 17 M4 एव (for इद) B2 मे नु-, D4 7 हि मे, D5 तु नु- (for तु मे) —(l 16) V1 D4 तु (for नु) D2 मन्त्रो (corrupt), D3 5 मात्रा (for मातृ-) Ś1 D6 पुत्रशोकेन दु खिता, V1 अतिमात्र विलपित , D4 7 अतिमात्रेण दु खिता (for the post half) —(l 18) Ñ V1 B D3 4 7 M4 -स्वनेन (for -स्वरेण) B4 त (for तद)]

—Before 1, Dg1 Dt1 Dd1 Dm1 T G M1–3 ins

1772* दीर्घकालात्समुत्थाय सज्ञा लब्ध्वा स वीर्यवान्।
नेत्राभ्यामश्रुपूर्णाभ्या दीनामुद्वीक्ष्य मातरम्।
सोऽमात्यमध्ये भरतो जननीमभ्यकुत्सयत्।
राज्यं न कामये जातु मन्त्रये नापि मातरम्।
अभिषेक न जानामि योऽभूद्राज्ञा समीक्षित ।
विप्रकृष्टे ह्यह देशे शत्रुघ्नसहितोऽवसम्।
वनवास न जानामि रामस्याह महात्मन ।
विवासन च सौमित्रे सीतायाश्च यथाभवत्।

[Dm1 begins with ॐ, M1 श्रीरामचन्द्राय नम M2 श्रीरामाय नम —(l 1) G1 2 -काल, Cm g as above (for -कालात्) Dm1 T1 3 G1 2 M1 च (for स) —(l 3) M1 अभिकुत्सयत् (sic), Cr m g k t अभ्यकुत्सयन् (as above) —G2 repeats consecutively l 4–5 —(l 4) Dm1 G2 M1 जातु, G1 न तु (for नापि). —(l 5) G3 damaged for योऽभू Dd1 Dm1 समीहित , Cr m g k t समीक्षित (as above) —(l 6) G3 विप्रकृष्टो Dt1 [S]भव, T2 वसन् (for ऽवसम्) —(l 8) Dd1 Dm1 वनवास K(ed) Cg वा (for च) Dg1 marg, T2 भवे (sic) (for [अ]भवत्)]

1 [a]) Ś1 D6 तत्र श्रुत्वा तदा नाद, Ñ1 V1 तस्य श्रुत्वार्तनाद तु (V1 om तु [subm]), Ñ2 B D1 श्रुत्वा तस्यार्तनाद च, D2–5 7 M4 तस्य श्रुत्वा चार्त(D2 ह्यार्त, D3 °त्यार्त, D5 तथा, M4 °थार्त)नाद —[c]) Ś1 Ñ V1 B D1–7 M4 रुदतस्तस्य(Ñ1 V1 D1 3 5 M4 °त्र) कौसल्या —[d]) Dg1 Dt1 Dd1 Dm1 T2 3 G1 2 M1–3 चेदम् (for इदम्)

2 Ñ1 damaged for 2 —[a]) B4 आगत (sic), Cr m g आगत (as in text) Ś1 Ñ2 B D6 क्रूर(Ś1 D6 °ध)-मिण्या, V1 D1 3 °कर्माया, D2 4 5 7 सु(D2 तु)नृशसाया (for क्रूरकार्याया). —[b]) G3 कै*.. —[c]) D7 यमह D2 प्रष्टुम् (for द्रष्टुम्) —[d]) Ś1 B3 4 Dm1 D3 5 T3 Cr दीर्घदर्शन, Cm.g k.t दीर्घदर्शिनं (as in text).

एवमुक्त्वा सुमित्रां सा विवर्णा मलिनाम्बरा ।
प्रतस्थे भरतो यत्र वेपमाना विचेतना ॥ ३

स तु रामानुजश्चापि शत्रुघ्नसहितस्तदा ।
प्रतस्थे भरतो यत्र कौसल्याया निवेशनम् ॥ ४

ततः शत्रुघ्नभरतौ कौसल्यां प्रेक्ष्य दुःखितौ ।
पर्यष्वजेतां दुःखार्तां पतितां नष्टचेतनाम् ॥ ५

भरतं प्रत्युवाचेदं कौसल्या भृशदुःखिता ।
इदं ते राज्यकामस्य राज्यं प्राप्तमकण्टकम् ।
संप्राप्तं बत कैकेय्या शीघ्रं क्रूरेण कर्मणा ॥ ६

प्रस्थाप्य चीरवसनं पुत्रं मे वनवासिनम् ।
कैकेयी कं गुणं तत्र पश्यति क्रूरदर्शिनी ॥ ७

क्षिप्रं मामपि कैकेयी प्रस्थापयितुमर्हति ।
हिरण्यनाभो यत्रास्ते सुतो मे सुमहायशाः ॥ ८

---

3 ^{a}) G3 उक्ता (sic) Dt1 ता (for सा) —^{b}) Dd1 Dm1 विवर्ण- (for °र्णा) Dg1 T1 2 G3 M2 3 कृशा (for -[अ]म्बरा) Dt1 विवर्णवदना कृशा —For 3, Ś1 Ñ V1 B D1–7 M4 subst

1773* इत्युक्त्वा दुःखसंतप्ता कौसल्या करुणं वचः ।
प्रतस्थे भरतं द्रष्टुं सुमित्रासहिता तदा ।

[(l 1) B2 सपत्ना (for -संतप्ता) —D3 om (hapl) from l 2 up to 4^{b} —(l 2) D6 reads from सुमित्रा up to 4^{b} in marg B4 -सहितस् (sic) D2 4 7 कौसल्या स्वा(D2 स)न्निवेशनात् (D2 °न) (for the post half)]

4 D2 om 4, D3 om and D6 reads in marg 4^{ab} (for both cf v l 1773*) —^{a}) Dg1 Dt1 T2 G3 M2 3 राजात्मजस् (for रामानुजश्) Ś1 Ñ V1 B D1–7 M4 स चापि भरतः श्रीमान् —^{b}) V1 D1 6 M4 त्वरन् , G M1 3 C*tp* ततः , Cr as in text (for तदा) —^{c}) Dt1 Dd1 T2 Ck t येन, G2 M1 यावत् , G3 M2 तावत् , Cg as in text (for यत्र) —For 4^{cd}, Ś1 Ñ V1 B D1–7 M4 subst

1774* प्रतस्थे दुःखिता द्रष्टुं कौसल्या स्वनिवेशने ।

[D6 reads the post half in marg Ś1 मातर (for दुःखिता) M4 मातरं (for कौसल्या) Ñ1 B2 D1 3 5 M4 स्वे (for स्व) D4 7 स्वान्निवेशनात्]

5 ^{a}) Ś1 Ñ V1 B Dg1 D1–7 M4 भरतशत्रुघ्नौ (by transp) —^{b}) Ñ2 B1 3 4 D1 3 M4 दुःखिता, V1 राघवौ (for दुःखितौ) —^{c}) Dd1 Dm1 T3 G1 परिष्वजेता, G3 × ष्यजेता —For 5^{cd}, Ś1 Ñ V1 B D1–7 M4 subst

1775* दूरादपि प्रणम्योभौ दुःखार्ताविभिपेततुः ।
तौ परिष्वज्य कौसल्या शत्रुघ्नभरतौ तदा ।

[(l 1) Ñ1 D2 4 7 अथ, V1 एव, B2 D1 3 M4 अभि- (for अपि) D2 [अ]स्य, D4 7 [अ]श्रु- (for [उ]भौ) Ś1 दुःखार्ताम्, D3 भयार्तावु (for दुःखार्तावु) D1 अभ्यपेततु, D3 अभ्युपेयतुः —(l 2) D5 -सहितौ (for -भरतौ) Ś1 Ñ B D6 उभौ (for तदा)]

—After 5, Dg1 Dt1 Dd1 Dm1 T G M1–3 ins

1776* रुदन्तौ रुदतीं दुःखात्समेत्यार्यां मनस्विनीम् ।

[M3 रुदत Dg1 Dt1 G1 3 M1–3 रुदती (for °तीं) Dg1 Dt1 Dd1 Dm1 T2 G3 M3 Ct समत्यार्या मनस्विनी (for the post half)]

6 ^{f}) M1 घोरेण, Cv m g t as in text (for क्रूरेण) —For 6, Ś1 Ñ V1 B D1–7 M4 subst

1777* परीता तेन दुःखेन रुरोद भृशदुःखिता ।
उवाच चैनं प्रणतमुत्थाप्य भयविह्वलम् ।
रुदती वाक्यमेतत्सा कौसल्या परुषाक्षरम् ।
दिष्ट्या ते राज्यकामेन प्राप्तं राज्यमकण्टकम् ।
कैकेय्या ते स्वयं मात्रा कैतवेनाभियाचितम् । [5]

[(l 1) Ñ1 damaged Ś1 V1 B2 D6 परितापेन (for परीता तेन) —(l 2) D2 4 5 7 भरतम् (for प्रणतम्) D2 transp उवाच and उत्थाप्य D2 4 5 7 निशश्वासोरगी यथा (for the post half) Ñ1 दुःखा (illeg) भरत विज्ञायातीव विह्वल —(l 3) V1 D1–5 7 रुदमानमिदं वाक्य (for the prior half) B2 परुषाक्षरा —(l 4) B2 काले च (for कामेन) —(l 5) Ś1 Ñ1 D2 4–7 दत्तं (for मात्रा) Ś1 D6 भर्तारं त्ववहन्य(D6 °त्य)हि, D2 4 5 7 भर्तारमवमन्य हि (for the post half)]

7 ^{a}) Ś1 Ñ V1 B D1–7 M4 प्रव्राज्य (for प्रस्थाप्य) —After 7^{a}, Ñ2 B3 ins

1778* पुत्रं मेऽनपकारिणम् ।
लक्ष्मणेन समं कृत्वा

—^{b}) Ñ1 B1 4 पुत्रं Ś1 Ñ1 V1 D1–7 [ऽ]नप(Ś1 नय, D4 5 7 नाप)कारिण, B4 °वासित, Dd1 Dm1 T3 G1 M2 Ct वनचारिण (for °वासिनम्) —^{c}) G3 > यी (damaged) G3 M3 तु, Cg k t as in text (for कं) —^{d}) T3 G1 M2 पश्यती, Cg k t पश्यति (as in text) G1 पाप- (for क्रूर) Dd1 Dm1 -दर्शना —For 7^{cd}, Ś1 Ñ V1 B D1–7 M4 subst

1779* केन युक्तार्थयोगेन कैकेयी जननी तव ।

[B4 पुत्र (for युक्ता) Ñ2 B3 [अ]नु- (for [अ]र्थ-) D3 illeg for ननी तव]

8 ^{a}) Ñ1 damaged from मपि up to गतो in 1780* B सीता वाप्यथ केनेय —^{b}) Ś1 Ñ2 V1 B D1–7 प्र(D3 प्रा)व्रा(Ñ2 °व्र)जयितुम् (for प्रस्थाप°) —^{d}) Dg1 पुत्रो मेस्तु (for सुतो मे सु-) T3 (gloss) हिरण्यनाभग्रहणं शरीरस्योपलक्षणं —For 8^{cd}, Ś1 Ñ V1 B D1–7 M4 subst

अथवा स्वयमेवाहं सुमित्रानुचरा सुखम् ।
अग्निहोत्रं पुरस्कृत्य प्रस्थास्ये यत्र राघवः ॥ ९
कामं वा स्वयमेवाद्य तत्र मां नेतुमर्हसि ।
यत्रासौ पुरुषव्याघ्रस्तप्यते मे तपः सुतः ॥ १०
इदं हि तव विस्तीर्णं धनधान्यसमाचितम् ।
हस्त्यश्वरथसंपूर्णं राज्यं निर्यातितं तया ॥ ११
एवं विलपमानां तां भरतः प्राञ्जलिस्तदा ।
कौसल्यां प्रत्युवाचेदं शोकैर्बहुभिरावृताम् ॥ १२
आर्ये कस्मादजानन्तं गर्हसे मामकिल्बिषम् ।
विपुलां च मम प्रीतिं स्थिरां जानासि राघवे ॥ १३

1780* यत्र मे दयित पुत्रो गतो राम सलक्ष्मण ।

[Ñ1 damaged up to गतो Ñ2 B1-3 यथा, B4 यदि (for यत्र)]

9 ᵃ) Ñ2 B तथाद्य D2 3 5 [ए]तत्, D4 7 [इ]ह (for [अ]ह) —ᵇ) V1 D1 सुमित्रासहिता Ś1 D6 वने, Ñ V1 B D1 M4 वन, D4 5 7 ह्यहं (for सुखम्) D2 3 सुमित्रानुचरास्म्यहं (sic) —Dd1 reads 9ᶜᵈ in marg —ᵈ) Dt1 येन (for यत्र) —For 9ᶜᵈ, Ś1 Ñ V1 B D1-7 M4 subst

1781* यास्यामि यत्र रामोऽसौ गत सीतासहायवान् ।

[Ñ1 V1 D1-5 7 M4 गमिष्ये D3 येन (for यत्र) Ñ1 B2 वे (for ऽसौ) Ñ1 damaged from सहायवान् up to स्वयमे in 10ᵃ]

10 Ñ1 damaged up to स्वयमे (cf v l 1781*) —ᵃ) B1 राम (for काम) D4 ह्यहम् (for स्वयम्) Ś1 Ñ V1 B D1-7 M4 त्व (for [अ]द्य) —ᵇ) B2 नय, D5 यत्र (for तत्र) Ś1 Ñ V1 B1 3 4 D1-7 नय पुत्रक, B2 तत्र पुत्रक G3 नेतुम : (damaged) —ᵈ) Cr m g k as in text, Ct तप्स्यते (for तप्यते) Dt1 तप्स्यते मे सुतस्तप , T1 पुत्रो मे तप्यते तप —For 10ᶜᵈ, Ś1 Ñ V1 B D1-7 M4 subst

1782* तपस्तप्यति यत्रासौ पुत्रो मे पितुराज्ञया ।

[Ś1 D6 तपति, Ñ1 D4 M4 तप्स्यति (for तप्यति)]

11 ᵇ) G3 M3 -समाहित, Cr m g k t as in text (for °चितम्) —ᵈ) I2 निर्याचित Dd1 Dm1 तथा, T1 मया, T2 (before corr) त्वया, Cg as in text (for तया)
—For 11, Ś1 Ñ V1 B D1-7 M4 subst

1783* इद त्व धनरत्नाढ्य चतुरङ्गबलान्वितम् ।
पित्रा निसृष्ट कल्याण राज्य प्राप्नुह्यभीप्सितम् ।

[(l 1) Ñ2 B3 4 तु, D2 (marg) स्व , M4 ते (for त्व) D3 -धान्य च, D4 -रत्न च (for -रत्नाढ्य) G (ed) बलान्वित (for °तम्) —(l 2) Ñ B1-3 [अ]भिसृष्ट, B4 वि°, D1 [अ]ति° (for निसृष्ट) Ś1 Ñ1 D2 3 6 कल्याण (for °ण) D4 आप्नुहि (for प्रा°) Ś1 Ñ2 B वाञ्छि , D6 वाञ्छित (for [अ]भीप्सितम्) M4 राज्य निहतकण्टक (for the post half)]
—After 11, Dg1 Dt1 Dd1 Dm1 T G M1 2 ins

1784* इत्यादिबहुभिर्वाक्यैः क्रूरैः सभर्त्सितोऽनघ ।
विव्यथे भरतोऽतीव व्रणे तुद्येव सूचिना ।
पपात चरणौ तस्यास्तदा सभ्रान्तचेतन ।
विलप्य बहुधासज्ञो लब्धसज्ञस्तदाभवत् ।

[(l 1) G1 सभाषितो (sic), Cg k t सभर्त्सितो (as above) —(l 2) Dg1 reads सूचिना in marg —(l 3) G3 damaged for भ्रान्तचे —(l 4) G3 M2 बहु नि सज्ञो ❀ Cg बहुधासज्ञ इत्यत्र असज्ञ इति पदच्छेद । ❀ So also Ct T1 2 G3 M2 तत स्थित (M2 °स्तत) (for तदाभवत्)]

12 ᵃ) Ś1 Ñ2 V1 B1-3 D1 6 M4 इति, M3 क्षिप्र (for एव) Ś1 Ñ V1 B3 4 Dg1 D1-7 M4 ला(Dg1 वि, D2 आ)लप्य(Ñ2 D4 °प)माना, G3 M3 प्रलपमाना, Cr g k t as in text (for विलप°) D2 3 5 तु —ᵇ) Ś1 Ñ V1 B D1-7 M4 कौसल्या भरतस् , Dg1 Dt1 Dd1 Dm1 T2 3 G M1-3 प्राजलिर्भरतस् (by transp) V1 D1 तत , Dd1 Dm1 G1 2 M1 स्थित (for तदा) —For 12ᶜᵈ, Ś1 Ñ V1 B D1-7 M4 subst

1785* प्राञ्जलि प्रणतो वाक्यमिदं प्रश्रितमब्रवीत् ।

[Ś1 Ñ D4 6 7 प्रय(Ñ °स [sic])तो, V1 प्रणतो भूत्वा (hypm) (for प्रणतो) Ñ1 V1 D1 प्रसृतम्, D2 अश्रुतम्, D4 7 प्रथितम् , M4 मातरम् (for प्रश्रितम्)]

—Thereafter Ś1 Ñ2 B D6 M4 read an addl colophon —*Sarga name* Ś1 Ñ2 B D6 भरतोपालम्भ —*Sarga no.* (figures, words or both) B1 4 D6 om , Ś1 82, Ñ2 M4 78, B2 3 77 —D6 concludes with रामाय नमः. —Thereafter, Ś1 Ñ2 B D6 M4 cont

1786* तामेव ब्रुवती दीना कौसल्या राममातरम् ।
कृताञ्जलिरुवाचेद भरतो बाष्पगद्गदम् ।

[(l 1) Ś1 B1 4 तामेव, M4 एव ता (by transp) Ñ2 B1 3 रुदती (for ब्रुवती). M4 पुत्रगृद्धिनीं —(l 2) B2 -गद्गद , M4 -विह्वल (for गद्गदम्)]

13 Ñ1 illeg up to गर्हसे in ᵇ —ᵃ) Ś1 Ñ2 B D1-7 अजानन्ती, M4 अजानाना, Cr m g k t as in text (for °नन्त). —ᵇ) M3 अर्हसे (for गर्हसे) Ś1 Ñ B Dt1 D2-7 अकल्मष. —ᶜ) Ś1 Ñ V1 B D2-7 M4 हि (for च) D1 विपुला हि मम प्रीति —ᵈ) Dd1 T1 M3 Ct स्थिता, D1 स्थिरा (for °रा) Dd1 जानामि, D4 जानीहि, Ct as in text (for जानासि)
—After 13, Ś1 D6 ins

1787* वेदाश्चिन्दति साङ्गान्स ब्राह्मणाश्च विशेषत ।

—After 13, Ñ1 repeats erroneously (damaged from प्राप्त in l 12 up to पाप in l 14) l 9-14 of 1771*

कृता शास्त्रानुगा बुद्धिर्मा भूत्तस्य कदाचन ।
सत्यसंधः सतां श्रेष्ठो यस्यार्योऽनुमते गतः ॥ १४
प्रैष्यं पापीयसां यातु सूर्यं च प्रति मेहतु ।
हन्तु पादेन गां सुप्तां यस्यार्योऽनुमते गतः ॥ १५
कारयित्वा महत्कर्म भर्ता भृत्यमनर्थकम् ।
अधर्मो योऽस्य सोऽस्यास्तु यस्यार्योऽनुमते गतः ॥ १६

परिपालयमानस्य राज्ञो भूतानि पुत्रवत् ।
ततस्तु द्रुह्यतां पापं यस्यार्योऽनुमते गतः ॥ १७
बलिषड्भागमुद्धृत्य नृपस्यारक्षतः प्रजाः ।
अधर्मो योऽस्य सोऽस्यास्तु यस्यार्योऽनुमते गतः ॥ १८
संश्रुत्य च तपस्विभ्यः सत्रे वै यज्ञदक्षिणाम् ।
तां विप्रलपतां पापं यस्यार्योऽनुमते गतः ॥ १९

14 Ñ1 om 14[ab] —[a]) Ñ2 B3 D1–5 7 मात , B1 2 कि तु (B2 नु), B4 Dt1 Dd1 Dm1 T1 Ct कृत-, Cv r m g k as in text (for कृता) —[b]) G1 damaged for भूत्तस्य क V1 D1 दुरात्मन (for कदाचन) B1 (marg also as in text) 4 मा भून्मे दे (B4 हि) वि सर्वश —[c]) D1 सत्यधर्मभृता (for °संध सतां) —[d]) Ñ1 रामो मते, V1 B3 4 D6 (before corr) [आ]र्योनुमतो (for [आ]र्योऽनुमते) —After 14, G3 reads 17

15 B4 M4 om (hapl) from 15 up to l 2 of 1788* and 16 respy —[a]) Dg1 Dd1 Dm1 T2 M1 Cr m g प्रेष्य, D6 प्रेष्या, Cv k t as in text (for प्रैष्य) Ś1 Ñ B1–3 D2–5 7 प्रे (Ñ B1 2 प्रे) ष्या (D5 °ष्यी [sic]) पापीयसीं यातु, V1 प्रेक्ष्य तूदयने सूर्यं, D1 प्रेष्यात्प्रेष्यतरो भूयात्, M3 प्रेष्यता पापिना यातु —[b]) V1 D3 सूर्यं तु, D1 स सूर्यं, D4 7 G3 सूर्यस्य (G3 °-) (for सूर्यं च) V1 मेहत (sic), D3 हेमतु (meta) (for मेहतु) —[c]) M3 ह न (for हन्तु पादेन) Ś1 Ñ2 V1 B1–3 D1 6 पादेन हन्या (B1 न्या [sic]) द्गा (V1 °त्स) सुप्ता, Ñ1 D2–5 7 पादेन गा च (D3 न [sic]) स्पृशतु (D2 4 7 स्पृशतु वा) —[d]) V1 B3 [ऽ]नुमतो (for ऽनुमते) D3 मत —After 15, Ś1 Ñ V1 B (B4 after 14 [owing to omission]) D1–7 ins

1788* उच्छिष्ट सस्पृशतु गामग्निं ब्राह्मणमेव च ।
स निन्दतु गुरु चैव यस्यार्योऽनुमते गत ।
सखिभार्यां गुरोर्भार्यां मनसा सोऽभिपद्यताम् ।
गन्तु पापमति पापो यस्यार्योऽनुमते गत ।

[B4 om l 2, D2 4 5 6 7 om (hapl) l 1–2 —(l 1) Ś1 D6 म स्पृशतु, V1 सस्पृशेद्यो (for सस्पृशतु) B1 D1 उच्छिष्ट सस्पृशेद्वावम् (for the prior half) Ñ2 B3 तु (for च) —(l 2) Ñ1 illeg up to चै Ñ2 गुरूञ् (for गु०) Ñ2 [ऽ]नुमतो (for °ते) —(l 3) Ś1 D6 [ऽ]भिपद्यता, D1 [ऽ]भिमन्यतु (for ऽभिपद्यताम्) —(l 4) Ñ2 त तु (sic) (for गन्तु) Ś1 D6 जतुष्वपमति पापो (for the prior half)]

16 M4 om 16 (cf v l 15) Ś1 D2–7 transp 16 and 18 B2 repeats 16 after transp 16[ab] and 16[cd] D3 illeg for [a] —[b]) Ś1 Ñ B2 (first time)–4 D1 4–6 भर्तृ (Ś1 °र्त्वा, Ñ2 D4 °त्कान्, D1 6 °र्ता [as above]) भृत्यान्नि (D1 °नन) र्थकान् (Ñ B2 [first time]–4 D1 °क), B2 (second time) भृत्यान्हन्यान्निरर्थक, D2 7 भृत्यान्भक्त्या (D7 भक्तान्भृत्या) न्निरर्थयान —[c]) V1 B2 (first time) D1 3 यस्य (D1 य स) तस्य, Dd1 Dm1 तस्य यस्य, T3 G1 2 यस्तु सोस्य, Cv m g k t as in text (for योऽस्य सोऽस्य) Ś1 Ñ V1 B3 4 D4–7 किल्बिष समवाप्नोतु (B4 D5 °ति), B2 (second time) किल्बिष च समाप्नोतु —[d]) B4 [ऽ]नुमतो (for °ते) —After 16, D1 ins 1799* and 1800*

17 V1 T3 om (hapl) 17–18 G3 reads 17 after 14 —[a]) D4 7 प्रति- (for परि-) Ś1 Ñ2 B2–4 D1–7 M4 पालयमानाय (for °नस्य) —[b]) Ś1 B2 3 D1–7 M4 राज्ञे, B4 राज्ये (for राज्ञो) D3 पूर्ववत, G1 पुत्रक (corrupt) (for पुत्रवत्) —[c]) Dd1 Dm1 G3 Cg त, Cv as in text, Cr m तद् (for तु) Ś1 Ñ2 B2–4 D1–7 M4 तस्मै स (B4 तद्, D4 6 7 स, D5 हि) द्रुह्य (D6 °ह) ता पापो, M3 तत (damaged) ता पापो —[d]) B4 [ऽ]नुमतो (for °ते) —After 17, D1 ins 1792* and 1798*

18 V1 T3 om 18 (cf v l 17) Ś1 D2–7 transp 16 and 18 —[a]) B2 D1 वलि, D7 बल- (for बलि-) D1 षडशम् (for षड्भागम्) D3 illeg from मुद्धृत्य up to प्रजा in [b] Ś1 D2 5 6 7 आदाय, M4 उत्सृज्य (for उद्धृत्य) D4 बलषड्भागमादाय —[b]) Ś1 Ñ B2–4 D1 2 4–7 राज्ञश्च (for नृपस्य) Ct [अ]रक्षितु (for [अ]रक्षत) —[c]) T2 M2 4 यस्य, G1 2 M1 यस्तु (for योऽस्य) G1 2 M4 तस्य (for सोऽस्य) Ś1 Ñ B2–4 D1–7 किल्बिष समवाप्नोतु (Ś1 °ति) —[d]) B4 [ऽ]नुमतो, Dg1 [ऽ]नुगते (for ऽनुमते) Dg1 मत —After 18, Dm1 ins राम, D1 ins 1801*

19 [a]) V1 अङ्गीकृत्य, B2 प्रतिश्रुत्य (for संश्रुत्य च) B2 (marg also) च धन्विभ्यो (for तपस्विभ्य) —[b]) Ś1 B3 4 D6 यज्ञे वै, Ñ1 B2 D4 5 7 यज्ञे (D4 °ज्ञि) यो (D5 °या), V1 D1–3 M4 यज्ञे (D1 °ये) ष्टा (for सत्रे वै) D1 गुरु (for यज्ञ-) —[c]) Ś1 Ñ B2–4 D1–6 स, D7 स- (for ता) Ś1 Ñ2 B2 3 D2–7 विप्र (Ś1 °प्रं, D2 °प्रो) लु (Ś1 D4 °ल) भता (D4 7 °त) V1 सरित्प्रात्युभ्यता (sic), D1 स विप्रो लुपत (sic) (for ता विप्रलपता) Ś1 Ñ V1 B2–4 D1–3 5 6 M4 पापो (for पाप) —[d]) V1 B4 [ऽ]नुमतो (for ऽनुमते) —After 19, B2 D4 7 ins 1790*

771 हस्त्यश्वरथसंबाधे युद्धे शस्त्रसमाकुले ।
मा स्म कार्षीत्सतां धर्मं यस्यार्योऽनुमते गतः ॥ २०
उपदिष्टं सुसूक्ष्मार्थं शास्त्रं यत्नेन धीमता ।
स नाशयतु दुष्टात्मा यस्यार्योऽनुमते गतः ॥ २१

पायसं कृसरं छागं वृथा सोऽश्नातु निर्घृणः ।
गुरूंश्चाप्यवजानातु यस्यार्योऽनुमते गतः ॥ २२
पुत्रैर्दारैश्च भृत्यैश्च स्वगृहे परिवारितः ।
स एको मृष्टमश्नातु यस्यार्योऽनुमते गतः ॥ २३

20 B2 D4 om (hapl) 20–21, V1 D1 7 om (hapl) 20 G3 transp 20 and 21 —a) D2 -समाध; D3 -सद्युद्धे (for सबाधे) —b) B3 सूर्ये (sic) G1 शत्रु- (for शस्त्र) —c) Ś1 Ñ2 B1 3 4 D2 3 5 6 M4 कर्म (for धर्मं) —d) B4 [ऽ]नुमतो

21 B2 D4 M4 om (hapl) 21 (for B2 D4, cf v l 20) G3 transp 20 and 21 —a) M3 उपविष्ट (sic), Cr m g उपदिष्टं (as in text) B4 D2 स-, D6 G1 तु, Cr m g t as in text (for सु-) —b) M3 damaged for शास्त्र यत्नेन D2 हित (for शास्त्र) Ś1 Ñ2 V1 B1 3 4 D1 6 तत्त्वेन, D2 3 5 7 प्राज्ञेन (for यत्नेन) B4 धीमता (for °मता) —c) M3 damaged Dg1 नाशयति, Cr m g k नाशयतु (as in text) Ś1 D6 तद्धर्मं, Ñ V1 B1 3 4 D1–3 5 7 दुर्मेधा, M3 पापात्मा (for दुष्टात्मा) —d) V1 B4 [ऽ]नुमतो —After 21, D3 ins

1789* निपादाध्ययनात्पाप वेदाज्ञानामु यद्भवेत् ।
द्विजस्य तेन युज्येऽह यस्यार्योऽनुमते गत ।

D3 cont, Ś1 Ñ B1 3 4 D2 5 6 ins after 21, B2 D4 7 ins after 19, whereas D1 ins after 1801*

1790* कृत्ये विवदमानेषु पक्षमाश्रित्य जल्पताम् ।
पाप स समवाप्नोतु यस्यार्योऽनुमते गत ।

[(l 1) B1 हृत्ये (for कृत्ये) B1 2 D3 विवदमाने तु (B2 च) D1 विवादे समनुप्राप्ते (for the prior half) Ś1 D5 6 जल्पत —(l 2) Ś1 Ñ2 B2 D2–6 स पाप (by transp), D1 तत्पाप (for पाप स) D2 समनुप्राप्तो Ñ1 स वै पापमवाप्नोतु, D5 7 पाप समसवाप्नोतु(D5 °ति) (for the prior half) B4 [ऽ]नुमतो]

—After 21, Dg1 Dt1 Dd1 Dm1 T G M1–3 ins

1791* मा च त व्यूढबाहुम चन्द्रार्कसमतेजसम् ।
द्राक्षीद्राज्यस्थमासीन यस्यार्योऽनुमते गत ।

[(l 1) T3 मा च राम व्यूढबाहु (for the prior half) Dg1 Dt1 T1 2 G3 M3 -भास्कर- (for -[अ]र्कसम-)]
—Thereafter, Dg1 T2 read 25

22 The sequence of st from 22–28 in Ś1 Ñ V1 B D1–7 is 27, 22 (D3 om), 28, 24 (Ś1 V1 B D1 6 om), 26 (Ś1 D6 om), 25 and 23 (om ab) —D3 om (hapl) 22 —a) D1–7 कृशर(D1 °रा) Ś1 Ñ V1 B D1 2 4–7 मास, M2 3 चाज्य, Cg t as in text (for छाग) —b) Ś1 B D2 4–7 M4 प्राश्नातु, T2 योश्नाति, Cm g k t as in text (for सोऽश्नातु) M2 निर्घृण, M3 om (for निर्घृण) —c) M4 अपि (for चापि) T2 M4 [अ]वजानाति, Cg as in text (for [अ]वजानातु) —d) B4 [ऽ]नुमतो —After 22, Ś1 D6 ins 1799* then cont, Ñ V1 B D2 4–7 ins, while D1 ins after 17, whereas D3 ins after 27

1792* मातर पितर वृद्धमाचार्यं ब्राह्मणं गुरुम् ।
सोऽवमन्यतु दुष्टात्मा यस्यार्योऽनुमते गत ।

[(l 1) Ś1 D6 पितर मातर (by transp) V1 D1–5 7 अतिथि (for मातर) V1 तथा —(l 2) B1 अवमन्यु, D2 5 °त (for सोऽवमन्यतु) Ś1 D6 दुष्टात्मा मन्यतेत, Ñ2 B2–4 अवमन्यता स दुष्टात्मा (hypm) (for the prior half)]
—Thereafter V1 D1 read 1798*

—After 22, Dg1 Dt1 Dd1 Dm1 T G M1–3 ins, M4 ins l 1–2 after l 2 of 1795* and l 3–6 after 1802*

1793* गात्र स्पृशतु पादेन गुरूनपरिवेदेच्च स ।
मित्रे द्रुह्यत सोऽत्यन्त यस्यार्योऽनुमते गत ।
विश्वासात्कथित किंचित्परिवादं मिथ क्वचित् ।
विवृणोतु स दुष्टात्मा यस्यार्योऽनुमते गत ।
अकर्ता चाकृतज्ञश्च त्यक्तात्मा निरपत्रप । [5]
लोके भवतु विद्विष्टो यस्यार्योऽनुमते गत ।

[G3 om (hapl) l 1–2 —(l 1) Dt1 Dd1 Ck t गात्र, T2 G1 2 M1 गा च, M3 गा॰, M4 गात्र, Cv r m g as above (for गात्र) G1 गुरुश्च (hypm) (for गुरून्) Dg1 Dt1 T2 M3 Ct परिवेदेत च, T1 परिवदति च (sic), M2 परिवेदेत्तथा, M4 अभिविन्देत्त च K(ed) Cg परिवदत्स्वय —(l 2) T2 M3 Ck मित्र, T3 M4 मित्र, Cv r m g t as above (for मित्रे) Dt1 Dd1 Dm1 [ऽ]त्यर्थं (for त्यत्न्त) —After l 2, T3 ins 1794*, while M4 reads st 27 and then reads l 21–22 of 1802* —(l 3) M3 damaged for वाद मिथ —(l 4) T1 2 G स (for स) —T2 om (hapl) l 5–st 23 —(l 5) T1 2 कृ॰ (for च). Dt1 Ck t त्यक्तश्च, M3 त्यक्तागिर्, Cv r m g t p (for त्यक्तात्मा) M3 निरपत्रक (sic) —(l 6) Dd1 Dm1 G1 विद्वेष्यो, M4 च द्वेष्टा, Ck t as above (for विद्विष्टो)]

23 For sequence in Ś1 Ñ V1 B D1–7 cf v l 22 M4 reads 23 (preceded by l 21–22 of 1802* and l 3–6 of 1793*) after 27 —T3 om 23 (cf v l 1793*) Ś1 Ñ V1 B D1–7 om 23ab —a) T1 2 G3 M3 4 Cg पुत्रदारैश्च —b) M3 गृहे, M4 स्वजनै (for स्वगृहे) Dt1 परि॰ त, T2 परिचारित —c) M4 स्वगृहे (for स एको). Ś1 Ñ V1 B D2–7 एकाकी मि(Ñ1 B4 D3 5 मृ)ष्टमश्नातु (D5 °ति) —d) B4 [ऽ]नुमतो —After 23, V1 D2 3 5

राजस्त्रीबालवृद्धानां वधे यत्पापमुच्यते ।
भृत्यत्यागे च यत्पापं तत्पापं प्रतिपद्यताम् ॥ २४

ins 1799* and then D5 alone cont , while Dg1 Dt1 Dd1 Dm1 T1 2 G M ins after 23, T3 ins after l 2 of 1793*

1794* अप्राप्य सदृशान्दारानानपत्य प्रमीयताम् ।
अनवाप्य क्रिया धर्म्यां यस्यार्योऽनुमते गत ।
मात्मन सतति द्राक्षीत्स्वेषु दारेषु दु खित ।
आयु समग्रमप्राप्य यस्यार्योऽनुमते गत ।

[M4 om (hapl) l 1–2 —(l 1) G3 अनपत्य (sic), Cg अनपत्य (as above) D6 अपत्यार्थमयतवान् (for the post half) —(l 2) Dm1 अन्य वाप्य (sic), Cm अनवाप्य (as above) T2 3 G3 M2 Cm k क्रिया धर्म्या, Cg t as above (for क्रिया धर्म्यां) —(l 3) M1 सततीन्, M2 सतत (for सततिं) T2 स्पृष्टा, G2 M1 स्वेष्ट (for स्वेषु) —(l 4) M4 आस्थाय (for अप्राप्य)]

—After 1794*, M4 reads l 3–8 of 1795*

24 For sequence in Ś1 Ñ V1 B D1 7 cf v l 22 Ś1 V1 B D1 6 om 24 —[a]) D4 5 7 बालस्त्रीराज- (by transp) —D4 om 24[cd] —[c]) Ñ D2 3 5 7 भक्त-, M4 भर्तृ- (for भृत्य-) D3 illeg for त्यागे च यत्पाप G1 3 -त्यागेन (for त्यागे च) —[d]) Dt1 om (hapl), Dm1 marg (for तत्पाप) Dg1 G3 यस्यार्योनुमते गत —After 24, Dg1 Dt1 Dd1 Dm1 T G M1–3 ins , M4 (om l 9–12) ins l 1–2 (followed by l 1–2 of 1793*) after 24 and l 3–8 after 1794*

1795* लाक्षया मधुमांसेन लोहेन च विषेण च ।
सदैव बिभृयाद्भृत्यान्यस्यार्योऽनुमते गत ।
संग्रामे समुपोढे तु शत्रुपक्षभयंकरे ।
पलायमानो वध्येत यस्यार्योऽनुमते गत ।
कपालपाणि पृथिवीमटता चीरसंवृत ।
भिक्षमाणो यथोन्मत्तो यस्यार्योऽनुमते गत ।
मद्ये प्रसक्तो भवतु स्त्रीष्वक्षेषु च नित्यश ।
कामक्रोधाभिभूतश्च यस्यार्योऽनुमते गत ।
मा स्म धर्मे मनो भूयादधर्मं स निषेवताम् ।
अपात्रवर्षी भवतु यस्यार्योऽनुमते गत ।
संचितान्यस्य वित्तानि विविधानि सहस्रश ।
दस्युभिर्विप्रलुप्यन्तां यस्यार्योऽनुमते गत ।

[(l 1) G3 damaged for या मधुमा G1 लोमेन च, M4 लिहेत्सद (for लोहेन च) Dd1 विशेषण (sic) —(l 2) M4 सदैव —After l 2, Dm1 ins राम —(l 3) Dg1 Dt1 T2 G3 M2 4 च, T1 स्म (for तु) Dd1 Dm1 G3 M2 शत्रुपक्षे (for °पक्ष) —(l 4) M2 पलायमानौ (sic) Dg1 युध्येत (for वध्येत) —Dg1 om l 6–7 —(l 6) Dg1 भिक्ष्यमाणो G2 M2 [आ]त्मत्तो (for [उ]न्मत्तो) —(l 7) T1 2 G3 Cg पाने (for मद्ये) G3 damaged for सक्तो भ M4 नित्यदा —G3 M2 read l 8–9 after st 25 —(l 8) T1 2 G3 तु (for च) —(l 9) Dg1 Dt1 Dd1 Dm1 [अ]स्य, M3 सु-, Cg as above (for स्म) G3 damaged for मे मनो Dg1 सुनिषेवित , T3 G1 3 स° (for स निषेवताम्) —(l 10) M3 -वापी, Cg t as above (for -वर्षी) M2 [ऽ]नुमनो —T2 reads l 11–12 after l 6 —(l 11) G3 [अ]प- (for [अ]स्य) —(l 12) M2 विप्रलप्यता, Ct विप्रलुप्यता (as above)]

—Thereafter M4 ins 1802*

—Ñ D4 after 24[ab], D2 3 5 7 after 24, ins 1801*.

उभे संध्ये शयानस्य यत्पापं परिकल्प्यते ।
तच्च पापं भवेत्तस्य यस्यार्योऽनुमते गतः ॥ २५

25 For sequence in Ś1 Ñ V1 B D1–7 cf v l 22 M4 transp 25 (including 1796*) and 26 and reads after 28 Dg1 T2 read 25 after 1791* —[a]) D4 7 उप-, Cr m g k t as in text (for उभे) V1 सधे (sic), Cr m g k t as in text (for सध्ये) —[b]) Ś1 B D6 परिकल्पित, Ñ1 D2–5 7 °कीर्त्यते (D3 °र्तित), Ñ2 °कथितं, D1 °कल्पते, T3 प्रति° (for परिकल्प्यते) M4 यत्पाप तदवाप्नुयात् —[c]) B2 अवाप्नोतु (for भवेत्तस्य) Ś1 Ñ V1 B1 3 4 D2–7 तत्पाप समवाप्नोतु, D1 स तत्पापमवाप्नोतु, M3 तत्पाप प्रतिपद्येत, M4 गुरोश्चालीकनिर्बंधे —[d]) B4 [ऽ]नुमतो —After 25, Ś1 Ñ V1 B1–3 D1–7 M4 ins , while B4 ins after 26

1796* प्रमादिनि नरे पाप यच्चैवानृतवादिनि ।
तत्प्राप्नोत्वकृतप्रज्ञो यस्यार्योऽनुमते गत ।
ऐश्वर्यमकृतप्रज्ञो लभता चानुशास्तु च ।
कर्तव्यमतिभि सार्धं यस्यार्योऽनुमते गत ।
ग्रामे वसतु षण्मासान्स्वसुता चोपजीवतु ।

[(l 1) Ś1 D6 प्रमाथिनि, Ñ1 V1 B2 D3–5 7 प्रमा(D4 7 °शा)यिते, D2 प्रमादिते, M4 अप्रमाणे (for प्रमादिनि) B4 परे (for नरे) B1 3 [अ]पि, D4 7 वा (for [ए]व) B4 D2 [अ]नृप- (for [अ]नृत-) —(l 2) B4 D1–3 5 M4 तदाप्नोतु V1 B2 D5 कृतप्रज्ञो (for [अ]कृत°) Ñ1 तदाप्नो नु त्वकृतप्रजा (sic), D4 7 तदवाप्नोतु स नरो (for the prior half) B4 [ऽ]नुमतो —Ś1 D6 om (hapl) l 3–4, D1 om l 3–5 —(l 3) D4 7 ऐश्वर्याद् Ñ2 V1 B अनुशास्तु, D4 5 वानु° (for चा°) —(l 4) D2 वा कर्तमतिभि सार्धं (sic), D3 कर्तव्य पापिभि सार्धं, D4 कर्तव्यमानिभि स्पर्धां (for the prior half) B4 [ऽ]नुमतो —(l 5) V1 षण्मास Ś1 स सुताश्, Ñ2 B3 पशुता B1 श्वशुराश् (for स्वसुता) B4 ष्टि (for च)]

—Thereafter M4 cont (followed by 1799*)

1797* एकाकी मृष्टमश्नातु यस्यार्योऽनुमते गत ।
[Cf 23[cd]]

—After 25, G3 M2 ins l 8–9 of 1795*

यदग्निदायके पापं यत्पापं गुरुतल्पगे ।
मित्रद्रोहे च यत्पापं तत्पापं प्रतिपद्यताम् ॥ २६
देवतानां पितॄणां च मातापित्रोस्तथैव च ।
मा स्म कार्षीत्स शुश्रूषां यस्यार्योऽनुमते गतः ॥ २७
सतां लोकात्सतां कीर्त्याः सज्जुष्टात्कर्मणस्तथा ।
भ्रश्यतु क्षिप्रमद्यैव यस्यार्योऽनुमते गतः ॥ २८

26 For sequence in Ś1 Ñ V1 B D1–7 cf v l 22 M4 transp 25 (including 1796*) and 26 and reads after 28 Ś1 D6 om 26 —[a]) D4 यदा (for यद्) D1 अग्निदायिके, T2 अग्निदाहके —[b]) Ñ1 D2–5 7 यच्च गोघातके भवेत्, Ñ2 B यत्पाप ग्रामघातिनि (B4 °ना), V1 D1 पापं वा (D1 यत्) गुरुघातिनि —[c]) V1 B D3 4 7 मित्रद्रुहि —After 26, B1 ins 1796*

27 For sequence in Ś1 Ñ V1 B D1–7 cf v l 22. Dg1 D4 7 om 27 —[a]) Ś1 Ñ V1 B D1–3 5 6 M4 देवतानिथि (D1 °नां च, D2 °थ्य) भृत्यानां (B4 °भ्या) —[b]) D1 मातृ- (for माता-) —[c]) M4 करोतु (for स्म कार्षीत) T3 तु (for स) Ś1 Ñ V1 B D1–3 5 6 स्वयम् (B1 °य) आत्त (D2 °त्त) दत्तं च (Ñ V1 D1–3 5 निर्वाप्य) —[d]) B4 [ऽ]नुमतो (for °ते) —After 27, Ś1 Ñ B D6 ins, while V1 D1 cont after 1792*

1798* मा च शास्त्रानुगा बुद्धि प्रयुञ्जीत कदाचन ।
सत्सु मा च प्रतिष्ठेत्स यस्यार्योऽनुमते गत ।

[(l 1) Ñ1 B1 2 4 वाच (for बुद्धिं) Ś1 D6 नैव शास्त्रानुगा वाच (for the prior half) —(l 2) Ñ1 प्रयुञ्जीत निष्ठेत् (hypm), V1 प्रतिष्ठा च, B1 4 D1 प्रतिष्ठेत, G (ed) प्रतितिष्ठेद् (for प्रतिष्ठेत्स) Ś1 सत्सु च प्रतितिष्ठेत्स, Ñ2 स स मान प्रतिष्ठेत्स (sic), B2 D6 सत्सु मा (D6 च) प्रतितिष्ठेत (for the prior half)]

—Ñ B cont, Ś1 D6 ins after 22, V1 D2 3 5 ins. after 23, D1 ins after 16, while M4 ins after 1797*

1799* आषाढी कार्तिकी माघी तिथय पुण्यसमिता ।
अप्रदानवतो यान्तु यस्यार्योऽनुमते गत ।

[(l 1) M4 मासी (for माघी) V1 D3 M4 तीर्थ, D2 ताश्च (for पुण्य) Ñ2 V1 B3 D2 समता, B4 D5 -समगा, D3 -समता (for समिता) Ś1 D1 6 वशाखी चैव पूर्णिमा (D1 6 च विशेषत) (for the post half) —(l 2) Ś1 D6 यातु (for यान्तु) D2 5 प्रमादेनैव गच्छेतुर् (D6 °च्छतु) (for the prior half)]

—Thereafter Ś1 D6 read 1792*, while D1 cont

1800* पूर्वमङ्गीकृत विप्रे दान भूमिस्तथा भृति ।
यस्तु सम्यानिपापस्तत्यस्यार्योऽनुमते गत ।
अस्यापि प्रदत्त यस्पर्धया प्रविलुम्पति ।
तत्पाप समवाप्नोतु यस्यार्योऽनुमते गत ।
वेदविक्रयकर्ता स्यात्स्वपुत्रीं चोपजीवतु । [5]
या (जा ?) मातृतो वृत्तिरस्तु यस्यार्योऽनुमते गत ।

[The prior half of l. 3 subm, l. 6 in marg]

—After 27, D? ins 1792*, M2 ins l 1–2 of 1802*, while M4 reads st 23 (preceded by l 21–22 of 1802* and l 3–6 of 1793*)

28 For sequence in Ś1 Ñ V1 B D1–7 cf v l 22 M4 transp 25 (including 1796*) and 26 and reads after 28 D4–G1 om (hapl) 28 —[a]) M1 स तेल; Cm g k t as in text (for first सता) B4 Dm1 D3 लोकान (for लोकात्) Ś1 Ñ V1 B D3 6 T2 M4 कीर्ते, D1 कीर्तिः, Cg कीर्त्यान, Ck t as in text (for कीर्त्या) —[b]) V1 सचेष्टात, Dg1 Cm g सजुष्टान, D2 6 स जुष्टान, G1 स जुष्ट (for सज्जुष्टात्) V1 D2 3 5 M3 च स, Dg1 M3 सना (for तथा) Ś1 Ñ B D6 सद्भिर्दिष्टाच्च कर्मण, D1 सत्कर्मकरणस्य च —[c]) Ñ B2 3 D1–5 M4 भ्रश्यता, V1 B4 भ्रश्य (B4 °श)ता, B1 D- पश्यता T2 भ्रमतु (sic), M2 भ्रमतु (for भ्रश्यतु) Ś1 D6 स भ्रश (D6 °श्य)तु दुराचारो, M3 भ्रश्यत्वद्यैव च क्षिप्र —[d]) V1 B1 [ऽ]नुमतो, D2 [ऽ]नुमते (for ऽनुमते) —After 28, Ś1 V1 B D6 ins, Ñ D4 ins after 24[ab] and D2 3 5 7 after 24, while D1 ins after 18

1801* यत्पाप ब्रह्महत्याया यत्पाप कपिलावधे ।
तत्पाप समवाप्नोतु यस्यार्योऽनुमते गत ।
विश्वासघातिना पाप यत्पाप गुरुघातिनाम् ।
गुरोश्चालीकनिर्बन्धे तत्पाप प्रतिपद्यताम् ।
यत्पदा पावक स्पृष्ट्वा कुरुते तस्करे च यत् । [5]
तत्पाप समवाप्नोतु यस्यार्योऽनुमते गत ।

[Ñ2 reads l 1–2 after 28 —(l 1) D5 ब्रह्महत्याया —(l 2) V1 D1 तत्स (V1 °त्स) पापमवाप्नोतु (V1 °ति) (for the prior half) B1 [ऽ]नुमतो —D- om (hapl) l 3–6 —(l 3) V1 (before corr as above) गुरुघातिन —Ś1 B1 D6 om l 5–6 —(l 5) D3 दृष्ट्वा (for स्पृष्ट्वा)]

—Thereafter D1 cont 1790*

—After 28, Dg1 Dt1 Dd1 Dm1 T G M1–3 ins, M4 ins after 1795*

1802* अपास्य मातृशुश्रूषामनर्थे सोऽवतिष्ठताम् ।
दीर्घबाहुर्महावक्षा यस्यार्योऽनुमते गत ।
बहुपुत्रो दरिद्रश्च ज्वररोगसमन्वित ।
स भूयात्सतत क्लेशी यस्यार्योऽनुमते गत ।
आशामाशसमानाना दीनानामूर्ध्वचक्षुषाम् । [5]
अर्थिना वितथा कुर्याद्यस्यार्योऽनुमते गत ।
मायया रमता नित्य पुरुष पिशुनोऽशुचि ।
राज्ञो भीतस्त्वधर्मात्मा यस्यार्योऽनुमते गत ।
ऋतुस्नाता सतीं भार्यामृतुकालानुरोधिनीम् ।
अतिवर्तेत दुष्टात्मा यस्यार्योऽनुमते गत । [10]

विहीनां पतिपुत्राभ्यां कौसल्यां पार्थिवात्मजः ।
एवमाश्वासयन्नेव दुःखार्तो निपपात ह ॥ २९
तथा तु शपथैः कष्टैः शपमानमचेतनम् ।
भरतं शोकसंतप्तं कौसल्या वाक्यमब्रवीत् ॥ ३०

मम दुःखमिदं पुत्र भूयः समुपजायते ।
शपथैः शपमानो हि प्राणानुपरुणत्सि मे ॥ ३१
दिष्ट्या न चलितो धर्मादात्मा ते सहलक्ष्मणः ।
वत्स सत्यप्रतिज्ञो मे सतां लोकानवाप्स्यसि ॥ ३२

वर्मदारान्परित्यज्य परदारान्निपेवताम् ।
त्यक्तधर्मरतिर्मूढो यस्यार्योऽनुमते गत ।
विप्रलुप्तप्रजातस्य दुष्कृत ब्राह्मणस्य यत् ।
तदेव प्रतिपद्येत यस्यार्योऽनुमते गत ।
पानीयदूषके पाप तथैव विषदायके ।
यत्तदेक स लभता यस्यार्योऽनुमते गत ।
ब्राह्मणायोद्यता पूजा विहन्तु कलुपेन्द्रिय ।
बालवत्सा च गा दोग्धुर्यस्यार्योऽनुमते गत ।
तृषार्तं सति पानीये विप्रलम्भेन योजयेत् ।
यत्पाप लभते तत्स्याद्यस्यार्योऽनुमते गत ।
भक्त्या विवदमानेषु मार्गमाश्रित्य पश्यत ।
तस्य पापेन युज्येत यस्यार्योऽनुमते गत. ।

[☞ Cv says that the change of sequences of lines found in different MSS is original and not due to scribal error Dg1 om (hapl), M2 reads l 1–2 after st 27 —(l 2) Dm1 महापक्षो (sic) —G3 om (hapl) l 3–4 —(l 3) Dg1 Dt1 Dd1 M3 4 बहुभृत्यो, Cg बहुपुत्रो (as above) M3 बहु, M4 घोर- (for ज्वर-) —(l 4) Dt1 Ct समायात् T1 3 G1 M2 4 सतत- (for °त) Dt1 क्लेश, Dm1 T3 G1 M3 4 क्लेशो (for क्लेशी) —T1 2 read l 5 6 after l 12 M3 transp l 5–10 and l 11–12 —(l 6) G1 3 M4 वितथ, Cr m g as above (for °था) —T1 2 transp l 7-8 and l 9–10 and read after l 2 —(l 7) Dd1 M1 पन्थ Dg1 M3 पिशुनोचित Dm1 T3 G1 पिशुन पुरुषो (by transp) —(l 8) Dg1 G1 3 हितश्च(G1 नीतस्तु, G3 नीत सु) धर्मात्मा —T3 om (hapl) l 9–12 —(l 9) Dd1 Dm1 G1 मर्ता- (for मर्ती) M3 अनु-, Cg k as above (for second ऋतु-) G3 -[अ] भिगामिनी, Cg k as above (for -[अ]नुरोधिनीम्) —(l 10) M2 अनिवर्ते यत्पाप लभते तस्य यद्गत (subm) —Dm1 reads l 11–14 after l 17, Dg1 reads l 11–12 after l 6, Dt1 after l 18, G3 after l 2 and M2 after l 4 —(l 12) M4 मूर्खो (for मूढो) Dg1 परित्यक्तस्वधर्मोऽसौ (for the prior half) —M2 om (hapl) l 13–14 and 17–18 —T1 2 transp l 13–14 and l 15–16 —(l 13) G3 damaged for विप्रलु Dd1 Dm1 तत् (for यत्) —(l 14) Dt1 Dd1 Dm1 एतत्, G1 एक, M4 एव Cg as above (for एव) —G3 M2 read l 15–16 after l 8 —(l 15) Dd1 विषदायक —(l 16) M3 सदैक, M4 तदेव, Cg as above (for तदेक) —Dt1 reads l 17–18 after l 14 —(l 17) G1 विहातु, G3 निहतु, M4 विहन्यात्, Cr k t as above (for विहन्तु). —(l 18) Dm1 दुह्याद्, G3 दोग्ध्रीं, Ct as above (for दोग्धुर्) —M2 om (hapl) l 19–20 —M3 reads l 19–20 after l 16 —(l 19) K (ed) Cg तृष्णार्तं T2 M4 स तु, Cg as above (for सति) Dt1 Dm1 T2 G2 M1 Ck t योजयन्, Cg योजयेत (as above) —(l 20) G3 M3 तस्य (for तत्स्याद) Dg1 [अ]स्य यर्या (sic) G3 damaged for र्योऽनु —T1 2 read l 21–22 before l 17, M4 reads l 21–22 after st 27 —(l 21) G3 भर्ता, M4 भृत्ये (for भक्त्या) T3 [अ]वदीनमानेषु, M4 विवदमाने च (for विवदमानेषु) M4 पक्षम् (for मार्गम्) —(l 22) Cr m g tp as above, Ck t तेन (for तस्य) ❀ Ct अत्र विवदमानानां जयोपाय ज्ञात्वा तदकथयत पापमिति तीर्थ व्याख्या। द्वयो साम्यस्थापनपूर्वक तेषा कलहशमनमकुर्वत कलहप्रियस्य यत्पापमिति कतक व्याख्या। ❀] —Thereafter M4 reads l 3–6 of 1793*

29 Dt1 transp 29^{ab} and 29^{cd} —^{d}) M2 दुःखितो —For 29, Ś1 Ñ V1 B D1–7 M4 subst

1803* एवमाश्वासयामास भरतो दुःखकर्शित ।
कौसल्या शोकसतप्ता पतिपुत्रविनाकृताम् ।

[(l 1) Ś1 D6 -कम्पिता, Ñ2 B D3 4 7 -कर्शि(B D4 °र्पि)-ता, V1 D2 -कर्षित (for -कर्शित). —(l 2) V1 D1 पुत्र, B2 M4 दुःख (for शोक) V1 D1 -शोकार्ता, B3 सताप, D5 -सतप्त]

30 ^{a}) Dt1 T2 3 तदा त(T2 °तं) (for तथा तु) Dg1 T1 2 क्लिष्टै Ś1 Ñ2 B1 3 4 D1 6 M4 एव त(Ś1 एव च, Ñ2 B3 एतास्त, D1 M4 इत्येव, D6 एव स) शपथान्कृच्छ्रान्, Ñ1 D5 एव तान्शपथान्कृत्वा, V1 इत्येव शपथ श्रुत्वा, B2 D2–4 7 एव तु(D2 3 त) शपथान्कृत्स्नान् —^{b}) V1 सप्रमाणम्, D3 वेपमानम् (for शपमानम्) Ś1 Ñ V1 B D1–3 7 M4 अक्लमष —^{c}) Ś1 Ñ2 V1 B D1–3 5 6 M4 दुःख- (for शोक-) V1 D1 -शोकार्तं, T3 G1 -सतप्ता (for -सतप्त) D4 7 कौसल्या पुत्र-शोकार्ता —^{d}) Ś1 Ñ B D1 6 पुनर्, V1 M4 पुत्रम्, D2 5 (with hiatus) इदम् (for वाक्यम्) G3 damaged from वीत् in ^{d} up to मम in 31^{a}

31 G3 damaged for मम in ^{a} (cf v l 30) D4 7 om 31^{ab} —For 31^{ab}, Ś1 Ñ V1 B D1–3 5 6 M4 subst

1804* शुद्धस्वभाव धर्मात्मन्नवैमि त्वामकल्मषम् ।

[V1 जानामि, D1 ब्रवीमि (for अवैमि) M4 अमन्मषम् (sic)] —^{c}) Ś1 Ñ V1 B D1–7 M4 शपथानीदृशान्(Ś1 D6 ईदृशाञ्शपथान् [by transp])कुर्वन्(B1 . . .) —^{d}) Ñ1 B1 3 (*sup lin* also) उपरुणत्सि

32 ^{a}) Dm1 (by corr)च, G3 नु, Cr m g as in text (for न) —^{b}) T2 3 G3 शुभ-, Cr m g as in text

एवं विलपमानस्य दुःखार्तस्य महात्मनः ।
मोहाच्च शोकसंरोधाद्बभूव लुलितं मनः ॥ ३३

लालप्यमानस्य विचेतनस्य
प्रनष्टबुद्धेः पतितस्य भूमौ ।
मुहुर्मुहुर्निःश्वसतश्च दीर्घं
सा तस्य शोकेन जगाम रात्रिः ॥ ३४

इति श्रीरामायणे अयोध्याकाण्डे एकोनसप्ततितमः सर्गः ॥ ६९ ॥

(for सह-) Dg1 Dt1 Dd1 T2 3 G3 Ct -लक्षग, Cr m g ıs ın text (for -लक्ष्मण —c) Dt1 Dd1 Dm1 T3 G1 2 M1 हि (Dm1 [after corr] T3 [ऽ]सि), G3 त्व, Cr m g as ın text (for मे) —d) Cr m g t as ın text, Ct लोकम् (for लोकान्) —For 32, Ś1 Ñ V1 B D1-7 M4 subst

1805* दिष्ट्यासि रामसहित पुत्रधर्मात्र चालित.।
सह रामेण धर्मात्मन्दीर्घमायुरवाप्नुहि ।

[(l 1) Ñ2 -धर्मानुचारित —(l 2) M4 स हि (for सह)] —Then all the above MSS. cont

1806* अपि त्वा सह रामेण पश्येय लक्ष्मणेन च ।
तीर्णप्रतिज्ञमानृण्य गत पितुरकल्मषम् ।
पूर्वेषा पुण्यकीर्तीना राजर्षीणा महात्मनाम् ।
आमुद्यायुश्च कीर्ति च धर्मं चैवोचितं कुले ।
चतुर्दशसु वर्षेपु गतेष्वरिनिपूदन । [5]
राम सीता लक्ष्मण च द्रष्टासि पुनरागतान् ।
तैलद्रोण्या शरीर ते पितुस्तिष्ठति पुत्रक ।
त्वत्प्रतीक्षं महार्हस्य तत्सत्कर्तुमिहार्हसि ।
धर्मेणेमा प्रजा पुत्र यथा रक्षसि तत्कुरु ।
स्वर्गतोऽपि यथा राजा सतुष्यति तथा कुरु । [10]
पितुर्वियोगज दु ख रामत्यागकृत तथा ।
उत्सृज्य धुर्यवत्पुत्र गुर्वीं कुलधुर वह ।

[(l 1) B1 आय Ñ2 त्वा (for त्वा) D2 पश्यता (for पश्येय) —B2 reads l 2 after l 5 —(l 2) B3 4 -प्रतिज्ञेन (for प्रतिज्ञम्) Ñ1 गतेन (hypm) (for गत) B1 अकल्मष Ñ2 B3 4 गतेन पितुरत्र च (for the post half) —(l 3) Ñ2 V1 B3 सर्वेषा —(l 4) D3 om धर्मं B3 [ई]हित (for [उ]चित) B1 कुल D4 7 धर्म च स्व(D4 स)कुलोचित (for the post half). —After l 4, B3 ıns

1806(A)* आनन्द कुरु लोकाना सर्वेषा पुरवासिनाम् ।

—(l 5) V1 चतुदशेषु (corrupt) (for °शसु) B3 वर्षेषु (sic) D2-5 7 रिपुसूदन (for [अ]रिनिपूदन) —(l 6) Ś1 D6 द्रक्ष्यामि, Ñ2 द्रष्यामि (sic), B3 दृक्ष्यामि (for द्रष्टासि) Ś1 V1 D1 3 आगत —(l 7) V1 तु (for ते) Ñ2 B3 राघव, B1 पुत्रक (sic) (for पुत्रक) —D4 om l 8-10 —(l 8) V1 B4 तत् (for त्वत्) D1 3 -प्रतीक्ष्य (for °क्ष) Ñ2 B D1 त्वम्, V1 om (subm) (for इह) —M4 om (hapl) l 10 —(l 10) Ś1 D6 [ऽ]सौ, D2 3 5 7 ते (for ऽपि) Ś1 D6 7 तुष्यत्वथ, V1 D1-3 5 तुष्येते च (V1 D1 ते) (for सतुष्यति) —(l 12) V1 D1 M4 वत्स Ñ1 D4 6 तत्परित्यज्य हे पुत्र, D5 उद्दस्य धर्मवत्पुत्र (for the prior half) Ś1 D4 6 राज (for कुल-) B1 -धुरा (for -धुर)],

